CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 628 Subject : Dharmaśāstra.

Title : Kāla nirṇaya sindhu.

Author : Kamalakara, Bhatta. Scribe : —

Date of the work : — Date of the Ms. : —

Place of the work : — Place of the Ms. : —

Size : 8·4" by 4·8" Extent : 111 foll.

Language : Sanskrit. Script : Devanāgarī

Remarks : ——

दवे रुघारामने
कालनिर्णयनि पोथी टिपण साथ
गृह्यप्रदीपनी पोथी
समयप्रदीपग्रंथ मपरि छेर

श्रीगणेशाय नमः ॥ अथ संवत्सरप्रतिपदमारभ्य तिथिकृत्यं च रूपा
न्तेस्तुक्तादिमेव च ॥ विवाहादौ च सौरादिं मासं संकल्प्य विनिर्दिशेदिति आदौ
प्रायशोऽनुसृत्य तिथिनिर्णयस्तत्कृत्यं च निरूप्यते ॥ तत्र मीनसंक्रांतौ पश्चा
त्षोडश घटिकाः पुण्यकालः ॥ रात्रौ तु निशीथात्प्राक् परतश्च संक्रमे पूर्वो
त्तरदिनार्द्धं पुण्यं निशीथे तु दिनद्वये पुण्यमिति सामान्यनिर्णयादवसेयः
अथ तिथिनिर्णयः ॥ तत्र चैत्रशुक्लप्रतिपदि संवत्सरारंभः ॥ तत्रोदयि
की ग्राह्या ॥ चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेऽहनि ॥ शुक्लपक्षे समग्रं तु
तदा सूर्योदये सतीति हेमाद्रौ ब्राह्मोक्तेः ॥ दिनद्वये तद्व्याप्तावव्याप्तौ वा पू
र्वैव ॥ तदुक्तं ज्योतिर्निबंधे ॥ चैत्रे सितप्रतिपदि यो वारोऽर्कोदये स वर्षेशः ॥
उदयद्वितये पूर्वो नोदययुगलेऽपि पूर्वः स्यात् ॥ यस्माच्चैत्रे मासि तारे रुद्र
याज्ञानोः प्रवर्तिरब्दादेरिति ॥ वत्सरादौ वसंतादौ बलिराज्ये तथैव च ॥
पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति वृद्धवसिष्ठोक्तेः ॥ यदा तु मल

शिवः

२

मासो भवति तदा दैवकार्यस्य तत्र निषिद्धत्वाच्छुद्धे मासि संवत्सरारंभः कार्य इ
ति केचित् ॥ निष्कर्षस्तु शुक्लादेर्मलमासस्य सांतर्भवति चोत्तर इत्यादिवच
नादग्रिमवर्षीतः पातान्मलमासस्य मासस्यैव वर्षप्रवृत्तेः ॥ शुक्लास्नानादि
च मलमासे एव कार्यमिति वयं प्रतीमः ॥ ननु शुक्लादौ चैत्रशुक्लप्रतिपदं तरस्मा
नावाभ्युक्तं तन्मध्य एवानुष्ठानं ॥ मलमासे तु शुद्धप्रतिपदंतरस्य सत्त्वा
च्छुद्ध एव वत्सरारंभो युक्त इति चेत् ॥ अंतोऽस्ति ॥ न हि प्रतिपदंतरसत्त्वं प्रयो
जकं ॥ अपि तु वत्सरारंभः ॥ स तु मलमासेऽपीत्युक्तं प्राक् ॥ न हि चैत्रशुक्लादिर्म
लमासः पूर्ववर्षे तत्र भवतीति प्रमाणमस्ति वचः ॥ अत्र तैलाभ्यंगो नित्यः ॥ वत्स
रादौ वसंतादौ बलिराज्ये तथैव च ॥ तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यत इ
ति वृद्धवसिष्ठोक्तेः ॥ अस्यामेव नवरात्रारंभः ॥ तदुक्तं मार्कंडेयपुराणे ॥ शर
त्काले महापूजा क्रियते या च वार्षिकी ॥ तत्र पूरयुते वघाख्या ॥ अमायुक्ता न
कर्तव्या प्रतिपच्चंडिकार्चने ॥ मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विते ति
देवीपुराणात् ॥ तिथ्याद्यनाः पराः प्राक्तास्तिथयः ककुनंदना ॥ कार्तिकाश्व

युजौ मासि श्रीचैत्रमासि चत्वारस्ते तिथिर्माद्रौ आन्दोलके॥ पराः परयुताः॥ अत्र
पारणा निर्णयश्च मारदन व्रताग्रे वक्ष्यते॥ अथ प्रपादानमुक्तं मदनरत्ने भवि
ष्ये॥ अतीते फाल्गुने मासि प्राप्ते चैत्रमहोत्सवे॥ पुण्येऽह्नि विप्रकथिते प्रपादा
नं समारभेदिष्टपक्रम्य॥ ततश्चोत्सर्जयेद्विद्वान्मंत्रेणानेन मानवः॥ प्रपेयं
सर्वसामान्या भूतेभ्यः प्रतिपादिता॥ अस्याः प्रदानात्पितरस्तृप्यंतु हि पितामहाः॥
हाः॥ अनिवार्यं ततो देयं जलं मासचतुष्टयमिति॥ तथा॥ प्रपादानासमर्थकेन
विशेषाद्धर्मभीप्सुना॥ प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः॥ ब्राह्मणस्य
गृहे देयः शीतामलजलः शुचिः॥ तत्र मंत्रः॥ एष धर्मघटो दत्तो ब्रह्मविष्णुवि
शिवात्मकः॥ अस्य प्रदानात्सकला मम संतु मनोरथाः॥ अनेन विधिना य
स्तु धर्मकुंभं प्रयच्छति॥ प्रपादानफलं सोपि प्राप्नोतीह न संशय इति॥ चैत्र
शुक्लतृतीयायां गौरीमीश्वरयुतां संपूज्य दोलोत्सवं कुर्यात्॥ तदुक्तं निर्णया
मृते देवीपुराणे॥ तृतीयायां यजेद्देवीं शंकरेण समन्वितां॥ कुंकुमागुरुकर्पू शिवः
रमणिवस्त्रसुगंधकैः॥ स्रक्गंधधूपदीपैश्च दमनेन विशेषतः॥ आंदो २

लयेत्ततो वत्स शिवोमाप्तुष्ट्ये सदेति॥ अत्र चतुर्थीयुता ग्राह्या॥ मुहूर्तमात्र
सत्त्वेपि दिने गौरीव्रतं परे इति माधवोक्तेः॥ अत्रैव सौभाग्यशयन व्रतमुक्तं मा
त्स्ये॥ वसंतमाससमासाद्य तृतीयायां जनप्रिये॥ सौभाग्याय सदा स्त्रीभिः कार्यं
पुत्रसुखेप्सुभिरिति॥ तत्रापि परयुतैव॥ इयं च मन्वादिरपि॥ अत्रैव प्रसं
गात्सर्वमन्वादिनिर्णय उच्यते॥ तत्र हेमाद्रौ दीपिकायां॥ तिथ्यग्नीन तिथिसि
त्याशाब्दसेनो नसोऽग्रहः तिथ्यर्कौ नशिवोऽब्धो मासि तिथी मन्वादयो मधोरि
ति॥ तिथयः पूर्णिमा॥ अग्निस्तृतीया॥ नेति विशाखेन॥ स्तीत्यर्थः॥ आशा दशमी॥
शब्दसेनः सप्तमी॥ अनलस्तृतीया॥ ग्रहा नवमी॥ अर्को द्वादशी॥ शिव एका
दशी॥ अब्धः सप्तमी॥ मधोश्चैत्रादारभ्यैता मन्वादय इत्यर्थः॥ अत्र मूलव
चनानि हेमाद्रावुदाहृतानि॥ एताश्च मन्वादयो हेमाद्रिमते शुक्लपक्षस्थाः पौ
र्वाह्णिकाः कृष्णपक्षस्थाः आपराह्णिका ग्राह्याः॥ पूर्वाह्णे तु सदा ग्राह्याः शुक्ला म
न्वयुगादयः॥ दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिका इति गारुडवचना
त्॥ अथो मन्वादियुगादिकर्मतिथयः पूर्वाह्णिकाः स्फुटमस्ते विज्ञेया॥ अपरा

लिकाश्च बकुलेऽह्न इति वैकुंठदीपिकोक्तेश्च॥ कालादर्शे त्वपराह्णव्यापि
त्वं मन्वादिषूक्तं॥ तत्स्वयमुक्तमिति युगादिनिर्णय एव वक्ष्यामः॥ अत्र च श्राद्धमुक्तं
मात्स्ये॥ स तं श्राद्धं विधानेन मन्वादिषु युगादिषु॥ हायनानि द्विसाहस्रं पितॄ
णां तृप्तिं ददाति वै॥ इति॥ मन्वादिश्राद्धं मलमासे सति मासद्वयेऽपि कार्यं॥ मन्वा
दिकं तैर्थिकं चैव यो मासद्वयेऽपि चेति स्मृतिचंद्रिकोक्तेः॥ अत्रापि पिंडरहितं
श्राद्धं कुर्यात्॥ तदुक्तं कालादर्शे॥ विषुवायनसंक्रांतिमन्वादिषु युगादिषु॥ वि
ना यद्यपि पिंडनिर्वापं सर्वं श्राद्धं समापयेदिति॥ मन्वादिश्राद्धं च नित्यं अकरणे
प्रायश्चित्तदर्शनात्॥ तदुक्तं मत्स्यविधाने॥ त्वंतु वः प्रतिमंत्रं च शतवारं जलेज
पेत्॥ मन्वादयो यदान्यूनाः कुरुते नैव चापि यदि॥ एवं यत्र प्रायश्चित्तवी
प्सादिदर्शनं तानि षण्णवति श्राद्धानि नित्यानि॥ तानि तु॥ अमामनुयुग
क्रांतिधृतिपातमहालयाः॥ आन्वष्टक्यं च पूर्वेद्युः षण्णवत्यः प्रकीर्तिता
इत्युक्तानि॥ चकारादष्टकाग्रहणं॥ चैत्रस्य शुक्लतृतीयायां मत्स्यजयंती॥ अ शिवः
त्रैव प्रसंगादवतारजयंत्यो निर्णीयंते॥ तत्र पुराणसमुच्चये॥ मत्स्योऽभू ३

त्तत्सुदिने मधुसिते कूर्मो विधौ माधवे वाराहो गिरिजासुते नभसि यन्
नेसिते माधवे॥ सिंहो नात्र परे सिते हरितिथौ श्रीवामनो माधवो रामो गौरि ति
थावतः परमन्मथानवम्यां मधौ॥ कृष्णोष्टम्यां नभसि सितपरे चाश्विने त ३
यद्दशम्यां बुद्धः कल्की नभसि समभूच्छुक्लषष्ठ्यां क्रमेण॥ अत्र मध्ये वामनो
रामरामो मत्स्यः क्रोडश्चापराह्णे विनागो॥ कूर्मः सिंहो बौद्धकल्की च सायं
कृष्णो रात्रौ कालसाम्यं च दृष्टैवेति॥ केचित्तु स्कान्दे नस्सो कान्त पठंति॥ यथा॥ चै
त्रे शुक्लपंचम्यां जगवान्मीनरूपधृक्॥ ज्येष्ठशुक्लद्वादश्यां कूर्मरूपध
रो हरिः॥ चैत्रे कृष्णनवम्यां तु हरिर्वाराहरूपधृक्॥ नरसिंहश्चतुर्दश्यां वै
शाखे शुक्लपक्षके॥ मासि भाद्रपदे शुक्लद्वादश्यां वामनो हरिः॥ राधस्य शुक्लतृ
तीयायां रामो भार्गवरूपधृक्॥ चैत्रस्य शुक्लनवम्यां तु रामो दशरथात्मजः॥ न
भस्ये तु द्वितीयायां तु बलभद्रो ब हरिः॥ आवणे बहुलेऽष्टम्यां स स्रोन्हपुत्रो क
ष्णकः॥ ज्येष्ठस्य शुक्लद्वितीयायां बौद्धः कल्की तु विष्णुतिथिः॥ कौंकणस्त्वपरा
ह्णपुराणे त्वन्यथा मानि पठंति॥ आषाढस्य शुक्लपक्षे तु एकादश्यां महान्

यो॥ जयंती मत्स्य नाम्नीति तस्यां कार्यमुपोषणं॥ नभो मासि तृतीयायां हरि
मत्स्यरूपधृक्॥ नभस्य शुक्ल पंचम्यां वराहस्य जयंतिका॥ वैशाखे शुक्ल च
र्दश्यां नृसिंहः समपद्यत॥ वैशाख शुक्लपक्षे तु तृतीयायां रघूद्वहः॥ मासि नभ प
शुक्ले कादश्यां वामनो हरिः॥ चैत्रे नवम्यां रामोऽभूत् कौशल्यायां परात्पुमान्॥ भाद्र
ले बहुलेष्टम्यां वासुदेवो जनार्दनः॥ पौषशुक्ले तु सप्तम्यां कार्या बौद्धस्य पूजनं॥
मासशुक्लतृतीयायां कल्किनः पूजनं हरेः॥ प्रातः प्रातस्तु मध्याह्ने सायंसायं त
था निशि॥ मध्याह्ने मध्यरात्रे च सायं प्रातरनुक्रमादिति॥ तदनसमूलत्वनि
र्णयेस्मिति कल्पभेदेन व्यवस्था द्रष्टव्या॥ एताश्च तत्तदुपासकानां नित्याः॥ अन्ये
षां तु काम्याः॥ जन्माष्टम्यादौ तु विशेषं वक्ष्यामः॥ चैत्रशुक्लपंचमी कल्यादिः॥ त
दुक्तं हेमाद्रौ मात्स्ये॥ ब्रह्मलोके दिनस्यादिः कल्यादिः सा प्रकीर्तिता॥ वैशाखस्य
तृतीया या तच्छाया फाल्गुनस्य च॥ पंचमी चैत्रमासस्य तस्यैवांत्या तथा परा॥
शुक्ला त्रयोदशी माघे कार्त्तिकस्य तु सप्तमी॥ नवमी मार्गशीर्षस्य सप्तैताः संस्मरा
म्यहं॥ कल्यानामादयो ह्येता दत्तस्याक्षयकारकाः॥ अत्र सर्वोपि निर्णयो मन्वा शिवः
दिवज्ज्ञेयः॥ चैत्रशुक्लाष्टम्यां भवान्या उत्पत्तिः॥ तत्र नवमीयुता ग्राह्या॥ अष्ट ४

मी नवमीयुक्ता नवमी चाष्टमीयुतेति ब्रह्मवैवर्त्तात्॥ अत्र भवानीयात्रो
क्ता काशीखंडे॥ भवानीयस्तु पश्येत्तु शुक्लाष्टम्यां मधौ नरः॥ न जातु शोक
मन्नेत सदानंदमयो भवेदिति॥ अत्रैवाशोककलिकाप्राशनमुक्तं हेमा
द्रौ लिंगे॥ अशोककलिकाश्चाष्टौ ये पिबंति पुनर्वसौ॥ चैत्रे मासि सि
ताष्टम्यां न ते शोकमवाप्नुयुः॥ प्राशनमंत्रस्तु॥ त्वामशोकवराभीष्ट म
धुमाससमुद्भवं॥ पिबामि शोकसंतप्तो मामशोकं सदा कुरु इति॥ अत्र
विशेषः पृथ्वीचंद्रोदये विष्णुः॥ पुनर्वसुबुधोपेता चैत्रे मासि सिताष्टमी॥
प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेदिति॥ तिथितत्वे कालिकापुरा
णे॥ चैत्रे मासि सिताष्टम्यां यो नरो नियतेंद्रियः॥ स्नायात् लौहित्यतोयेषु
स याति ब्रह्मणः पदं॥ चैत्रं तु सकलं मासं शुचिः प्रयतमानसः॥ लौ
हित्यतोये यः स्नायात् स कैवल्यमवाप्नुयात्॥ लौहित्यो ब्रह्मणः पुत्रः॥ मं
त्रस्तु॥ ब्रह्मपुत्र महाभाग शांतनोः कुलसंभव॥ अमोघागर्भसंभूत
पापं लौहित्य मे हर॥ चैत्रशुक्लनवमी रामनवमी॥ तदुक्तमगस्त्यसंहि

हे

तायां॥ चैत्रे नवम्यां प्राक्पक्षे दिवा पुण्ये पुनर्वसौ॥ उदये गुरुगौरांशे
स्वोच्चस्थे ग्रहपंचके॥ मेषे पूषणि संप्राप्ते लग्ने कर्कटकाह्वये॥ आविरासी
त्सकलया कौशल्यायां परः पुमान्॥ तस्मिन्दिने तु कर्त्तव्यमुपवासव्र
तं सदा॥ तत्र जागरणं कुर्याद्रघुनाथपरो भुवि॥ इयं च मध्याह्नयोगि
नी ग्राह्या॥ चैत्रशुक्ला तु नवमी पुनर्वसुयुता यदि॥ सैव मध्याह्नयोगेन
महापुण्यतमा भवेदिति तत्रैवोक्तेः॥ तथा॥ चैत्रमासे नवम्यां तु जातो रा
मः स्वयं हरिः॥ पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा॥ श्रीरामनव
मी प्रोक्ता कोटिसूर्यग्रहाधिका॥ तथा॥ केवलापि सदोपोष्या नवमी श
र्व संग्रहात्॥ तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतं॥ दिनद्वये म
ध्याह्नव्याप्तौ तदभावे वा पूर्वदिने पुनर्वस्वृक्षयुक्तामपि त्यक्त्वा परै
व कार्या॥ तदुक्तं माधवीये अगस्त्यसंहितायां॥ नवमी चाष्टमीविद्धा
त्याज्या विष्णुपरायणैः॥ उपोषणं नवम्यां च दशम्यां चैव पारणमि
ति॥ अष्टमीविद्धासत्त्वेऽपि नोपोष्येति माधवः॥ रामार्चनचंद्रिका

शिवः
५

यामपि॥ विद्धैव चेदष्टमीयुक्तं व्रतं तत्र कथं भवेत्॥ विद्धानिषेधश्रवणा
न्नवमी चेति याच्यतः॥ वैष्णवानां विशेषात्तु तत्र विष्णुपरैरपि॥ दशम्यादि
युक्ता विद्धा त्याज्या वैष्णवैः॥ तदन्येषां च सर्वेषां व्रतं तत्रैव निश्चि
तमिति॥ अत्र दशम्यादियुक्ता वृद्धिरिति तदन्येषामिति वचनं तत्र यदा
प्रातस्त्रिमुहूर्ता नवमी दशमी च द्वयवशात्सूर्योदयात्प्रागेव समाप्यते तदा
स्मार्तानां तत्रैव एकादशीनिमित्तोपवासान्नवमीव्रतांगपारणालोपः स्यात्
अतोऽष्टमीविद्धैव स्मार्तैः कार्या॥ वैष्णवानां त्वरुणोदयविद्धैकादश्या हेयत्वा
त्पारणालोपप्रसंग इति द्वितीयैव तैः कार्येति सूचयति॥ दशमीवृद्धा
वष्टमीविद्धायाः द्वयेऽच वैष्णवैरपि विद्धैवोपोष्येत्यर्थसिद्धं॥ इदं च व्र
तं संयोगपृथक्त्वन्यायेन काम्यं नित्यं च॥ तदुक्तं हेमाद्रावगस्त्यसंहिता
यां॥ उपोषणं जागरणं पितॄनुद्दिश्य तर्पणं॥ तस्मिन्दिने तु कर्तव्यं ब्रह्मप्राप्ति
मभीप्सुभिः॥ सर्वेषामप्ययं धर्मो भुक्तिमुक्त्यैकसाधनः॥ अशुचिर्वापि पा
पिष्ठः कृत्वेदं व्रतमुत्तमं॥ पूज्यः स्यात्सर्वभूतानां यथा रामस्तथैव सः॥

स्तु रामनवम्यां तु भुंक्ते मोहाद्विमूढधीः॥ कुंभीपाकेषु घोरेषु पच्यते नात्र
संशयः॥ तथा॥ अगस्त्यः॥ रामनवमीव्रतं सर्वव्रतोत्तमं॥ व्रतान्यन्यानि कु
रुते न तेषां फलभाग्भवेत्॥ प्राप्ते श्रीरामनवमीदिने मर्त्यो विमूढधीः॥ उपोष
णं न कुरुते कुंभीपाकेषु पच्यते॥ अत्र केचित्तदुपासकानामेवेदं व्रतं नि
त्यं न त्वन्येषामित्याहुः॥ अन्ये तु अकरणे दोषश्रवणात् तस्मात्सर्वात्मना स
र्वैः कार्यं वै नवमीव्रतमिति हेमाद्रिवचनाच्च जन्माष्टमीवदिदमपि
सर्वेषां नित्यं॥ अन्यथा जन्माष्टम्यादावपि तदुपासकानामेव नित्यतां
वक्तुः को वारयितेत्याहुः॥ अत्र विशेषो हेमाद्रावगस्त्यसंहितायां॥ आ
चार्यं चैव संपूज्य वृणुयात्प्रार्थयन्निति॥ श्रीरामप्रतिमादानं करिष्येहं द्वि
जोत्तम॥ तत्राचार्यो भव प्रीतः श्रीरामोसि त्वमेव च॥ तथा॥ स्वर्णहेचो
लेरे देशे दानस्योज्ज्वलमंडपे॥ शंखचक्रहनूमद्भिः प्राग्द्वारे समलंकृ
ते॥ गरुत्मच्छार्ङ्गबाणैश्च दक्षिणे समलंकृते॥ गदाखड्गांगदैश्चैव पाश्चि
मे सुविभूषिते॥ पद्मस्वस्तिकनीलैश्च कौबेरे समलंकृते॥ मध्ये हस्तद्व

शिवः
६

तुष्ट्या पूर्वं वेदिकायुक्तमायतं॥ ततः संकल्पयेद्देवं राममेव स्मरन्मुने॥ अ
स्यां रामनवम्यां च रामाराधनतत्परः॥ उपोष्याष्टसु यामेषु पूजयित्वा
यथाविधि॥ इमां स्वर्णमयीं रामप्रतिमां च प्रयत्नतः॥ श्रीरामप्रीतये दास्ये
रामभक्ताय धीमते॥ प्रीतो रामो हरत्वाशु पापानि सुबहूनि मे॥ अनेक
जन्मसंसिद्धान्यभ्यस्तानि महांति च॥ ततः स्वर्णमयीं रामप्रतिमां पल
मात्रतः॥ निर्मितां द्विभुजां दिव्यां वामांकस्थितजानकीं॥ बिभ्रतीं दक्षि
णकरे ज्ञानमुद्रां महामुने॥ वामेनाधःकरेणाराद्देवीमालिंग्य संस्थि
तां॥ सिंहासने राजते च पलद्वयविनिर्मिते॥ तथा॥ अशक्तो यो महाभाग
स्तद्वित्तानुसारतः॥ पलेनार्द्धतदर्द्धार्द्धतदर्द्धेनेन वा मुने॥ सौवर्णं रा
जतं वापि कारयेद्रघुनंदनं॥ पार्श्वे भरतशत्रुघ्नौ धृतछत्रकरावुभौ॥ चाप
द्वयसमायुक्तं लक्ष्मणं चापि कारयेत्॥ दक्षिणे गे दशरथं पुत्रावेक्षणत
त्परं॥ मातरं कणतेरामममित्रनीसममत्रनी॥ पंचामृतस्नानपूर्वं संपू
ज्य विधिवत्ततः॥ कौशल्यां मंत्रस्के॥ रामस्य जननीं चासि रामरूप

देहजगत्॥ अतस्त्वां प्रपूजयिष्यामि लोकमातर्नमोस्तु ते॥ नमो दशरथा-
यति पूजयेत्पितरं ततः॥ अत्र दशावरणपेक्षावरणादि पूजान्यत्र ज्ञेया॥
अशोककुसुमैर्युक्तमर्घं दद्याद्विचक्षणः॥ दशाननवधार्थाय धर्मसंस्था-
पनाय च॥ राक्षसानां विनाशाय दैत्यानां निधनाय च॥ परित्राणाय साधू-
नां जातो रामः स्वयं हरिः॥ गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोनघ॥ पुष्पां-
जलिं पुनर्दत्वा यामे यामे प्रपूजयेत्॥ दिवैवं विधिवत्कृत्वा रात्रौ
जागरणं ततः॥ प्रातः समुत्थाय स्नानसंध्यादिकाः॥ समाप्य विधिवद्रा-
मं पूजयेद्विधिवन्मुने॥ ततो होमं प्रकुर्वीत मूलमंत्रेण मंत्रवित्॥ पूर्वो-
क्तपनकुंडे वा स्थंडिले वा समाहितः॥ लौकिकाग्नौ विधानेन शतमष्टो-
त्तरं ततः॥ साज्येन पायसेनैव स्मरन्राममनन्यधीः॥ ततो भक्त्या सु-
संतोष्य आचार्यं पूजयेन्मुने॥ ततो रामं स्मरन्दद्यादेवं मंत्रमुदीरयेत्॥ शिवः
इमां स्वर्णमयीं रामप्रतिमां समलंकृतां॥ चित्रवस्त्रयुगच्छन्नां रामोहं रा-
घवाय ते॥ श्रीरामप्रीतये दास्ये तुष्टो भवतु राघवः॥ इति दत्वा विधा- ७

नेन रघ्यादैदक्षिणां स्तुवं॥ ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशय इति॥ इयं
मलमासे न कार्या॥ सुजन्मप्रजन्मस्याः नोपवासः कृतो न वेदिति॥ न कुर्या-
न्मलमासे तु महादानं व्रतानि च॥ इति माधवीयसंग्रहवचनात्॥ ननु रामन-
वमीव्रतस्य नित्यत्वादेकादशीवन्मलमासेपि कर्तव्यतास्यादिति चेत्॥ अ-
त्र ब्रूमः॥ नैकादश्युपवासस्य व्रतत्वेन प्राप्तिः॥ किं तु एकादश्यां न भुंजीत
पक्षयोरुभयोरपीत्यादिनिषेधस्य मलमासेपि पालनीयत्वाद्बलात्त्वेकाद-
श्यां भुक्तवर्जनेनार्थादुपवासः प्रसज्यते॥ न त्विह तथेति व्रतत्वेन
प्राप्तिर्वाच्या॥ सा च निषिद्धेत्यत्र संगः॥ स्पष्टमासविशेषाख्याविहितं
वर्जयेन्मले इति निषेधात्॥ एवं जन्माष्टम्यादावपि बोद्धव्यं॥ ॥इति रा-
मनवमी॥ ॥चैत्रशुक्लैकादश्यां दोलोत्सव उक्तो ब्राह्मे॥ चैत्रे मासस्य
शुक्लायामेकादश्यां तु वैष्णवैः॥ आंदोलनीयो देवेशः सलक्ष्मीको महोत्स-
वैरिति॥ चैत्रशुक्लद्वादश्यां दमनोत्सवः॥ द्वादश्यां चैत्रमासस्य शुक्लायां
दमनोत्सवः॥ बौधायनादिभिः प्रोक्तः कर्तव्यः प्रतिवत्सरमिति रामा-
र्चनचंद्रिकोक्तेः॥ ऊर्जे व्रतं मधौ दोला श्रावणे तंतुपूजनं॥ चैत्रे च द-

मनारोपमकुर्वीतो ऽजत्यध इति तन्त्रैव पाप्मवञ्चनाच्च ॥ शिवनस्कादि
स्कृचवदृश्यारो काये ॥ तत्रस्या स्त्री यतिनिधिपुष्पमध्यादे दमनापेणमिति तं
वोक्तेः ॥ निष्ययस्त्रा ॥ वन्हिर्विरंचो गिरिजा गणेशः फणी विशाखो दिनकृन्महे
शः ॥ दुर्गान्तको विश्वहरिः स्मरश्च शर्वः शशी चेति यी पुरुज्या इत्यक्तः ॥
॥ अथागमोक्तहीनावतो दमनारोपणविधिः ॥ रामोर्चनचंद्रिकोक्तः ॥ तत्रैको
दश्यां ॥ क्रियालोपविघातार्थं यत्वया विहितं प्रभो ॥ न मे विघ्नो नवेदत्र करु
णाय दयां मयि ॥ सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः ॥ उपवासेन त्वां दे
व तोषयामि जगत्पते ॥ कामक्रोधादयो येच न मे स्युः व्रतघातकाः ॥ अद्य प्र
भृति देवेश यावद्वैशेषिकं दिनं ॥ तावद्रक्षा त्वया कार्या सर्वस्यास्य जगत्
पते ॥ इति देवं संप्रार्थ्य दमनमाराय पंचगव्येन प्रासन्य वारिणा प्रक्षाल्या
शोकमूले देवाग्रे वा अशोकाय नमस्कृत्य कामस्त्रीशोकनाशन ॥ शोकार्त
हरमे नित्यमानंदं जनयस्व मे इत्यशोकं ॥ कुष्मांडिकालपर्यंतः कालरू
पो महाबलः ॥ कलते चैव यः सर्वं तस्मै कालात्मने नम इति कालं ॥ वसं
ताय नमस्कृत्य वसंतं वहुपुष्पलताश्रयो ॥ सहस्रमुखसंवास कामरूप नमो

शिवः
६

स्तुत इति वसंतं ॥ कामभस्मसमुद्भूत रति वाष्पपरिप्लुत ॥ ऋषिगंध
र्वदेवादिविमोहक नमोस्तुते इति दमनं च संपूज्य ॥ नमोस्तु पंचबाणाय
जगदाह्लादकारिणे ॥ मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय ते इति दम
नमुपस्थाय ऐं कामाय नम इति संपूज्य निशायां देवाग्रे पंचवर्णैश्चंदनेन
वाष्टदलं कृत्वा बहिश्चतुरस्रं तद्बहिर्वेदुलत्रयं तद्बहिरङ्के चतुरस्रं च कृ
त्वा तत्रकं तं संस्थाप्य परिदमनं पूजयित्वा ॥ पूजार्थं देवदेवस्य विष्णो
लक्ष्मीपतेः प्रभोः ॥ दमन त्वमिहागच्छ सान्निध्यं कुरु ते नरः ॥ ॐ क्लीं काम
देवाय नमः ॥ ॐ क्लीं रत्यै नम इत्या वाह्य दिक्षु पूर्वादितः स्मरशरीराय न
मः ॥ अनंगाय ॥ मन्मथाय ॥ कामाय नमः ॥ क्लीं वसंतसखाय स्मराय
इक्षुचापाय पुष्पास्त्राय नम इति पूजयित्वा ॥ ॐ तत्सरूपाय विद्महे का
मदेवाय धीमहि तन्नो नंगः प्रचोदयादिति अष्टोत्तरशतं संमंत्र्य पूजयित्वा
क्लीं नम इति पुष्पांजलिं दत्वा नमो स्तु पुष्पबाणाय जगदाह्लादकारि
णे ॥ मन्मथाय जगन्नेत्रे रतिप्रीतिप्रियाय त इति नत्वा ॥ आमंत्रितो सि

देवेशपुराणपुरुषोत्तम॥ प्रातस्त्वां पूजयिष्यामि सांनिध्यं कुरु केशव
क्षीरोदधिमहानागशय्यावस्थितविग्रह॥ प्रातस्त्वां पूजयिष्यामि सन्नि-
धौ भव ते नमः॥ निवेदयाम्यहं तुभ्यं प्रातर्दमनकं शुभं॥ सर्वथा सर्वदा वि-
ष्णो नमस्तेस्तु प्रसीद मे॥ इति देवं संप्रार्थ्य पुष्पांजलिं दत्वा क्रमेण च
क्रमंत्रेण वा रक्षां कुर्यात्॥ ततः प्रातर्नित्यपूजां कृत्वा पुनर्देवं संपूज्य हृ-
वर्गीधाहृतपुष्पं दमनमादाय मूलमंत्रं पठित्वा॥ देवदेव जगन्नाथ वां-
छितार्थप्रदायक॥ हृत्स्थान्पूरय मे कामान्मम कामेश्वरप्रिय॥ इदं
दमनकं देव गृहाण मदनुग्रहात्॥ इमां सांवत्सरीं पूजां भगवन्परिपूर-
देवे य॥ इति मंत्रांते पुनर्मूलमंत्रेण समर्पयेत् ततोंगदेवताभ्यः स्वस्वमं-
मंत्रेण दत्वा प्रार्थयेत्॥ मणिविद्रुममालाभिर्मंदारकुसुमादिभिः॥
इयं सांवत्सरी पूजा तवास्तु गरुडध्वज॥ वनमालां यथा देव कौस्तुभं
सततं हृदि॥ तद्वद्दमनकीं मालां पूजां च हृदये वह॥ जानताजानता वा शिवः
पि न कृतं यत्तवार्चनं॥ तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते॥ इति ९

तेपुंडरीकाक्ष नमस्ते विश्वभावन॥ नमस्तेस्तु हृषीकेश महापुरुष पू-
र्वज॥ मंत्रहीनमिति च संप्रार्थ्य पंचोपचारैः संपूज्य नीराजयेदिति दी-
पहारविहितानां चैनाम्नैव समर्पणं॥ अत्र चतुर्दशी मतंत्री हत्य पारणं हो-
प्राहुं॥ पारणाहे न लभ्येत द्वादशी घटिकापि चेत्॥ तदा त्रयोदश्यां प्राप्या
पवित्रदमनार्पणं इति तत्रैवोक्तेः॥ गौणोपि कालस्तु कृत्स्ने त्रैव॥ हरौ न दम-
नारोपः स्यान्मधौ विघ्नतो यदि॥ वैशाखे श्रावणे वापि तत्तियौ स्यात्तदर्प-
णं॥ श्रावणावधि शुक्लास्ते कर्तव्यमिति नारदः॥ इति पाठांतरं॥ इदं च मल-
मासे न कार्यं॥ उपाकर्मोत्सर्जनं च पवित्रदमनार्पणमिति कालादर्शेभि-
न मासवर्ज्येषु परिगणनात्॥ उपाकर्म च हव्यं च कव्यं पर्वोसिवस्तथा॥
चत्तरे नियतं कुर्यात्सर्वं तन्निष्फलं न चेदिति माधवीये आपस्तंबवच-
नाच्च॥ शुक्रास्तादौ तु कार्यमेवोक्तवचनात्॥ उपाकर्मोत्सर्जनं च पवित्र-
दमनार्पणं॥ ईशानस्य बलिर्विष्णोः शयनं परिवर्तनं॥ कुर्याच्छुक्रस्य चाप्य-
रोमोऽपीति विनिश्चय इति ज्योतिर्निबंधे वृद्धगार्ग्यवचनाच्च॥

इति दमनारोपः॥ ॥चैत्रशुक्लत्रयोदश्यामनंगव्रतं तत्र सा पूर्वा ग्राह्या
त्रयोदशी तिथिः पूर्वः सित इति दीपिकोक्तेः॥ चैत्रशुक्लचतुर्दशी पूर्वा ग्राह्या
मधोः श्रावणमासस्य शुक्ला या तु चतुर्दशी॥ सा रात्रिव्यापिनी ग्राह्या नान्या
शुक्ला कदाचनेति हेमाद्रौ बौधायनोक्तेः॥ परा पूर्वाह्णगामिनीति वा पाठः॥
अत्र केचिद्यथाश्रुतमेवार्थं वर्णयंति॥ निशि भ्रमंति भूतानि शक्तयः शू
लभृद्यतः॥ अतस्तत्र चतुर्दश्यां सत्यां तत्पूजनं भवेदिति ब्रह्मवैवर्त्तोक्तेः॥
हेमाद्रिमाधवादिलिखनमप्येवं॥ संप्रदायविदस्त्वाहुः॥ चतुर्दश्येव शुक
त्वे या त्रयोदश्यायुता विनोदे इति स्कांदमुत्सर्गः॥ तदपवादस्तु॥ तृतीयैकाद
शीषष्ठी शुक्लपक्षे चतुर्दशी॥ पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुतेति नार
दीयवचनं॥ तदपवादस्तु॥ मधोः श्रावणमासस्येति॥ तत्रापवादत्वाद्विषु
नरुत्सर्गस्य स्थितिरिति न्याये न पूर्वविद्धैव ग्राह्येति सिध्यति॥ ब्रह्मवैव
र्त्तं तु सामान्यरूपमन्यत्र सावकाशमिति॥ तेन पूर्वदिने तु स्ततैत्रयवेधे
पूर्वा अन्यथोत्तरेति॥ चैत्रपूर्णिमा सामान्यनिर्णयात्सैव॥ अत्र विशेषो शिव १०

निर्णयामृते विष्णुस्मृतौ॥ चैत्री चित्रायुक्ता चेत्तस्यां चित्रवस्त्रप्रदानेन
सौभाग्यमाप्नोतीति॥ तथा ब्राह्मे॥ मंदे वार्के गुरौ वापि वारेष्वेतेषु चैत्रिका॥
तत्राश्वमेधजं पुण्यं स्नानदानादिभिर्लभेदिति॥ अत्र सर्वदेवानां दम
नपूजोक्ता तत्रैव वायवीये॥ संवत्सरकृतार्चायाः साफल्यायाखिलान्सुरान्॥
दमनेनार्चयेच्चैत्र्यां विशेषेण सदाशिवमिति॥ अत्र स्वीयतिथ्या समु
च्चय इति केचित्॥ स्वीयतिथ्यावकरणे अत्र दमनपूजनमिष्यते॥ दीक्षि
तादितरविषयत्वेन व्यवस्थेत्यपरे॥ इयं मन्वादिरपि॥ सा च पूर्वैवमुक्ता॥
चैत्रकृष्णत्रयोदश्यां महावारुणीसंज्ञको योगो गौडेषु प्रसिद्धः॥ तदुक्तं
वाचस्पतिकृतौ शूलपाणौ च स्कांदे॥ वारुणेन समायुक्ता मधौ कृष्णा च
त्रयोदशी॥ गंगायां यदि लभ्येत सूर्यग्रहशतैः समा॥ शनिवारसमायुक्ता
सा महावारुणी स्मृता॥ गंगायां यदि लभ्येत कोटिसूर्यग्रहैः समा॥ शु
भकोटिसमायुक्ता शनौ शतभिषा यदि॥ महामहेति विख्याता त्रिको
टिकुलमुद्धरेत्॥ तत्रैव ज्योतिषे॥ चैत्रासिते वारुणऋक्षयुक्ता त्रयो

णीसूर्यस्तुतस्यवारे॥ योगेऽस्मिन्ने सा महती महत्यां गंगाजलेऽर्कग्रहको
टितुल्येति॥ त्रिस्थलीसेतौ स्कांदे॥ वारुणेन समायुक्ता मधौ कृष्णा
त्रयोदशी॥ गंगायां यदि लभ्येत शतसूर्यग्रहैः समेति॥ कल्पतरौ ब्राह्मे॥
मधौ कृष्णा त्रयोदश्यां शनौ शतभिषायुते॥ वारुणीति समाख्याता शुभे
ति महती स्मृता॥ चैत्रशुक्लचतुर्दश्यां विशेषः॥ पृथ्वीचंद्रोदये पुलस्त्यः॥
चैत्रे शुक्लचतुर्दश्यां यः स्नायाच्छिवसन्निधौ॥ न प्रेतत्वमवाप्नोति गंगा
यां तु विशेषतः इति॥ गौडैस्त्वेवं तदेव कृष्णचतुर्दश्यामित्येवं द्वैतलीय
[redacted] त्वेन पठितं॥ ॥इति श्रीरामकृष्णभट्टसूरिसूनुदिवाकरभट्टानुज
कमलाकरभट्टकृते कालनिर्णयसिंधौ द्वितीयपरिच्छेदे चैत्रमासः॥
वैशाखः ४ ॥ ॥मेषसंक्रमे सौरो विशेषः॥ प्रागपरा दश घटिकाः पुण्यकालः॥
रात्रौ तु प्रागुक्तं॥ अत्र धर्मघटादिदानमुक्तं पृथ्वीचंद्रोदये पाद्मे॥ ती शिवः
र्थे चानुदिनं स्नानं तिलैश्च पितृतर्पणं॥ दानं धर्मघटादीनां मधुसूद
नपूजनं॥ माधवे मासि केवीत मधुसूदनतुष्टिदं॥ अत्र वैशाखस्नानं॥ ११

तत्र पृथ्वीचंद्रोदये विष्णुस्मृतिपाद्मयोः॥ तुलामकरमेषेषु प्रातःस्ना
नं विधीयते॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति॥ सौरमासस
उक्तः॥ अन्यत्सर्वं द्वयमुक्तं तत्रैव॥ पाद्मे॥ मधुमासस्य शुक्लायामेका
दश्यामुपोषितः॥ पंचदश्यां चरेद्वीर मेषसंक्रमेऽथवा॥ वैशाखस्नान
नियमं ब्राह्मणानामनुज्ञया॥ मधुसूदनमभ्यर्च्य कुर्यात्संकल्पपूर्वकं॥
तत्रः॥ वैशाखं सकलं मासं मेषसंक्रमणे रवेः॥ प्रातः स नियमः स्ना
स्ये प्रीयतां मधुसूदनः॥ मधुहंतुः प्रसादेन ब्राह्मणानामनुग्रहात्॥ नि
र्विघ्नमस्तु ते पुण्यं वैशाखस्नानमन्वहं॥ माधवे मेषगे भानौ मुरारे मधु
सूदन॥ प्रातःस्नानेन मे नाथ फलदो भव पापहन्निति॥ तीर्थविशेषो
पि तत्रैवोक्तः॥ मेषसंक्रमणे भानौ माधवे मासि यत्नतः॥ महानद्यां नदीती
र्थे नदे सरसि निर्झरे॥ देवखाते तथा वाप्यां यथाप्राप्ते जलाशये॥ दीर्घि
काकूपवापीषु नियतात्मा हरिं स्मरन्निति॥ संकल्प्य च तत्तीर्थनाम ग्रा
ह्यं॥ अज्ञाते तु विष्णुतीर्थमिति वदेत्॥ यदा न ज्ञायते नाम तस्य तीर्थस्य

यो द्विजाः॥ तत्रैतत्कारणं कार्यं विस्तुतीर्थमिदं त्वितो॥ तीर्थस्य देवता विष्णुः
सर्वत्रापि न संशय इति तत्रैवोक्तेः॥ तथान्योपि विशेषस्तत्रैव पाद्मे॥ तुलसी
लक्ष्मणोरारख्या तयास्यच्चमधुद्विषं॥ द्विशाखेतु विशेषेण नरो नारायणो न
वेत्॥ माधवं सकलं मासं तुलस्या योर्चयेन्नरः॥ त्रिसंध्यं मधुहंतारं नास्ति
तस्य पुनर्भवः॥ तथात्रातः स्नात्वा विधानेन माधवे माधवप्रियं॥ योश्व
त्थमूलमासिंचेत्तोयेन बहुना सदा॥ कुर्यात्प्रदक्षिणं तं तु सर्वदेवमयं
ततः॥ पितृदेवमनुष्यांश्च तर्पयेत्सचराचरं॥ योश्वत्थमर्चयेद्देवमुदके
न समं ततः॥ कुलानामयुतं तेन तारितं स्यान्न संशयः॥ कंडूयपृष्ठतो गां
तु स्नात्वा पिप्पलतर्पणं॥ स्तुत्वा गोविंदमभ्यर्च्य न दुर्गतिमवाप्नुयात्॥ त
था॥ एकभक्तमथो नक्तमयाचितमतंद्रितः॥ माधवे मासि यः कुर्यात्तद्व्र
तं तस्य सर्वमीप्सितं॥ वैशाखे विधिना स्नानं नदनद्यादिके बहिः॥ हविष्य
मन्नं ब्रह्मचर्यं च भूशय्या नियमास्थितिः॥ व्रतं दानं दमो देवि मधुसूदन
पूजनं॥ अपि जन्मसहस्रोत्थं पापं दहति दारुणं॥ मदनरत्ने स्कांदे॥ प्र

पा कार्या च वैशाखे देवे देया गलंतिका॥ उपानद्युगलं छत्रं सूक्ष्मवासां
सि चंदनं॥ जलपात्राणि देयानि तथा पुष्पगृहाणि च॥ पानकानि च चित्रा
णि द्राक्षारंभाफलान्यपि॥ तिष्ठितत्वो ददाति यो द्विमेषाहो सकुनं बुभ्रया
न्वितान्॥ पितृनुद्दिश्य विप्रेभ्यः सर्वपापैः प्रमुच्यते॥ तथा॥ वैशाखे योम
हेरलं सभोज्यं वै द्विजन्मने॥ ददाति सुरराजेंद्र स याति परमां गतिं॥ एवं
संपूर्णस्नानाशक्तौ त्र्यहं वा स्नायात्॥ तदुक्तं तत्रैव पाद्मे॥ त्रयोदश्यां चतुर्द
श्यां वैशाख्यां वा दिनत्रयं॥ अपि सम्यग्विधानेन नारी वा पुरुषोपि वा॥ प्रातः
स्नातः सनियमः सर्वपापैः प्रमुच्यते॥ यदा तु वैशाखो मलमासो भवति
तदा काम्यानां तत्र समाप्तिर्दर्शनान्निषेधान्मासद्वयं स्नानं तत्क्रियमाणं क
र्त्तव्यं॥ मासोपवासचांद्रायणादि तु मलमास एव समापयेत्॥ तदु
क्तं दीपिकायां॥ नियतत्रिंशद्दिनत्वात्तु तेमास्यारभ्य समापयेत मलिने
मासोपवासप्रभृतं मितिं॥ अत्र दानविशेष उक्तो पराके वा मनुद्धराते॥
गोधान्यमाल्यानि तथा॥ वैशाखे सुरभीणि च देयानि द्विजमुख्येभ्यो माम

भुञ्ज्यादनन्तरं ये॥एवं स्नाते कृते तस्योद्यापनं कार्यं॥तदुक्तं तत्रैव॥माघ
मकं बहिःस्नानं यो हि विमले जले॥एकादश्यां चतुर्दश्यां पौर्णमास्यामथा
पि वा॥उपोष्य नियतो भूत्वा कुर्यादुद्यापनं बुधः॥मंडपं कारयेद्दिव्यं
कलशं तत्र विन्यसेत्॥निष्केण वा तदर्द्धेन तदर्द्धार्द्धेन वा पुनः॥शक्त्या वा कार
येद्देवं सौवर्णं लक्ष्मणान्वितं॥लक्ष्मीयुतं जगन्नाथं पूजयेदासने बुधः॥न
षैर्गंधदानैश्च धूपदीपनैवेद्यसंचयैः॥एवं संपूज्य विधिवद्रात्रौ जागर
णं चरेत्॥प्रातःस्नातेन तन्मंत्रैरथ ग्रहवेद्यां ग्रहान् यजेत्॥होमं कुर्यात्प्रयत्ने
न पायसेन विचक्षणः॥तिलाज्येन यवैर्वापि सर्वं वापि स्वशक्तितः॥अ
ष्टोत्तरसहस्रं वा शतमष्टोत्तरं तु वा॥प्रतद्विष्णुरनेनैव इदं विष्णुरनेन
वा॥व्रतसंपूर्त्तिसिद्ध्यर्थं धेनुमेकां पयस्विनीं॥पादुकोपानहौ छत्रं पुर
वेष्टनं तथा॥शय्यां सोपस्करां दद्याद्दीपिकां दर्पणं तथा॥ब्राह्मणान्भो
जयेत् त्रिंशत् तेभ्यो दद्याच्च दक्षिणां॥कलशान् जलसंपूर्णांस्तेभ्यो दद्याद्य शिव:
वा स्वयं॥एवं कृते माधवस्य उद्यापनविधौ कृते॥फलमाप्नोति सकलं १३

विष्णुसायुज्यमाप्नुयात्॥एतावत्यशक्तौ तत्रैवोक्तं॥वैशाख्यां भोजये
विधिना स्नात्वा भोजयेत् ब्राह्मणान्दश॥दशरं सर्वपापेभ्यो मुच्यते नात्र सं
शय इति॥ ॥वैशाखस्य शुक्लतृतीयाक्षयतृतीयोच्यते॥सा पूर्वाह्णव्या
पिनी ग्राह्या॥दिनद्वयेपि तद्व्याप्तौ परैव॥तदुक्तं निर्णयामृते नारदीये॥
वैशाखस्य शुक्लपक्षे तु तृतीया रोहिणीयुता॥दुर्लभा बुधवारेण सोमेनापि
युता तथा॥रोहिणी बुधयुक्तापि पूर्वविद्धा विवर्जिता॥नत्याक्षतापि
मांधातृभ्यप्येवं हन्ति शुभं तथा॥गौरी विनायकोपेता रोहिणी बुधसंयुता॥
विनापि रोहिणीयोगात्स्वल्पकोटिप्रदा सदेति॥इयं युगादिरपि॥माचो
क्तं रत्नमालायां॥माघपंचदशी राका नभस्यस्य त्रयोदशी॥तृतीया माध
वे शुक्ला नवम्यूर्जे युगादय इति॥यत्तु गौडाः॥माघस्य दर्शे मायां तु घो
रं कलियुगं स्मृतमिति ब्राह्मोक्तेः॥वैशाखमासस्य च या तृतीया नवम्य
सौ कार्तिकशुक्लपक्षे॥नभस्यमासस्य तमिस्रपक्षे त्रयोदशी पंचदशी
च माघे इति॥विष्णुपुराणे चकारेण तमिस्रपक्षानुषंगेपि दर्शा

धात्पूर्णिमास्येव ज्ञेया छंदोगैः इत्यादिकं तु निर्मूलमित्याहुः॥ तन्न। दर्शे
तु माघमासस्य प्रवृत्तं द्वापरं युगमिति नारदीयविष्णुपु॰ विरोधात्॥ एतेन ब्रा
ह्मानुसारात्पूर्णिमायामेव युगादिश्राद्धं वदन् शूलपाणिः परास्तः॥ तेन
कल्पतरोराद्य वचोक्तिर्न तत्त्वं॥ एतेन कार्त्तिके नवमी शुक्ला माघमासे च
पूर्णिमेति नारदीयं व्याख्यातं निर्मूलत्वोक्तिर्नारदीयाज्ञानमूलता॥ अत्र
मांश्राद्धमुक्तं मात्स्ये॥ कृतं श्राद्धं विधानेन मन्वादिषु युगादिषु॥ हायना
नि द्विसाहस्रं पितॄणां तृप्तिदं भवेदिति॥ नारदेपि॥ या मन्वाद्या युगाद्या
स्तिथयस्तासु मानवः॥ स्नात्वा हुत्वा च दत्वा च जप्त्वानंतफलं भवे
दिति॥ श्राद्धे पूर्वाह्णव्यापिनी ग्राह्या॥ पूर्वाह्णे तु सदा कार्याः शुक्ला म
न्वयुगादयः॥ दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिका इति पाद्मोक्तेः॥
कृष्णे द्वितयाह्नि कृष्णे युगादी कवयो विदुः॥ शुक्ले पौर्वाह्णिके ग्राह्ये कृष्णे
चैवापराह्णिका इति हेमाद्रौ नारदीयवचनाच्च॥ दीपिकापि॥ अयो
मन्वादियुगादीकर्मतिथयः पूर्वाह्णिकाः स्फुः सितेतिव ज्ञेया अपराह्णि

शिवः
१५

काद्य वक्ष्ये इति॥ स्मृत्यर्थसारेपि॥ युगादि मन्वादि श्राद्धे शुक्लप
क्षे उदयव्यापिनी तिथिर्ग्राह्या॥ कृष्णपक्षे पराह्णव्यापिनीति दिवोदा
सीये त्रिलेः॥ वैशाखस्य तृतीयां यः पूर्वविद्धां करोति वै॥ हव्यं देवा
न गृह्णंति कव्यं च पितरस्तथेति॥ तेनेयं पूर्वाह्णव्यापिनी॥ दिनद्वये तु
त्वे परैवेति धर्मतत्त्वविदो हेमाद्र्यादयः॥ अनंतभट्टस्तु॥ सर्वैधृतिव्य
तीपाते युगमन्वादयस्तथा॥ स्नात्वा उपवासे स्युर्दानादावेति मात्स्य
तात्स्याह॥ दानादावितिश्राद्धसंग्रहः॥ उपवासस्तु ग्रव दृष्टतो॥ यत्तु मा
र्कंडेयः॥ शुक्लपक्षस्य पूर्वाह्णे श्राद्धं कुर्याद्विचक्षणः॥ कृष्णपक्षापराह्णे तु
रौहिणं तु न लंघयेत्॥ रौहिणो नवमो मुहूर्तः॥ अत्र कृष्णपक्षे युगादिश्रा
द्धं पूर्वाह्णे कार्यमिति शूलपाणिः॥ निर्णयामृतादयस्तु कालादर्शमाध
वमापराह्णिकमुक्तम्॥ एवं मन्वंतरादीनां युगादीनां च निर्णय इत्युक्ते
चाक्षये इत्यादि वचनं विष्णुपूजनादिविषयं॥ श्राद्धे त्वापराह्णिकम
ति व्यवस्थां जगदुः॥ स च पूर्वोक्तानेकवचोविरोधात्पूर्वाह्णे दैविकं
कमित्यादिवचनादेव सिद्धेर्वचनवैयर्थ्याच्च स्वाच्छंद्याद्विलंभसिता

मैत्रमिकल्पे तृतीयायां॥ किंच॥ कालादर्शे किंत्वयं यम्मलावचोऽस्मिन्मा...
नाद्य॥ युगादिश्राद्धस्यामाश्राद्धविकृतित्वेनन्यायतो पराह्णव्याप्ता...
चनेनतस्याबाधात्॥ नांत्यः॥ अनिर्देशाद्वापराह्णप्राप्तेर्वचनवैयर्थ्या
दप्राप्तेशास्त्रमर्थवदितिन्यायात्॥ तेनयदि कालादर्शोक्तेः कथंचित्पूर्वा
णोऽत्र नसमाधिस्तातर्हिन्याय्यप्राप्तह्णपक्षयुगादिविषयत्वेन साव्य
वस्थापनीयेतिदिक्॥ अत्रविशेषोहेमाद्रौ नविष्ये॥ वैशाखस्य शुक्लपक्षे तृ
तीयायां तथैव च॥ गंगातोयेनरः स्नात्वामुच्यते सर्वकिल्बिषैः॥ तस्यां का
र्यो यवैर्होमो यवैर्विष्णुं समर्चयेत्॥ यवान्दद्याद्विजातिभ्यः प्रयतः प्रा
शयेद्यवानिति॥ अत्रदानविशेषस्तत्रैव वनविधइमांप्रक्रम्य॥ उदकुं
भान्सकनकान्सान्नान्सर्वरसैः सह॥ यवगोधूमचणकान्सक्तुदध्यो द
नेतथा॥ ऐक्षिकं सर्वमेवात्र सस्यं दाने प्रशस्यत इति॥ देवीपुराणे॥ तृती
यांतु वैशाखे रोहिण्यक्षे प्रयुज्यतु॥ उदकुंभप्रदानेन शिवलोकेम शिवः
हीयते॥ मंत्रस्तु॥ एषधर्मघटोदत्तो ब्रह्मविष्णुशिवात्मकः॥ अस्यप्रदा १५
नात्सफलंडुपितरोपिपितामहाः॥ गंधोदकतिलैर्मिश्रं सान्नंकुंभंफला

न्वितं॥ पितृभ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठत्विति॥ अत्र च पिंड
रहितं श्राद्धं कुर्यात्॥ अयनद्वितयश्राद्धं विषुवद्वितयं तथा॥ युगा
दिषु च सर्वासु पिंडनिर्वपणादृते इति हेमाद्रौ पुलस्त्यवचनात्॥
अत्र रात्रिभोजने प्रायश्चित्तमुक्तं विधाने॥ रात्रौ भुंक्ते वसरुद्र मन्वादि
५ स्व ५ कुयुगादिषु॥ अरिष्टं चक्ष्विमंत्रंच जपेद्दशन पातकमिति॥ अपरा
र्के यमः॥ सतोपवासः सलिलं येयुगादिदिनेषु चा॥ दास्यंत्यन्नादि स
हितं तेषां लोका मम होदयाद्भानो॥ वैशाखे मध्यमासे मतितत्रैव युगा
दिकार्यो॥ तथा च हेमाद्रौ रुद्रस्यं गः॥ दशहरासु नोत्कर्षस्तु ध्रीपियु
गादिषु॥ उपाकर्मणि चोत्सर्गे चितदिष्टं वृषादितरतो॥ एतद्वैरादिकं
वृषादिसंक्रमे इष्टौ॥ कन्याचंद्रेवृषे रवावित्यादिनासौरमासोक्तेरित्य
र्थः॥ कालादर्शेपि॥ अब्दोदकुंभमन्वादिमहालययुगादिषु तिमला
मासकर्तव्येषु परिगणनात्॥ महालयश्राद्धेन मघात्रयोदश्यायत्र
इतिमाधवः॥ स्मृतिचंद्रिकायांतु मासद्वयेकर्तव्यमित्युक्तं॥ ये

दिकं मासिकं च श्राद्धं चापरपाक्षिकं ॥ मन्वादिकं तैर्थिकं च कुर्यान्नी...
द्वयपि चेति ॥ अपरपक्षः कृष्णपक्षः ॥ नतु महालयः ॥ तस्य तत्रानिषेध
त् ॥ मदनरत्नेपि मरीचिः ॥ प्रतिमासं मृताहे च श्राद्धं यत्प्रतिवत्सरं ॥ म
न्वादौ च युगादौ च तन्मासो रुद्ध्योरपीति प्रतिवत्सरं क्रियमाणं कृष्णा
दिश्राद्धमिति स एव व्याचख्यौ ॥ अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तं म
विधाने ॥ नयस्य द्या वा मंत्रं च शतवारं तदा जपेत् ॥ युगादयो व्यतीपाता न्यूनाः
कुरुते नैव चापिय इति ॥ अत्र समुद्रस्नानं प्रशस्तं ॥ तदुक्तं षष्ठीचंद्रोदये
सौरपुराणे ॥ युगादौ तु नरः स्नात्वा विधिवल्लवणोदधौ ॥ गोसहस्रप्रदा
नस्य कुरुक्षेत्रे फलं हि तत् ॥ नक्तं लभन्ते मर्त्याः सोमिदानस्य चक्रवामि
अ ति ॥ इयं निर्णयः ॥ सर्वयुगादिषु बोद्धव्यः ॥ ॥ इति युगादिनिर्णयः ॥
॥ ॥ इयमेव तृतीया परशुरामजयंती ॥ सा प्रदोषव्यापिनी ग्राह्या शिवः
॥ तदुक्तं नागेवार्चनदीपिकायां स्कांदविष्णुयोः ॥ वैशाखस्य सिते
पक्षे तृतीयायां पुनर्वसौ ॥ निशायाः प्रथमे यामे रामाख्यः समये ह १६

रिः ॥ स्वोच्चगैः षड्ग्रहैर्युक्ते मिथुने राहुसंस्थिते ॥ रेणुकायास्तु यो गर्भादव
वतीर्णो हरिः स्वयं ॥ दिनद्वये तद्व्याप्तौ वैशाखतः समव्याप्तौ च परा ॥ अन्यथा पू
र्वैव ॥ तदुक्तं तत्रैव स्कांदविष्ण्वोः ॥ शुक्ला तृतीया वैशाखे शुद्धा पापादिनद्वये ॥
निशायां पूर्वयामे चेदुत्तरान्यत्र पूर्विकेति ॥ वैशाखशुक्ले सप्तम्यां गंगोत्प
त्तिः ॥ तदुक्तं षष्ठीचंद्रोदये ब्राह्मे ॥ वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी
पुरा ॥ क्रोधात्पीता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात् ॥ तां तत्र पूजयेद्देवीं गं
गां गगनमेखलामिति ॥ अत्र शिष्टाचारान्मध्याह्नव्यापिनी ग्राह्या ॥ दिनद्व
ये तद्व्याप्तावव्याप्तौ वैकदेशव्याप्तौ वा पूर्वा ॥ युग्मवाक्यात् ॥ वैशाखशुक्ले द
शम्यां योगविशेषो हेमाद्रौ ज्योतिःशास्त्रे ॥ पंचाननस्थे गुरुणि मिथुने मेष
रविः स्याच्छादिश शुक्लपक्षे ॥ पाशाभिधाना करजेण युक्ता तिथिर्व्यतीपात इतीर
योगः ॥ अस्मिन् स्नानं होम हिरण्यवस्त्रदानेन सर्वं परिहाय पापं ॥ सुरत्व
मिंद्रत्वमनामयत्वं मर्त्योऽधिपत्यं लभते मनुष्य इति ॥ पंचाननः सिंहः ॥ पा
शाभिधाना तिथिर्दशमी ॥ करजो हस्तः ॥ वैशाखशुक्लचतुर्दशी नृ...

जयंती॥ ॥सा प्रदोषव्यापिनी ग्राह्या॥ तदुक्तं हेमाद्रौ नृसिंहपुराणे॥ वैशा-
खशुक्लपक्षे तु चतुर्दश्यां तथैव च॥ मज्जन्मसंभवं पुण्यव्रतं पापप्रणाशनं॥
वर्षे वर्षे तु कर्तव्यं मम संतुष्टिकारकमिति॥ दिनद्वयेपि तद्व्याप्तावंशतः सा-
मव्याप्तौ च परा॥ विषमव्याप्तौ त्वधिकव्याप्तिमती॥ दिनद्वयेऽव्याप्तौ परा
परदिने गौणकालव्याप्तेः सत्वात्पूर्वदिने च तदभावात्॥ यत्तु ततो मध्याह्न-
वेलायां नद्यादौ विमले जले इत्युपक्रम्य॥ परिधाय ततो वासो व्रतकर्म
समाचरेदिति तत्रैवोक्तं॥ तत्संकल्परूपव्रतोपक्रमविषयं॥ न त्वेतावता
मध्याह्नव्यापिनी ग्राह्येति भ्रमितव्यं॥ पूर्वोक्तवचनविरोधात्॥ वैशाखस्य
नि चतुर्दश्यां सोमवारे[illegible]लर्क्षके॥ अवतारो नृसिंहस्य प्रदोषसमये द्विज
इति तोडरानंदे स्कांदात्॥ कूर्मः सिंहो बौद्धकल्की च सायमिति पूर्वोक्तपु-
राणसमुच्चयवचनाच्च॥ केचित्तु हेमाद्रिवशान्मध्याह्नव्यापिनी माहुः॥ शिवः
इयं यमेव योगविशेषेण तिप्रशस्ता॥ तदुक्तं तत्रैव॥ स्वातीनक्षत्रयोगे च
शनिवारे च मद्व्रतं॥ सिद्धियोगस्य संयोगे वणिजे करणे तथा॥ पुंसां सौ- १९

यो३

भाग्ययोगेन लभ्यते र्वृयेजातः॥ तथा॥ एतैर्योगैर्विनापि स्यान्मद्दिनं पाप-
नाशनं॥ तथा॥ सर्वेषामेव वर्णानामधिकारोऽस्ति मद्व्रते॥ मद्भक्तैस्तु विशे-
षेण कर्तव्यं मत्परायणैः॥ तथा॥ सिंहः स्वर्णमयो देवो मम संतोषकारकः॥ त-
था॥ विज्ञाय मद्दिनं यस्तु लंघयेत्स तु पापकृन्नरः॥ स याति नरकं घोरं यावच्चं-
द्रदिवाकरौ॥ इदं च संयोगपृथक्त्वन्यायेन नित्यं काम्यं च॥ अथात्र विशेषः॥
मध्याह्ने तिलामलकस्नानं कृत्वा॥ नृसिंह देवदेवेश तव जन्मदिने शुभे॥ उ-
पवासं करिष्यामि सर्वभोगविवर्जितः इति मंत्रेण संकल्पं कृत्वाचार्यं वृत्वा
त्र सायंकाले हैमी तु तन्मन्मूर्तिः स्थाप्या लक्ष्म्यास्तथैव च॥ पलेन वा तदर्द्धेन
तदर्द्धार्द्धेन वा पुनः॥ यथाशक्ति तथा कुर्याद्वित्तशाठ्यविवर्जितः इत्युक्तेः॥
नृसिंहमूर्तिं शक्त्या कृत्वा सुवर्णसिंहं च कलशोपरि संपूज्य रात्रौ जागरं
कृत्वा प्रातः पुनः संपूज्य॥ नृसिंहाच्युत देवेश लक्ष्मीकांत जगत्पते॥ अ-
नेनार्चाप्रदानेन सफलाः स्युर्मनोरथाः॥ इत्याचार्याय दत्वा॥ मद्वंशे ये
नरा जाता ये जनिष्यंति चापरे॥ तांस्त्वमुद्धर देवेश दुःसहाद्भवसागरात्॥

पातकार्णवमग्नस्य व्याधिदुःखांबुवारिभिः ॥ नीचैस्तु परिभूतस्य महादुःख-
गतस्य मे ॥ करावलंबनं देहि शेषशायिन् जगत्पते ॥ श्रीनृसिंह रमाकांत
भक्तानां भयनाशन ॥ क्षीरांबुधिनिवासिंस्त्वं चक्रपाणे जनार्दन ॥ व्रतेनानेन
न देवेश भुक्तिमुक्तिप्रदो भव ॥ इति प्रार्थयेदिति संक्षेपः ॥ वैशाखे पौर्णमास्यां वि-
शेषः अपरार्के जाबालिः ॥ एतान्यमुद्दिश्य च वैशाख्यां च विशेषतः ॥ निर्दिश्य
धर्मराजाय गोदानफलमाप्नुयात् ॥ सुवर्णतिलयुक्तैस्तु ब्राह्मणान्सप्त पंच
वा ॥ तर्पयेदुदपात्रैस्तु ब्रह्महत्यां व्यपोहति ॥ ति ॥ कुंभदानमंत्रस्तु हयत्वती-
याप्रकरणे उक्तः ॥ भविष्येपि ॥ वैशाखी कार्तिकी माघी तिथयोतीवपूजिताः ॥
स्नानदानविहीनास्ता न नेयाः पांडुनंदन ॥ अत्र कृष्णाजिनदानं कार्यं ॥ तथा
च विष्णुः ॥ कृष्णाजिने तिलान्कृत्वा हिरण्यं मधुसर्पिषी ॥ ददाति यस्तु वि-
प्राय सर्वं तरति दुष्कृतमिति ॥ ॥छ॥ ॥इति श्रीनारायणभट्टसू-
नुरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिंधौ
वैशाखमासः संपूर्णः ॥ ॥श्री॥ ॥वृषसंक्रांतौ पूर्वाः षोडश घटिकाः

शिवः
१८

पुण्यकालः ॥ रात्रौ संक्रमे सति भागे वोक्तं ॥ ज्येष्ठशुक्लतृतीयायां रंभाव्रतमुक्तं माधवीये भवि-
ष्ये ॥ भद्रे कुरुष्व यत्नेन रंभाख्यं व्रतमुत्तमं ॥ ज्येष्ठशुक्लतृतीयायां स्नाता नियमतत्परेति ॥ सा
र्वविद्धा ग्राह्या ॥ हस्तान्नपात्यारंभा सा वित्री वटपैतृकी ॥ कृष्णाष्टमी च भूता च कर्तव्या संमु-
खी तिथिरिति स्कांदोक्तेः ॥ ज्येष्ठशुक्लदशमी दशहरा ॥ तदुक्तं हेमाद्रौ वाराहे ॥ ज्येष्ठमासि सिते
हनि ॥ अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा ॥ हरते दश पापानि तस्माद्दशहरा स्मृ- ते
ति ॥ स्कांदे तु दशयोगा उक्ताः ॥ यथा ॥ ज्येष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ॥ व्यतीपाते ग-
रानंदे कन्याचंद्रे वृषे रवौ ॥ दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते इति ॥ अत्र बुधभौमयोः
कल्पभेदेन व्यवस्था ॥ इयं च यद्वयोगबाहुल्यं सैव ग्राह्या ॥ योगाधिक्ये फलाधिक्यात् ॥
ज्येष्ठे मलमासे सति तत्रैव दशहरा कार्या ॥ न तु शुद्धे ॥ दशहरासु नोत्कर्षश्चतुर्ष्वपि युगा-
दिषु इति हेमाद्रौ ऋष्यशृंगोक्तेः ॥ तथा स्कांदे ॥ यां कांचित्सरितं प्राप्य दद्याद्दर्भतिलोदकं ॥ मुच्यते द- भ्य
शभिः पापैः समहापातकोपमैः ॥ अत्र विशेषः काशीखंडे ॥ ज्येष्ठे मासि सिते पक्षे प्राप्य प्र-
तिपदं तिथिं ॥ दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः ॥ एवं सर्वासु तिथिषु क्रमेण स्नायी
नरोत्तमः ॥ आशुक्लपक्षदशमीं प्रतिजन्माघमुक्तजैस्तथा ॥ लिंगे दशाश्वमेधे
१० ज्येष्ठे मासि सिते पक्षे दशमी बुधसंयुता ॥ हरते दश पापानि तस्माद्दशहरा स्मृ
वाराहेपि ॥ दशमी शुक्लपक्षेत्र दल १०

दशहरातिथौ। दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशयः। तथा च विष्णो
काशीखंडयोः। निशायां जागरं कृत्वा समुपोष्य च नक्तितः। पुष्पैर्गंधैश्च नैवेद्यैः फ
दशसंख्यया तथा दीपैश्च तांबूलैः पूजयेच्छ्रद्धयान्वितः। स्नात्वा भक्त्यानुज्ञां कृ
दशाङ्कत्वा विधानतः। दशप्रसृतितिलान् घृतमिश्रान् जले सक्तुपिंडान् गुडपि
डान् दद्याच्च दशसंख्यया। ततो गंगातटे रम्ये हेम्ना रूप्येण वा तथा। गंगायाः प्रतिमां
कृत्वा वक्ष्यमाणस्वरूपिणीं। संस्थाप्य पूजयेद्देवीं तदलाभे मृदापि च। अपतत्राप्य
शक्तश्चेच्चित्रवितिष्टेन वै भुवि। वक्ष्यमाणेन मंत्रेण कुर्यात्तत्पूजां विशेषतः। नारायणं
महेशं च ब्रह्माणं भास्करं तथा। भगीरथं च नृपतिं हिमवंतं नगेश्वरं। गंधपुष्पादि
भिः सम्यक् पूजयित्वा शक्तितः पूजयेत्। दशप्रस्थतिलान् दद्याद्दश विप्रेभ्य एव च। दश
प्रस्थान् यवान् दद्याद्दशसंख्या गवीस्तथा। प्रस्थाः षोडशपलानि। पलं तु मुष्टिमात्र
पलं स्मृतमिति महार्णवे उक्तं। मत्स्यकच्छपमंडूकमकरादि जलेचरान्। कारयित्वा
यथाशक्ति स्वर्णेन रजतेन वा। तदलाभे पिष्टमयान् अभ्यर्च्य कुसुमादिभिः। गंगा २९
यां प्रक्षिपेद्राजन् दीपांश्चैव प्रवाहयेत्। पुष्पाद्यैः पूजयेद्गंगां मंत्रेणानेन नक्तितः।

ॐ नमः शिवायै नारायण्यै दशहरायै गंगायै नमो नमः। इति मंत्रं तु यो मर्त्यो दि
ने तस्मिन्दिवानिशं। जपेत्पंचसहस्राणि दशधर्मफलं लभेत्। काशीखंडे तु नो
मंत्र उक्तः। नमः शिवायै प्रथमं नारायण्यै पदं ततः। दशहरायै पदमिति गंगायै मं
त्र एष वै। स्वाहांतः प्रणवादिश्च नवदिशाक्षरो मनुः। पूजादानं जपो होमश्चानेनै
व मनुना स्मृत इति। अत्र गंगास्तोत्रपाठमपि दशवारं कुर्यात्। तदुक्तं नविष्णो। तस्यां
दशम्यामेतच्च स्तोत्रं गंगाजले स्थितः। यः पठेद्दशकृत्वस्तु दरिद्रो वापि चाक्षमः। सो
पि तत्फलमाप्नोति गंगां संपूज्य यत्नतः इति। स्तोत्रं च दिनर प्रतिपदादि दशमी पर्यं
तं दिनवृद्धिसंख्यया पठनीयमिति शिष्टाः। अत्र सर्वोपि विस्तरः स्तोत्रादिश्च नष्टकृतात्रि
स्थलीसेतौ रवधेयः। विस्तरभीतेस्तन्न लिख्यते। एवं कुर्वतः फलमुक्तं काशीखंडे। एवं
कृत्वा विधानेन वित्तशाठ्यविवर्जितः। उपवासी वक्ष्यमाणैर्दशपापैः प्रमुच्यते। सर्वा
न्कामानवाप्नोति प्रेत्य ब्रह्मणि लीयते। इति च। अस्यां सेतुबंधरामेश्वरस्य प्रतिष्ठा दिन
त्वाद्विशेषेण पूजा कार्या। तदुक्तं स्कांदे सेतुमाहात्म्ये। ज्येष्ठमासि सिते पक्षे दशम्यां बुध
हस्तयोः। गरानंदे व्यतीपाते कन्याचंद्रे वृषे रवौ। दशयोगे सेतुमध्ये लिंगरूप

रामो वैस्तापयामास शैवं लिंगमनुत्तममिति ॥ ॥इति दशहरा ॥ ॥
शुक्लैकादशी निर्जला ॥ ॥तत्र निर्जलमुपोष्य विप्रेभ्यो जलकुंभान्दद्यादि
ति निर्णयामृते उक्तं ॥ मदनरत्ने स्कांदेपि ॥ ज्येष्ठे मासि नृपश्रेष्ठ यास्तु शुक्लैकाद
शी शुभा ॥ निर्जलं समुपोष्यात्र जलकुंभान्सशर्करान् ॥ प्रदाय विप्रमुख्येभ्यो
मोदते विष्णुसंनिधौ ॥ ज्येष्ठपौर्णमास्यां सावित्रीव्रतं ॥ तदुक्तं स्कांदे हरिविष
यो ॥ ज्येष्ठे मासि सिते पक्षे द्वादश्यां रजनीमुखे इत्युपक्रम्य ॥ व्रतं त्रिरात्र
मुद्दिश्य दिवारात्रिं स्थिरा भवेदिति ॥ अंते प्य संस्कृतं ॥ ज्येष्ठमासि सिते पक्षे
पूर्णिमायां तथा सैव व्रतं ॥ चीर्णं पुरा महाराज्ञ्या कथितं ते मया नृपेति ॥ दा
क्षिणात्यास्त्वेतदेवाद्रियंते ॥ एतच्चामावास्यायामप्युक्तं निर्णयामृते भवि
ष्ये ॥ अमायां च तथा ज्येष्ठे वटमूले महासती ॥ त्रिरात्रोपोषिता नारी विधि
नानेन पूजयेत् ॥ मदनरत्ने त्विदं वाक्यं पंचदश्यां तथा ज्येष्ठे इति पठित्वा शिवः
ज्येष्ठपौर्णमास्यामुक्तं ॥ तथा ॥ अशक्तौ तु त्रयोदश्यां नक्तं कुर्याज्जितेंद्रिया ॥
अयाचितं चतुर्दश्याममायां समुपोषणमिति ॥ तत्तु पाश्चात्या आद्रियंते ॥ २०

हेमाद्रिमतमयोद्योतादिषु तु भाद्रपदपौर्णिमायामुक्तं ॥ तत्तु नेदानीं प्रच
रति ॥ गौडास्तु ॥ मेषे वा वृषभे वापि सावित्रीं तां विनिर्दिशेत् ॥ ज्येष्ठकृष्ण
चतुर्दश्यां सावित्रीमर्चयंति ताः ॥ वटमूले सोपवासा न वैधव्यमाप्नु
युरिति पराशरोक्तेः ॥ चतुर्दश्यां प्रदोषव्रतं ॥ दिनद्वये तद्व्याप्तौ परैवेत्याहुः ॥
तन्निर्मूलं ॥ अत्र पूर्णिमामावास्ये पूर्वविद्धे ग्राह्ये ॥ भूतविद्धा न कर्तव्या अमा
वास्या च पूर्णिमा ॥ वर्जयित्वा नरश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्ता
त् ॥ स्कांदेपि ॥ भूतविद्धा सिनीवाली न तु तत्र व्रतं चरेत् ॥ वर्जयित्वा तु सावि
त्रीव्रतं तु शिखिवाहनेति ॥ यदा त्वष्टादशघटिकास्तदा परा ग्राह्या ॥ एवं वि चतुर्दशी
द्धे वसावित्रीव्रते पंचदशी तिथिः ॥ भूतसावित्रीव्रते पंचदशी तिथिः ॥ ना
ष्टादश भूतस्य स्यात्सैव तत्र परेहनि ॥ तन्माधवः ॥ वस्तुतस्तु भूतोष्टाद
शनाडीभिर्दूषयेत्परां तिथिमित्यस्य व्रतांतरे सावकाशत्वात् ॥ विशे
षतः प्रवृत्तैरेवं विद्धाविधायकवचनेन तस्य बाधादष्टादशनाडीवे
धेपि पूर्वैवेत्ययं पंथाः साधुः ॥ अत्र पौर्णमास्यनुरोधेनैव यथा त्रिरात्रं
मदनरत्ने ब्रह्मवैवर्तेपि ॥ प्रतिपत्संयुता भूतसावित्री वटपूर्णिमा ॥ न
दशमी चैव नोपोष्याः परसंयुताः ॥ ६६

पञ्चदशीनिर्वर्तितया त्रयोदश्यादि ग्राह्यं॥ तस्याः प्रधानत्वात्॥ अयं निर्ण
यामपि ज्ञेयः॥ पारणं तु पौर्णमास्यांते कार्यं॥ अत्र स्त्रीव्रते तु विशेषः पर्ण
नाषायामुक्तः॥ अत्र विशेषो भविष्ये। गृहीत्वा वालुकां पात्रे प्रस्थमात्रं तु धा
षिरा॥ ततो वंशमये पात्रे वस्त्रयुग्मेन वेष्टिते॥ सावित्रीप्रतिमां कुर्यात्सौव
र्णीं वा विमृन्मयीं॥ सार्द्धं सत्यवता साध्वी फलनैवेद्यदीपकैः॥ रजन्या कंठसू
त्रैश्च पुष्पैः कुंकुमकेसरैः॥ पूजयेदिति शेषः॥ रजनी हरिद्रा कंठसूत्रं सौ
भाग्यतंतुः॥ सावित्र्याख्यानकं चापि वाचयीत द्विजोत्तमं॥ रात्रौ जागर
स्वाद णं प्रभाते विमले ततः॥ तामपि ब्राह्मणे दत्वा प्रणिपत्य क्षमापयेत्॥ मंत्र
स्तु॥ सावित्रीयं मया दत्ता सहिरण्या महासती॥ ब्रह्मणः प्रीणनार्थाय ब्रा
ह्मण प्रतिगृह्यतां॥ अनेनानेन राजेंद्र वैधव्यं नाप्नुयात्क्वचिदिति॥ ज्येष्ठ
पौर्णमास्यां विशेष आदित्यपुराणे॥ ज्येष्ठमासि तिलान्दद्यात्पौर्णमास्यां
विशेषतः॥ अश्वमेधस्य यत्पुण्यं तत्प्राप्नोति न संशयः॥ विष्णुरपि॥ ज्येष्ठी शिवः
ज्येष्ठायुता चेत्स्यात्तस्यां छत्रोपानत्प्रदानेन नरो नराधिपत्यमाप्नोतीति २१

हेमाद्रौ ज्योतिषे। एरंडगुरुः शाली चैव प्राजापत्ये रविस्तथा। पूर्णिमा ज्येष्ठमासस्य महाज्ये
ष्ठी प्रकीर्तिता॥ इयं मन्वादिरपि। सा पौर्णमासी वाह्निकी स्यात्॥ विशेषस्तु चैत्रे उक्तः॥ त
थापरार्के वामनपुराणोक्तं उदकुंभांबुदानं च तालवृंतं सचंदनं। त्रिविक्रमस्य प्रीत्यर्थं
दातव्यं ज्येष्ठमासि तु॥ इति॥ ॥इति श्रीनारायणभट्टसूनुरामकृष्णभट्टात्मजदि
नकरभट्टानुजकमलाकरभट्टकृते निर्णयसिंधौ ज्येष्ठमासः॥ ॥श्री॥ ॥
मिथुनसंक्रांतौ पराः षोडशघटिकाः पुण्यकालः। रात्रौ तु प्रागेवोक्तं। आषाढशुक्लद्वि
द्वादश्यां तीयायां रथोत्सवः। तदुक्तं तिथितत्वे स्कांदे। आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता। द्वादशी
तस्यां रथे समारोप्य रामं मां भद्रया सह॥ यात्रोत्सवं प्रवर्त्याथ प्रीणयेत्द्विजान्बहून्वा
तथा। ऋक्षाभावे तिथौ कार्या सा सदा प्रीतये मम। आषाढशुक्लदशमी पौर्णमासी च
मन्वादिः॥ सा च पूर्वाह्णव्यापिनीति प्रागुक्तं। आषाढशुक्लद्वादश्यामनुराधायोगर
हितायां पारणं कुर्यात्। तदुक्तं भविष्ये। आभाकासितपक्षेषु मैत्रश्रवणरेवतीसंग
मे न हि भोक्तव्यं द्वादश द्वादशीर्हरेत्॥ अस्यार्थः॥ आषाढभाद्रपदकार्तिकशुक्लप
द्वादशीष्वनुराधाश्रवणरेवतीयोगे पारणं न कुर्यादिति। अत्र यद्यपि एतावदेवो
ऽनुराधाप्रथमपाद एव वर्ज्यः। तदुक्तं विष्णुधर्मे मैत्राद्यपादे स्वपिति हरि

क्रांत्यपादे प्रतिबोधमेति। कृतेश्च मध्ये परिवर्त्तमेति सुप्तिप्रबोधपरिवर्त्तनमे
र्य्यमिति। वस्तुतस्तु पूर्ववचनमिदं चानिर्मूलमेव। अत्रैव विष्णुशयनोत्सवः
हेमाद्रौ ब्राह्मे एकादश्यां तु शुक्लायामाषाढे भगवान्हरिः। भुजंगशयने शेते क्षीरार्ण
वजले सदेति। कल्पतरौ यमः॥ क्षीराब्धौ शेषपर्यंके आषाढ्यां संविशेद्धरिः। निद्रां
त्यजति कार्त्तिक्यां तयोस्तं पूजयेत्सदा। ब्रह्महत्यादिकं पापं क्षिप्रमेव व्यपोहति॥ हि
सात्मकैस्तु किं तस्य यज्ञैः कार्यं महात्मनः। प्रस्वापे च प्रबोधे च पूजितो येन केशवः॥
गौडरानंदेपि स्कांदे। आषाढशुक्लैकादश्यां कुर्यात्स्वप्नमहोत्सवं॥ अयं द्वादश्यां न
फलकः॥ या नाकाद्येषु मासेषु मिथुने माधवस्य च। द्वादश्यां शुक्लपक्षे च सुप्रस्वापा स्वापा
वर्त्तनोत्सवा इति भविष्योक्तेः॥ द्वादश्यां संधिसमये नक्षत्राणाममंभवे। या नाका
सितपक्षेषु शयनावर्त्तनादिकमिति वाराहोक्तेः। स्वापादयो द्वादश्यामित्यत्रापि पारणा शि॰ वः
होमान्तं विवक्षितं। पारणाहे पूर्वरात्रे घंटादीन्वादयन्मुकुंदिति रामार्चनचंद्रिको
क्तेः॥ अत्रैकादशीद्वादश्योर्दैनंदिनेदेन व्यवस्था। इदं च मलमासे न कार्यं। ईशान २२
स्य बलिर्विष्णोः शयनं परिवर्त्तनमिति काठकानादर्शे निषेधात्। यदपि एकादश्यां तु

नुराधा या संक्रांतो कर्कटस्य वा॥ आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रत
क्रियामिति हेमाद्रौ ब्रह्मवैवर्त्ते तदपि मलमासे सति द्रष्टव्यं॥ मिथुनस्थोर्य
राजान्तुरमावास्याद्वयं स्पृशेत्॥ द्विराषाढः स विज्ञेयो विष्णुश्च स्वपिति कर्कटे
इति तत्रैव मोहचूडोत्तरोक्तेः॥ अत्र च चातुर्मास्यव्रतारंभ उक्तो भारते॥ आ
५ एकादश्या षाढे तु सिते पक्षे समुपोषितः॥ चातुर्मास्यव्रतं कुर्याद्यत्किंचिन्नियतो नर
इति॥ अस्य नित्यत्वं तत्रैवोक्तं॥ वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः॥
व्रतेन नो चेदाप्नोति किल्बिषं वत्सरोद्भवं॥ असंभवे तुलार्केपि कर्त्तव्यं तत्प्र
यत्नत इति॥ अस्यारंभस्तु कर्कसंक्रांतावपि कार्यः॥ नशेशर्वं नमो पंचद
शुक्लणुवोर्न वा तिथेः॥ खंडत्वाच्च तत्र चातुर्मास्यविधौ नर इति
मात्स्ये कूर्मगोक्तेः॥ इदं च द्वितीयारंभविषयं॥ प्रथमारंभस्तु न भवत्य
वा॥ आशौचमध्येपि द्वितीयाद्यारंभो भवति॥ अस्य च विशेषश्चैवापि या
स्त्री यदि वा तु मर्त्यः॥ व्रतमेतन्नरः सत्यं मुच्यते सर्वपातकैरिति
वार्चनदीपिकायां स्कांदोक्तेः॥ आरब्धे सूतकं न स्यादनारब्धे तु सूतकं

तिविष्णुवचनात्॥ यत्तु॥ असंक्रांतं यदा मासं दैवे पित्र्ये च कर्म [च]
मलमासमशौचं च वर्जयेन्मतिमान्नर इति हेमाद्रौ चातुर्मास्ये प्रक[रणे]
भविष्यवचनं तत्सूषाख्यकर्मत्रणमंत्रवदसंबद्धमध्येपठितमिति तन्न
अन्यथापि अस्य ष्टवैकिस्य विवाहादेश्च चातुर्मास्यव्रतेकः प्रसंगः॥ प्र
करणनिवेशोपि वा प्रथमारंभविषयं ज्ञेयं॥ केचित्तु॥ प्रतिवर्षं चातुर्मा
स्यव्रतप्रयोगाणां भिन्नत्वादाशौचादिपाते द्वितीयादिप्रयोगानन्तरवत्यैवे
त्याहुः॥ तन्न॥ प्रतिवर्षं च यः कुर्याद्देवं संस्मरन् हरिं॥ देहांते तिष्ठेदीह वै
न विमानेनार्कवर्चसा॥ मोदते विष्णुलोके सौ यावदाभूतसंप्लवमिति हे
माद्रौ भविष्यवचनादित्यास्तां विस्तरः॥ इदं च शिवभक्तादिभिः कार्यं॥ रपि५
शिवे वाथ विष्णौ वा संयुक्तो भानौ वा गणनायके॥ इत्वाव्रतस्य नियमं यथोक्तके
फलभाग्भवेदिति भविष्योत्तरात्॥ व्रतग्रहणप्रकारस्तु हेमाद्रौ भवि
ष्ये॥ महापूजां ततः कुर्याद्देवदेवस्य चक्रिणः॥ जातीकुसुममालाभि शिवः
र्मंत्रेणानेन पूजयेत्॥ सुप्ते त्वयि जगन्नाथ जगत्सुप्तं भवेदिदं॥ विबु २३

४ गृहीतेस्मिन्व्रते देव पंचत्वं यदि मे भवेत्॥ तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन॥

द्धे च विबुध्येत प्रसन्नो मे भवाच्युत॥ एवं तां प्रतिमां विष्णोः पूजयित्वा स्वयं न
रः॥ प्रार्थयेताग्रतो विष्णोः कृतांजलिपुटस्तथा॥ चतुरो वार्षिकान्मासान्देव
स्योत्थापनावधि॥ इमं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत॥ इदं व्रतं मया दे
व गृहीतं पुरतस्तव॥ निर्विघ्नां सिद्धिमायातु प्रसादात्तव केशव॥ गृहीतेस्मि
न्व्रते देव यद्यपूर्णे म्रियेत्यहं॥ तन्मे भवतु संपूर्णं प्रसादाज्जनार्दनेति॥ त्व
तत्र भागवतार्चनदीपिकायां नृसिंहपरिचर्यायां च विष्णुः॥ श्रावणे वर्जयेच्छाकं
दधि भाद्रपदे तथा॥ दुग्धमाश्वयुजे मासि कार्त्तिके द्विदलं त्यजेदिति॥ स्कां
दे पि चातुर्मास्यकल्पे॥ चत्वार्येतानि नित्यानि चतुराश्रमवर्णिनां॥ प्रथमे
मासि कर्तव्यं नित्यं शाकव्रतं नरैः॥ द्वितीये मासि कर्तव्यं दधिव्रतमनुत्तमं॥
पयोव्रतं तृतीये च चतुर्थे पि निशामय॥ द्विदलं बहुबीजं च वृंताकं च विव
र्जयेत्॥ नित्यान्येतानि विप्रेंद्र व्रतान्याहुर्मनीषिणः॥ जंबीरं राजमाष[ं]
च मूलकं रक्तमूलकं॥ कूष्मांडं चेक्षुदंडं च चातुर्मास्ये त्यजेद्बुधः॥ तथा
शोषाद्धरीधात्रीकूष्मांडं नितीली त्यजेत्॥ जीर्णधात्रीफलं श्राद्धे कर्म

द्वा२

कायशोधनमिति॥ तीर्थसौख्ये स्कांदे॥ वार्षिकांश्चतुरोमासान्प्रसुप्ते मधु-
सूदने॥ मंचखट्वादिशयनं वर्जयेद्भक्तिमान्नरः॥ अनृतौ वर्जयेज्जायां मांसं म-
धु परोदनं॥ पटोलं मूलकं चैव वृंताकं च न भक्षयेत्॥ अन्नं त्यर्यं वर्जयेद्गु-
डान्मसूरं सितसर्षपं॥ राजमाषान्कुलत्थांश्च ऋक्षधान्यं च संत्यजेत्॥ शा-
कं दधिपयोमासान्नत्राहवणादिषु संत्यजेत्॥ अत्र त्यजेदिति वर्जनसंकल्प
रूपः पर्युदासो ज्ञेयः॥ अतो पक्षमात्॥ अत्र केचित्शाकाख्यं पत्रशुष्यादीव्य
मरकोशस्यशाक्यते शिडमने नेति शाक इति क्षीरस्वामिना व्याख्यानात्॥
व्यंजनमात्रस्य निषेधमाचक्षते॥ अन्येतु शाकशब्दस्य पत्रादिश्चदशविध
शाके योगरूढत्वात्योगाच्चरूढेर्बलीयस्त्वात्त्रपादीनामपित्यागापत्तेश्च
तन्मात्या चक्षते॥ तेन मूलपत्रकरीराग्रफलकांडाधिरूढकाः॥ त्वक्पुष्पंक
वचं चेति शाकं दशविधं स्मृतमिति क्षीरस्वामिनोक्तस्य शाकस्यात्निषेध शि०व०
इति॥ अधिरूढकं अंकुरः॥ वस्तुतस्तु तत्कालोद्भवानां शाकानां वर्जनीयाः
प्रयत्नतः॥ बहुबीजमबीजं च विकारि च विवर्जयेदिति तद्विषयवचना २४

त्तत्कालोद्भवानां दशविधशाकानां निषेधः॥ अत्र तत्कालोद्भवजातीयत्वे
विवक्षितं॥ तेनातपादिशोषितानां वर्षांतरोद्भवानामपि निषेधः॥ अत्र
तत्कालोद्भवत्वमात्रं विवक्षितं नतु तन्मात्रकालोद्भवत्वं गौरवात्॥ तेना
न्यकालोद्भवानां तत्कालोद्भवानां च बिंबादीनां निषेधः॥ अत्र न तत्कालो
द्भवा इति वीप्सावशात् स्वस्वकालोद्भवानां सर्वेषां निषेध इति निष्कर्षः॥ बहु
बीजमित्यनेकबीजमिति केचित्॥ इतरावयवापेक्षया बीजावयवायत्र
बहवस्तदित्यन्ये॥ अबीजं कदल्यादि॥ वस्तुतस्तु दंमहानिबंधे छन्ना वा
निर्मलमेव॥ आचारप्रदीपे॥ वृंताकं च कलिंगं च बिल्वोडुंबरं त्रिंस
धा॥ उदरे यस्य जीर्यंते तस्य दूरतरो हरिः॥ तथा पराके देवलः॥ आ म च
र्ये तथा शौचं सत्यमामिषवर्जनं॥ व्रतेष्वेतानि चत्वारि वरिष्ठानीति नि
श्चयः॥ आमिषमाह चौखान्निरामाचन्द्रचंद्रिकायां पाद्मे॥ प्राण्यंग चूर्णं च
मांडुजं बीरं बीजं शरकं॥ अथ स्मृतौ धर्ममापाद्य यदि लोभान्निवेदितं
धर्मं मन्नं मसूरं च मांसं चेत्यष्टधामिषं॥ रुच्यं तत्र देशास्त्र मांसमुमे

वर्जयेत्॥ पाद्मे कार्तिकमाहात्म्ये॥ गोछागीमहिषीदुग्धादन्यद्दुग्धा[illegible]
मिषं॥ धान्ये मसूरिका प्रोक्ता अन्नं पर्युषितं तथा॥ द्विजक्रीतरसाः सर्वे
वणं भूमिजं तथा॥ ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितं॥ आत्मार्थ
पाचितं चान्नमामिषं तत्स्मृतं बुधैः॥ तथा निष्पावान् राजमाषांश्च म
सूरं संधितानि च॥ वृंताकं चककलिंगं च स्त्रुसेदं नैव वर्जयेत्॥ संधिता
नि लवणशाकादीनि॥ तत्रैव विष्णुधर्मे॥ चदर्द्र पीहमाषे सुहविष्याशी
नपापनाक्॥ हविष्याणि च यवीचंद्रो दयेन विष्ये॥ हैमंतिकं सिता स्वि
न्नं धान्यं मुद्गा यवास्तिलाः॥ कलायकंगुनीवारा वास्तूकं हिलमोचिका॥
षष्ठिका कालशाकं च मूलकं केमुकेतरत्॥ कंदः सैंधवसामुद्रे गव्ये च द
धिसर्पिषी॥ पयोनुद्धृतसारं च पनसाम्रहरीतकी॥ पिप्पलीजीरकं चैव
नागरंगं च तिंतिली॥ कदलीलवलीधात्रीफलान्यगुडमैक्षवं॥ अतैलप
क्वं मुनयो हविष्यान्नं प्रचक्षते॥ भृंगिडुराले पि॥ व्रीहिषष्ठिकमुद्गा
श्च कलायं सलिलं पयः॥ श्यामाकाश्चैव नीवारा गोधूमाश्च व्रते हिताः॥ शिवः २५

म४ कूष्मांडालाबुवार्ताकपालक्यौ त्यजेत्॥ मदनरत्ने प्येवं॥ सितमस्विन्नमन्नं पर

कं धान्यं च तंडुलाः॥ केमुकं केमुनाम इति प्राच्येषु प्रसिद्धः कंदः॥ कूलायस्तु सतानकं घोत्य
मरः॥ बदुरीति प्रसिद्धं धान्यं॥ अगस्त्यसंहितायां॥ हैमंताद्यस्तुनारिकेरफलं चैव कदली
नवनीतया॥ आम्रमातुलंगं चैव पनसं च हरीतकीं॥ व्रतांतरप्रशस्तं च हविष्यं मन्वते बुधाः॥
अन्यान्यपि व्रतान्यत्तानि हेमाद्रौ भविष्ये॥ स्त्रीवानरो वा मद्यकोधर्मार्थं सुदृढव्रतः॥ गृहीया
न्नियमानेतान्दंतधावनपूर्विकान्॥ तेषां फलानि वक्ष्यामि तत्कर्तृणां पृथक्॥ मधुरस्वरो भ
वेद्राजा पुरुषो गुडवर्जनात्॥ तैलस्य वर्जनाद्राजन्सुंदरांगः प्रजायते॥ योगाभ्यासी भवेद्यस्तु
स ब्रह्मपदमाप्नुयात्॥ तांबूलवर्जनाद्भोगी रक्तकंठश्च जायते॥ घृतत्यागात्सुलावण्यः सर्वस्नि
ग्धतनुर्भवेत्॥ शाकपत्राशनाद्रोगी अपक्वाशो मलो भवेत्॥ भूमौ प्रस्तरशायी च विप्रो नु नित
तो भवेत्॥ एकांतरोपवासेन ब्रह्मलोके महीयते॥ धारणान्नखरोमाणां गंगास्नानफलं भवे[illegible]
मौनव्रती भवेद्यस्तु तस्याज्ञा स्खलिता न वै॥ भूमौ भुंक्ते सदा यस्तु स पृथिव्याः पतिर्भवे[illegible]
दधिदुग्धातं यस्तु करोति स्वतिपाठकः॥ हंसयुक्तविमानेन स च विष्णुपुरं व्रजेत्॥ अ[illegible]
प्राश्नाति पुत्रान् धर्मान्नशेषतः॥ षष्ठान्नकालभोक्तायः कल्पस्थायी भवेद्दिवि॥ पर्णे[illegible]
भुंक्ते कुरुक्षेत्रफलं लभेत॥ गुडवर्जी निरोदधान्न्यूनं तांम्रभाजने संहिरण्यं नरश्च[illegible]

प्ययं विधिः॥ सुप्ते देवे तु ये विष्णोः शिवस्यांगणमर्चयेत्॥ पंचवर्णैस्तु ये नित्यं स्व[…]
नकेस्तथा॥ स याति रुद्रलोकं हि गाणपत्यमवाप्नुयात्॥ अथैषां समाप्तौ कार्त्तिक्यां दा[…]
नकेवस्त्रयुग्मं॥ एकांतरोपवासे गोः॥ त्रिरात्रे शय्या॥ षष्ठकालभोजने गोः॥ व्रीहि[…]
त्यागे हेमव्रीह्यादि॥ कृच्छ्रे गोयुग्मं॥ शाकाशने गोः॥ पयोव्रते च॥ मधुदधिघृतव्रतेषु वासो गो॥
ब्रह्मचर्ये स्वर्णमूर्त्तिः॥ तांबूलव्रते वासोयुग्मं॥ मौने घृतकुंभो वस्त्रयुग्मं घंटा च॥ दिवाग्रे रंगमा
लिकाकरणे धेनुर्हेमधुपमं च॥ दीपव्रते दीपिका वासोयुगं च॥ भूमिभोजन पर्णभोजने च
कांस्यपात्रं गोश्च॥ चतुष्पथदीपे गोग्रासे च गोवृषो॥ प्रदक्षिणाव्रते वस्त्रं॥ अनुक्तेषु स्वर्णं गोश्चे
त्यादि हेमाद्रौ ज्ञेयं॥ तथा नागवार्चनदीपिकायां पाद्मे॥ शयनी बोधिनी मध्ये या नी दूर्वा पिम(?)
र्गके॥ त्वंगराजे न देवांस्तु नार्चयीत कदाचन॥ हेमाद्रौ पाद्मे॥ आषाढ्यादि चतुर्मासिनं त्वं
गं वर्जयेन्नरः॥ समाप्तौ च पुनर्दद्यात्तिलतैलसुतं घटं॥ आषाढादि चतुर्मासं वर्जयेन्नखक
तनं॥ वृंताकं गृंजनं चैव मधुसर्पिश्च टान्वितं॥ कार्त्तिक्यां तत्पुनर्हेमं ब्राह्मणाय निवेदयेत्॥ शिवः
अन्यान्यपि वर्जनसंकल्पस्थानि ष्टौ पृथ्वीचंद्रोदये ज्ञेयानि॥ येऽवरानं देस्त्वं दोपकांतरं धा(?)
तरं वा कुर्यान्मासोपवासकं॥ अनोदनं फलाहारं नक्तव्रतमथापि वा॥ अत्रैव तत्त्वसुधा २९
रणामुक्तं रामार्चनचंद्रिकायां नवविधेषां शयन्यां चैव बोधिन्यां च कृतीर्थत स्थैकस्य॥ शंखचक्र

प

विधानेन वह्निहतोऽन्न वेन्नरः॥ अतप्ततनुर्नतदामो अश्नुत इति ऋग्वेदात्॥ स
होवाच याज्ञवल्क्यस्तस्मात्समानात्महितार्थं हरिस्मजेत्॥ सुदर्शोक मौलेर्वं मणिम(?)
ग्निनासंदधत इति शातपथी श्रुतिः॥ व्रतद्विजो अरुंचक्रे सुतप्तेऽजन सांप्रोधी
तत वेचषीभिः[illegible]॥ स्कंदे वा कोर्दधन्ये पुराण लिंगान्यंगेत शायुधान्यर्पयंतशति
साम वेदात्॥ अग्निहोत्रं यथा नित्यं वेदस्याध्ययनं यथा॥ ब्राह्मणस्य तथैवेदं त
६ समुद्रांधारणमिति पद्मपुराणाच्चेति॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा यदि चेतरः॥
शंखचक्रांकिततनुस्तुलसीमंजरीधरः॥ गोपीचंदनलिप्तांगो दृष्टश्चेत्तद्घं कु
त इति काशीखंडाच्चेति॥ तत्प्रकारस्तु रामार्चनचंद्रिकायां ज्ञेयः॥ पृथ्वीचंद्रोदया
दयस्तु॥ यस्तु संतप्तशंखादिलिंगांचिततनुर्नरः॥ स सर्वयातनाभोगी चंडालो
जन्मकोटिषु॥ द्विजं तु तप्तशंखादिलिंगांकिततनुर्नरः॥ संभाष्य रौरवं याति या
वदिंद्राश्चतुर्दश इति बृहन्नारदीयोक्तेः॥ शंखचक्राद्यंकनं च गीतं त्यादिकं तथा[…]
कजातेरयं धर्मो न जातु स्याद्विजन्मनः॥ शंखचक्रं मृदा यस्तु कुर्यात्स्नाय[…]
स्त्रच्चकं विहि॥ कार्यां सर्वस्मा द्विजकर्मणः॥ यथा श्मशानजं काष्ठमनर्ह[…]

र्मसु॥ तथा च श्रीकीतो विप्रः सर्वकर्मसु गर्हितः॥ तथा॥ शिवकेशवयो रंका[illegible]
चक्रादिका न्द्विजः॥ न धारयेत मतिमान्वैदिके वर्त्मनि स्थितः॥ इति वि[illegible]
यनादिवचनात्॥ ऋग्वेदादिश्रुतीनामप्यर्थवत्वादन्यश्रुतीनां चासत्वाच्छो[illegible]
दिधारणं शूद्रविषयमित्यस्तु॥ न त्वं चोदनार्थं निषिद्धमिति श्रीधरस्वामी यथाच
निषेधस्य प्राप्तिसापेक्षत्वाद्विधिं विना च तद्योगादुपजीव्यविरोधेन न तो पशोक
रोतीतिवद्विकल्पो युक्तस्तथापि एकजातेरयं धर्म इत्यनेन सामान्यवाक्यानामुप
संहाराद्द्विजातिनिषेधो नित्यानुवाद इति तदाशयः॥ अत्र शिष्टाचार एव संकटपाश
निःसरणस्तरणिरिति संक्षेपः॥ आषाढपौर्णमास्यां कोकिलाव्रतमुक्तं हेमाद्रौ भ
विष्ये॥ आषाढपौर्णमास्यां तु संध्याकाल उपस्थिते॥ संकल्पयेन्मासमेकं श्राव
णं प्रत्यहं त्वहं॥ स्नानं करिष्ये नियता ब्रह्मचर्यस्थिता सती॥ भोक्ष्यामि नक्तं भूशय्यां
करिष्ये प्राणिनां दयामिति॥ अस्य नक्तव्रतत्वात्सायाह्नव्यापिनी ग्राह्या॥ अत्रैव शि
वशयनोत्सव उक्तो हेमाद्रौ वामनपुराणे॥ पौर्णमास्यामुमानाथः स्वपते चर्मसंस्त
रे॥ वैयाघ्रे च जटाभारं समुद्ग्रथ्याहिवर्ष्मणा॥ मदनरत्नेऽप्येवं॥ इयं प्रदोषव्यापिनी शिव॰
॥ अत्रैव व्यासपूजोक्ता॥ तत्र त्रिमुहूर्ता चेत्परैवेति संन्यासपद्धतौ त्रिमुहूर्ताधि २७

कं प्रागयं पर्वह्नोरपराह्णमयोरिति वचनात्॥ ॥छ॥ ॥श्रीः॥ इति श्रीरामकृ
ष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृते निर्णयसिंधौ द्वितीयपरि
च्छेदे आषाढमासः संपूर्णः॥ ॥श्रीः॥ ॥कर्कसंक्रांतौ पूर्वास्त्रिंशद्घटिकाः पुण्य
कालः॥ सूर्योदयोत्तरं संक्रमे तु परत एव पुण्यं॥ रात्रौ तु निशीथात्प्राक् परतश्च
संक्रमे परार्कहेमाद्यनंतभट्टादिमते पूर्वोत्तरदिनयोः पंच नाड्यः पुण्यकालः॥
धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा॥ पूर्वापरविभागेन रात्रौ संक्रमते रविः
॥ दिनांते पंच नाड्यस्तु तदा पुण्यतमाः स्मृताः॥ उदये पि तथा पंच दैवे पित्र्ये च क
र्मणीति स्कांदोक्तेः॥ पूर्वापरविभागेनेति मकरकर्कभिन्नसंक्रांतिपरं॥ वक्ष्य
माणवचोविरोधा[illegible]मदनरत्ने॥ तेनायमर्थः॥ रात्रेः पूर्वभागे मकरे उ
दये पंच नाड्यः पुण्याः॥ रात्रेः परभागे कर्कसंक्रमे दिनांते पंच नाड्यः पुण्याः॥
विषुवतोस्तु पूर्वदिने पंचापरदिने च पंचेति नवा क्यांतराविरोधात्॥ तेन हे[illegible]
द्रिमाधवयोः सर्ववचनानां चाविरोधः॥ माधवमते तु॥ अर्धरात्रे तदूर्ध्वं[illegible]
क्रांतौ दक्षिणायने॥ पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति वचनात्॥

थुना। कर्कसंक्रांतिर्यदि स्याद्दर्शमालिनः। प्रभाते वा निशीथे वा तदा पुण्यं तु [illegible]
इति भविष्योक्तेः पूर्वदिन एव पुण्यं दाक्षिणात्यास्त्वेतदेवाद्रियंते। अत्र रात्रौ [illegible]
स्नानादि निवृत्तीत्युक्तं प्राक्।। अत्र दानोपवासादि पूर्वमुक्तं। तथा कर्कटे केशादिद-
र्शनं निषिद्धं। उक्तं च कर्कटके वापि कन्यायां कार्मुके रवौ। रामवृंडगृहस्थस्य पि[illegible]
तयम इति सुमंतुवचनादित्युक्तं जीवत्पितृकनिर्णये गुरुभिः।। ।।अथ नदीनां रजो-
दोषः। हेमाद्रौ अत्रिः। सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः। न स्नानादीनि कर्मा-
णि तासु कुर्वीत मानवः। इदं च क्षुद्रनदीषु। सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः।
तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगा इति व्याघ्रोक्तेः। मासद्वयं त्वगस्त्योदयावधि-
त्वमुक्तं।। यावन्नोदेति भगवान्दक्षिणाशाविभूषणं। तावद्रजोवहा नद्यः करतोयाः
प्रकीर्तिताः। करतोयाः अल्पतोयाः। तथा च कात्यायनः।। याः शोषमुपगच्छंति ग्रीष्म- शिवः
के सरितो भुवि। तासु प्रावृषि न स्नायात्पर्यंते दशवासरे। इदं चापदि। स्मृतिसंग्रहे। २९
धनुःसहस्राण्यष्टौ तु गतिर्यासां न विद्यते। न ता नदीशब्दवहा गर्तास्ते परिकीर्ति-
ताः। महानदीषु तु न विशेष उक्तं। आदौ तु कर्कटे देवि महानद्यो रजस्वलाः। त्रिदिनं

तु चतुर्थेऽह्नि शुद्धाः स्युर्जाह्नवी यथा। महानद्यश्च ब्राह्मे। गोदावरी भीमरथी तुंगभद्रा च
वेणिका। तापी पयोष्णी विंध्यस्य दक्षिणे तु प्रकीर्तिताः। भागीरथी नर्मदा च यमुना च सरस्व-
ती।। विशोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः। द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः।।
मदनरत्ने पुराणांतरे। महानद्यो देविका च कावेरी वंजरा तथा। रजसा तु प्रदुष्टाः स्युः
कर्कटादौ त्र्यहं नृप। कात्यायनः। कर्कटादौ रजोदुष्टा गोमती वासरत्रयं। चंद्रभागा सती
सिंधुः सरयूर्नर्मदा तथा। इदं गंगादिव्यतिरिक्तविषयं। गंगा च यमुना चैव प्लक्षजाता सर-
स्वती। रजसा नाभिभूयंते ये चान्ये नदसंज्ञिताः। शोणसिंधुर्हिरण्याख्यः कोकलोहि-
तघर्घराः।। शतद्रुश्च नदाः सप्त पावनाः परिकीर्तिताः।। इति देवलोक्तेः। यत्तु प्रथमं क-
र्कटे देवी त्र्यहं गंगा रजस्वलेत्यादि वचनं तज्जाह्नवीभिन्नगोदावर्यादिगंगापरमि-
ति मदनरत्ने। अन्ये त्वंतर्गतरजोविषयं। गंगा धर्मद्रवः पुण्या यमुना च सरस्वती।
अंतर्गतरजोदोषाः सर्वावस्थासु चामलाः इति निगमोक्तेः। रजोदुष्टमपि जलं गंगा-
जलसंयोगे पावनं। गंगांभसा समायोगाद्दुष्टमप्यंबु पावनमिति मात्स्योक्तेः। [illegible]
कूपादौ तु योगयाज्ञवल्क्यः। अजा गावो महिष्यश्च ब्राह्मणी च प्रसूतिका। न[illegible]
कं चैव दशरात्रेण शुध्यतीति। कश्चित्स्वदोषमोहव्याघ्रपादः। अनादेयं कूपवा[illegible]

नपायि पयोन्हतां॥ रजोदुष्टेपि पयसि ग्रामन्तो गोन दुष्यति॥ गोअ[illegible]
नेनापि समुद्धृते इति द्वितीयपादे पाठः॥ तैलोद्धृते न दोषः॥ तथा[illegible]
त्रानं नेति प्राग्युक्तमित्याहुः॥ वसिष्ठोपि॥ उपाकर्मणि चोत्सर्गे प्रेतस्नाने त
थैव च॥ चंद्रसूर्यग्रहे चैव रजोदोषो न विद्यते इत्युक्तं विस्तरेण॥ श्रावण[illegible]
कृष्णतृतीया मधुश्रवा स्याद्गुर्जरे प्रसिद्धा॥ सा परयुता ग्राह्येति दिवोदासः॥
श्रावणशुक्लचतुर्थी॥ साऽऽद्ययुता॥ मातृविद्धा गणेश्वर इत्यादिवचनात्॥
श्रावणशुक्लपंचमी नागपूजादौ परैवेति सामान्यनिर्णये उक्तं॥ चमत्कार
चिंतामणौ॥ पंचमी नागपूजायां कार्या षष्ठीसमन्विता॥ तस्यां तु तुषिता नागा
३६ इतरा सचतुर्थिकेति॥ श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी॥ तां परित्यज्य
पंचमीं च चतुर्थी सहिता हिता इति मदनरत्नेऽभिधानाच्च॥ तेन परैवेति॥ अ
त्र विशेषो हेमाद्रौ भविष्ये॥ श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप॥ द्वार
स्योभयतो लेख्या गोमयेन विषोल्बणाः॥ पूजयेद्विधिवद्वीर दधिदूर्वांकुरैः
कुशैः॥ गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणैः॥ ये तस्यां पूजयंतीह नागा शिव॰
न्भक्तिपुरःसराः॥ न तेषां सर्पतो वीर भयं भवति कुत्रचिदिति॥ श्रावणशु २९

रा४

क्लद्वादश्यां दधिव्रतं प्रागुक्तं॥ तत्कादीनां त्वनिषेधः॥ तत्र दधि च व्यवहाराभावादि
ति वक्ष्यते॥ अत्रैव विष्णोः पवित्रारोपणमुक्तं हेमाद्रौ विष्णौ॥ श्रावणस्य सिते पक्षे
कर्कटस्थे दिवाकरे॥ द्वादश्यां वासुदेवाय पवित्रारोपणं मतं॥ द्वादश्यां श्रवणे
वापि पंचम्यामथ वा द्विज॥ आनुकूल्येष्टकत्र्यं पंचदश्यामथापि वेति॥ शि
वे तु तत्रैव कालोत्तरे॥ आषाढांते चतुर्दश्यां नभस्य नभसोस्तथा॥ अष्टम्यां च च
तुर्दश्यां पक्षयोरुभयोः सममिति॥ अन्यदेवतानां तु वक्ष्यते॥ अधिवासनं तु दी
पिकायां॥ गोहो हांतरिते कालेऽस्य वेधवाधिवासनमिति॥ गौणकालो रामार्चने
चंद्रिकायां॥ पवित्रारोपणं विप्रा श्रावणे नभस्ये वा यदि॥ कार्तिक्यवधि शुक्लास्तु क
र्तव्यमिति नारदः॥ हेमरौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः॥ कुशैः काशैश्च का
र्पासैर्ब्राह्मण्या कर्तितैः शुभैः॥ सत्वात्रिगुणितं सूत्रं त्रिगुणीकृत्य शोधयेत्॥ [illegible]
त्रोत्तमं पवित्रं तु षष्ट्या सहस्रतंतुभिः॥ मध्यमं सहितं त्वन्यं शतात्यं मध्य[illegible]
स्मृतं॥ सामान्यमिति नाशतेनैव कनिष्ठं तत्समाचरेत्॥ सो धारणपवित्रं [illegible]
सूत्रैः समाचरेत्॥ उत्तमं तु शतग्रंथि मध्यमं चाशीतिमध्यमं॥ कनिष्ठं [illegible]
त्रं स्यात्षट्त्रिंशद्ग्रंथिशोधनं॥ षट्त्रिंशच्चतुर्विंश द्वादशेति च केचन॥ [illegible]

शतादशाष्टाविंत्येके मुनयो विदुः॥ हेमाद्रौ विष्णुरहस्ये त्वन्यथोक्तं॥ उ[illegible]
रशतं कुर्यात्त्रिंशत्पंचाशदेव वा॥ सप्तविंशतिरेवाथ ज्येष्ठमध्यकनीयसा[illegible]
मेनाभिमात्रं स्यादूरुमात्रं द्वितीयकं॥ प्रलंबतो जानुमात्रं प्रतिमायां नि[illegible]
शिवपवित्रं तु तत्रैव शोवाणभे॥ एकादशीत्यथवास्तु त्रिंशता वाष्टयुक्तया॥ प
चाशता वा कर्त्तव्यं तु न्यग्रंथ्यंतराजकं॥ द्वादशांगुलमानानि व्यासादष्टांगुला
निवा॥ लिंगविस्तारमानानि चतुरंगुलकानि वेति॥ अधिकारिणोपि तत्रै
व विष्णुरहस्ये॥ ब्राह्मणाः क्षत्रिया वैश्यास्तथा स्त्रीशूद्र एव च॥ स्वधर्मावस्थिताः सर्वे
भक्त्या कुर्युः पवित्रकं॥ तथा॥ अतो देवेति मंत्रेण द्विजो विष्णोर्निवेदयेत्॥ शू
द्रस्य मूलमंत्रो वा येन वा पूजयेद्धरिं॥ एतच्च नित्यं॥ न करोति विधानेन पवि
त्रारोपणं तु यः॥ तस्य सांवत्सरी पूजा निःफला मुनिसत्तम॥ तस्माद्भक्तिसमायु
क्तैर्नरैर्विष्णुपरायणैः॥ वर्षे वर्षे प्रकर्त्तव्यं पवित्रारोपणं हरेरिति तत्रैवोक्तेः॥
देवताविशेषे तिथयोपि तत्रैव॥ धनदश्च रमा च गौरी गणेशः सोमराड्गुरुः॥
भास्करश्चंडिकांबा च वासुकिश्च तथर्षयः॥ चक्रपाणिरनंगश्च शिवो ब्रह्मा शिवः
तथैव च॥ प्रतिपत्प्रभृति तिथीनाः पूज्यास्तिथिषु देवताः॥ यद्यपि कौस्तुभेकपदे ३०

चतुर्थ्यां च श्रावणस्य चेति॥ तथा हेमाद्रौ कालोत्तरे॥ चतुर्दश्यामथाष्टम्यां सर्व
साधारणं तु तद्दिति॥ तत्प्रकारस्तु रामार्चनचंद्रिकायां॥ ततस्तानि पवित्राणि
वैणवे पटलेऽथ वे॥ संस्थाप्य शुचि वस्त्रेण पिधाय पुरतो न्यसेत्॥ अरात्रिसं
मितां वेणीं कुर्यात्षट्त्रिंशताकुशैः॥ क्रियालोपविघातार्थं यत्त्वया विहितं प्रभो॥
मयैतत्क्रियते देव तव तुष्ट्यै पवित्रकं॥ नमो विष्णो वे देवेश करुणाय दयां मयि॥
सर्वथा सर्वदा विष्णो मम त्वं परमा गतिः॥ उपवासेन देव त्वां तोषयामि जगत्पते॥
कामक्रोधादयो ह्येते न मे स्युर्व्रतघातकाः॥ अद्य प्रभृति देवेश यावद्वैशेषिकं दि
नं॥ तावद्रक्षा त्वया कार्या सर्वस्यास्य जगत्पते॥ इति देवं संप्रार्थ्य दिनं संस्था नमोस्तुते
प्य तत्र वंशपात्रे॥ ॐ संवत्सरस्य यागस्य पवित्रीकरणाय भोः॥ विष्णुलोका
त्पवित्राद्य आगच्छेह नमोस्तुते॥ अनेन मूलेन वा चावाह्योत्तममध्यमकनि
ष्ठ विष्णुब्रह्मरुद्रान्सत्त्वरजस्तमांसि वेदत्रयं वनमालायां प्रकृतिं [illegible]
यात्रिसूत्र्यां ब्रह्मविष्णुरुद्रान्॥ ग्रंथिषु॥ क्रिया॥ पौरुषी॥ वीरा॥ विजया॥ [illegible]
अपराजिता॥ मनोन्मनी॥ जया॥ भद्रा॥ मुक्तिश्चेत्यावाह्य संपूज्योर्ध्वं सं[illegible]
ताचार्याः संहलिफलदोपि यत्॥ पवित्रारोपणायेतत्कुरु केशव तोत्र[illegible]

कुतेजोरूपं वरं रम्यं सर्वपातकनाशनं॥ सर्वकामप्रदं देव तवांगे धारयाम्य[illegible]
ति देवकरे मंगलसूत्रं बध्वा देवं संपूज्य निमंत्रयेत्॥ आमंत्रितोसि देवेश पुर[illegible]
पुरुषोत्तम॥ प्रातस्त्वां पूजयिष्यामि सांनिध्यं कुरु केशव॥ क्षीरोदधिमहानाग[illegible]
य्यावस्थितविग्रह॥ प्रातस्त्वां पूजयिष्यामि संनिधिं कुरु ते नमः॥ निवेदनं मया[illegible]
शुभ्रं प्रातरेतत्पवित्रकं॥ सर्वथा सर्वदा विष्णो नमस्तेस्तु प्रसीद मे॥ ततः पुष्पांज
लिं दत्वा रात्रौ जागरणं कुर्यादित्यधिवासनं॥ प्रातर्नित्यपूजां कृत्वागे धृत्वा तत्पु
तं पवित्रमादाय॥ देवदेव नमस्तुभ्यं गृहाणेदं पवित्रकं॥ पवित्रीकरणार्थाय वर्ष
पूजाफलप्रदं॥ पवित्रकं कुरुष्वाद्य यन्मया दुःकृतं कृतं॥ शुद्धोहं त्वामहं देव त्व
त्प्रसादात्सुरेश्वर॥ मूलसंपुटितेनानेन दत्वांगदेवताभ्यो नाम्ना समर्प्य महानैवे व्र ९
द्यं दत्वा नीराज्य मणिविद्रुममालाभिरित्यादिभिर्दमनारोपोक्तमंत्रैः प्रार्थयित्वा॥
गुरवे ब्राह्मणेभ्यश्च दत्वा स्वयं धारयेत्॥ तथा॥ मासं पक्षमहोरात्रं त्रिरात्रं धा
रयेत्तथा॥ देवतंत्रसंदर्भदेशकालविवक्षया॥ अकरणे तु तत्रैव॥ पवित्रा शिवः
रोपणं काले न करोति कथंचन॥ तदायुतं जपेन्मंत्रं स्तोत्रं वापि समाहितः इत्यु
क्तं॥ ॥इति पवित्रारोपणं॥ ॥श्रावणशुक्लचतुर्दशी पूर्वयुता ग्राह्या॥ अत्र ३१

वृत्त्योर्विशेषश्चैत्रचतुर्दश्यामुक्तः॥ ॥अथोपाकर्म॥ ॥तत्र बह्वृचानां॥
प्रयोगपारिजाते शौनकः॥ अथातः श्रावणे मासि श्रवणेनैव युते दिने॥ श्रावण्यां श्रा
वणे मासि पंचम्यां हस्तसंयुते॥ दिवसे विधिवत्तत्र उपाकर्म यथोदितं॥ अध्यायोपा
कर्ति कुर्यात्त्रैणोपासनवह्निनेति॥ अत्र पौर्णमास्यपक्षसंहारन्यायेन यजुर्वेदिपरे
ति हेमाद्रिः॥ अत्र हस्तयुता पंचम्युक्ता॥ कारिकायां॥ नभमासे हस्तयुक्तायां पंचम्यां
वा तदिष्यते इति केवलपंचम्यां हस्तयुतेन्यस्मिन्नदिने इति तु हेमाद्रिः॥ उपासन
वह्निनेति तु कर्मद्वयमिदं केचिदिच्छन्ति किं कामोत्सर्ग वर्तत इति कारिकोक्तौ किं काग्नि
नाग्निकस्यते॥ नत्राप्यध्यायैर्न वारब्धं इति सह चात्र शिष्यत्वे तदधिकारिकास्या
चार्यश्रोत्रान्यस्याश्रावण्यां कुर्यादिति निषेधाल्लौकिक एव॥ तदुक्तं वेदनिर्ण
ये॥ यद्यपि द्विविकार्या विशेषात् तिरोषधिप्रजननेपक्षेसि तेश्रावणे इति [illegible]
कपक्षोपि सर्वेषां मुख्यकालत्वेनोक्तः॥ वक्ष्यमाणगार्ग्यवचनेन छंदोगानां [illegible]
विहितस्य तस्याविरोधिनः सर्वास्मृतिषु [illegible] तथापि श्र[illegible]णमास [illegible]
स्यस्तोत्रोक्तत्वात्ससपक्षेपि कार्यमिति दिक्॥ तथा च स्मृ[illegible]यानो [illegible]
करणमोषधीनां प्रादुर्भावे श्रवणेन श्रावण्यां पंचम्यां हस्तेन वा॥ अत्र

मुख्यो न्येगौणाः ॥ तस्याहर्द्वयोगे हेमाद्रौ व्यासः ॥ धनिष्ठासंयुतं कुर्याच्छ्रा[illegible]
मयं द्रवेत् ॥ तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञितं ॥ श्रवणेन तु यत्कर्म [illegible]
ढसंयुतं ॥ संवत्सरकृतोध्यायस्तत्क्षणादेव नश्यति ॥ इति प्रयोगपारिजाते ॥ मारी
चिः ॥ उदयव्यापिनी त्वेवं विस्पृष्टं घटिकाद्वयं ॥ तत्कर्म सफलं ज्ञेयं तस्य पुण्यं ल
नं तत्कर्मिणि ॥ इदं चोत्तराषाढयोगे परेद्युः ॥ परश्रवणाभावे घटिकाद्वयन्यूने वा
पंचम्यादौ कार्यं न तु पूर्वविद्धायां संगवमात्रे ॥ अपवादाभावात् ॥ किं चापरेद्युः सं
गवास्पर्शे निषिद्धं पूर्वाह्णे किं मानं ॥ संगववाक्यं श्रवणवाक्यं चेति चेन्नैतद्वि
हियववाक्यादग्निशफवाक्याच्च माषमिश्राम[illegible]पपादानं स्यादिति ॥ सर्वो दिशा
निषिधानुबोधांप्रवेशान्मैरपेक्ष्यवाधात्मेति चेन्न ॥ इहापि तुल्यं ॥ एते न पर्वापो
दयिकं व्याख्यातं ॥ निषेधप्रवेशस्यो[illegible]स्यत्वात् ॥ श्रवणयुतदिने संक्रां
त्यादौ तु ॥ उपाकर्म न कुर्वीत ऋक्सामयजुर्विदः ॥ ग्रहसंक्रांतियुक्ते तु हस्ते श्र
वणपर्वणि चेति हेमाद्रौ निषेधात् पंचम्यादयो ग्राह्याः ॥ मदनरत्नेपि ॥ यदि स्याच्छ्रा
वणं पर्वग्रहसंक्रांतिदूषितं ॥ स्यादुपाकरणं शुक्लपंचम्यां श्रावणस्य तु ॥ स्मृति
महार्णवे ॥ संक्रांतिर्ग्रहणं वापि यदि पर्वणि जायते ॥ तन्मासे हस्तयुक्तायां पंच

ग्र॰ ४

शि॰ य॰
३२

न्२

म्यां वा तदिष्यते ॥ तत्रापि प्रयोगपारिजाते वृद्धमनुकात्यायनौ ॥ अर्द्धरात्रा
दधस्ताच्चेत्संक्रांतिर्ग्रहणं तदा ॥ उपाकर्म न कुर्वीत परतश्चेन्न दोषकृदिति ॥
मदनरत्नेणार्व्यापि ॥ यद्यर्द्धरात्रादर्वाक् तु ग्रहः संक्रम एव च ॥ नोपाकर्म तदा
कुर्याच्छ्रावण्यां श्रवणेपि वा ॥ यत्तु ॥ प्रतिपन्मिश्रितेनैव नोत्तराषाढसंयुते ॥ श्र
वणश्रावणं कुर्युर्ग्रहसंक्रांतिवर्जिते इति प्रतिपन्मिश्रनिषेधकं वचनं तन्निर्मू
लं ॥ अन्यच्च ॥ वेदोपाकरणे प्राप्ते कुलीरे संस्थिते रवौ ॥ उपाकर्म न कर्तव्यं कर्तव्यं
सिंहयुक्तके इति वचनं देशांतरविषयं ॥ नर्मदोत्तरभागे तु कर्तव्यं सिंहयुक्तके ॥
कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिणे इति बृहस्पतिवचनादिति प्रयोगपा
रिजातेवक्तं ॥ पराशरमाधवीयेप्येवं ॥ सामगानां सिंहस्थरवावुक्ते हस्तद्विपय
[illegible]पुरो[illegible]शश्चतुर्णां करणावुपसंक्रियत इति तु वयं पश्यामः ॥ यत्तु ॥ को[illegible]
दर्शी ॥ अध्यायानामुपाकर्म श्रावण्यां तैत्तिरीयकाः ॥ बह्वृचाः श्रवणे कु[illegible]
हस्ते केचिच्च घस्रि ॥ सहस्तशुक्लपंचम्यां वा तद्ग्रहणसंक्रमे ॥ असिंहा[illegible]
पर्यां श्रवणेन व्यवस्थेयेति तन्मन्दालिखनाच्चिंत्यं ॥ श्रावणे सस्या[illegible]

ष दौ तु बह्वृचपरिशिष्टे ॥ अब्दं यदौषधयस्तस्मिन्मासे तु नक्षत्रं वैतत्तिचेद्वा
भाद्रपदे मासि श्रवणेन तद्दिष्यत इति ॥ तत्राप्यनुक्रमेणैव कुर्यादेवा ॥ त
मित्याचक्षते ॥ इति स्मरणात् ॥ वर्षर्तौ नित्यं वार्षिकं ॥ एतच्छ्रुत्वा स्मार्ता वापि
उपाकर्मोत्सर्जनं च पवित्रदमनार्पणमिति दमनारोपे लिखितवचनात् ॥
नित्यनैमित्तिके जाप्यहोमयज्ञक्रियासु च ॥ उपाकर्मणि चोत्सर्गे ग्रहवेधो न
विद्यत इति प्रयोगपारिजातसंग्रहोक्तेः ॥ पर्वणि ग्रहणसति ष्टवैत्रिरात्रादि
वेधात्तावं वक्ष्ये मिदं ते न पर्वणि ग्रहणेपि चतुर्दश्यां श्रवणे कार्यमिति हेमाद्रिः ॥
प्रथमारंभस्तु न भवति ॥ गुरुभार्गवयोर्मौढ्ये बाल्ये वा वार्द्धके पि वा ॥ तथा वि
मासे संक्रांतिमलमासादिष्ट्विह द्विजः ॥ प्रथमोपाकृतिर्न स्यात् कृतं कर्म विनाश
येदिति तत्रैव कश्यपोक्तेः ॥ अत्र प्रथमारंभे वृद्धिश्राद्धं कुर्यादिति नारायणवृ
त्तौ ॥ एतच्चाधिमासे न कार्यं ॥ उपाकर्म तथोत्सर्गः प्रसवाहोत्सवाष्टकाः ॥
मासवृद्धौ पराः कार्या वर्जयित्वा तु पैतृकमिति ज्योतिःपराशरोक्तेः ॥ उत्कर्षः शिवः
कालवृद्धौ स्यादुपाकर्मादिकर्मणि ॥ आग्नेषकादि वृद्धीनां न तूत्कर्षो युगादिषु ॥ इ
ति कात्यायनोक्तेश्च ॥ यत्तु ॥ उपाकर्मणि चोत्सर्गे इतदिष्टं कषादिते इति कृष्णभट्टं ३२

गावचनं तत्साम्नगविषयं तेषां सिंहार्क एवोक्तेः ॥ एतच्चापराह्णे कार्यं ॥ उपाक
र्मापराह्णे स्यादुत्सर्गः प्रातरेव त्विति ॥ अध्यायानामुपाकर्म कुर्यात्काले पराह्णके ॥
पूर्वाह्णे तु विसर्गः स्यादिति वेदविदो विदुरिति च हेमाद्रौ गोभिलोक्तेः ॥ बह्वृचत
त्तु न वेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव त्विति प्रचेतोवचनात्पूर्ववाक्यं साम
गविषयं ॥ तेषामपराह्ण एवोक्तेरित्यनुपदं वक्ष्यते ॥ दीपिकापि ॥ अस्य तु विधेः
पूर्वाह्णिकालः स्मृत इति ॥ याजुषास्तु पर्वणि कुर्युस्तत्रापस्तंबेरौदयिकं ग्राह्य
मन्ये तु पूर्वं ॥ पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयकाः ॥ बह्वृचाः श्रवणे कुर्यु
र्ग्रहसंक्रांतिवर्जिते इति गार्ग्योक्तेः ॥ सेषा सवान्नश्रुती ब्रह्मापर्वण्यौदयिके तु नः ॥
अतो व्रतदिने तस्मिन्नोपाकरणमिष्यत इति कालिकापुराणात् ॥ अथ चेद्दे
मं तु कोपर्वणि स्यादुपक्रिया ॥ दुःखशोकामयग्रस्ताराष्ट्रे तस्मिन्द्विजातयः
हनुरन्ते हेमाद्रौ च गार्ग्यपदादौषोक्तेश्च ॥ अत्र सिणीन्न दृये विशेषः ॥ श्रवणा
वणापर्वमंगवस्यग्यदृष्टेष्ठेता ॥ तद्वा दृयिकं कार्यं नान्यदौदयिकं न वे
राशरमाधवीये पि गार्ग्यः ॥ आषाढी पौर्णमासी तु संगवात्परतो यदि ॥ त

दयिकी ग्राह्या नान्या औदयिकी तु भवेत्॥ कर्मकालमाह कालादर्शे नि[...]
श्रावण्यां प्रौष्ठपद्यां वा प्रतिपद्यक्षमुहूर्तके॥ विकल्पस्याच्छंदसां तत्रोप[...]
सर्जनं भवेत्॥ कात्यायनादीनां तु दिनद्वयेपि श्रावणीरूपकर्मकालव्या[...]
कदेशस्पर्शे वा पूर्वैवेति हेमाद्रिः॥ येष्वपि॥ अत्र पौर्णमासी श्रवणहस्त[...]
रूपलक्षणं॥ तेन तावपि संगवस्पर्शे॥ उदये संगवस्पर्शाकृतोपर्वणि वा के[...]
ऋग्वेदिनस्तूपाकर्म कुर्युर्ग्यजुःसामगाः क्रमादिति पृथ्वीचंद्रः॥ एतत्कृत्याधिकप
रं॥ यदपि श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी॥ पूर्वविद्धा तु कर्तव्या शिवरा
त्रिर्बलेर्दिनमिति तत्रैव वर्तेत फलपवित्रश्रवणादिदैवकर्मविषयमिति हे
माद्रिः॥ अत एव वचनात्कुलधर्मत्वाद्वापि पूर्वैव॥ मदनरत्नेप्येवं॥ म
दनपारिजातेपि॥ पूर्वविद्धायां श्रावण्यां वाजसनेयिनामुपाकर्मेत्युक्तं॥ म
नरत्ने तु पर्वण्यौदयिके कुर्युः श्रावणं तैत्तिरीयका इति बह्वृचपरिशिष्टाद्बह्वृ
कानां प्रतिकर्मविधानार्थं प्रवृत्ते तत्र तैत्तिरीयककर्मविध्ययोगात्पूर्वैव कि का
लिकापुराणादौ सामान्यतः औदयिकपर्वप्राप्तेस्तन्निषेधेन बह्वृचानामप्र

शिव: ३४

वणविधानात्तैत्तिरीयकपरं अनुवादत्वात्तस्य च प्राप्त्यधीनत्वात्प्राप्तेश्च यजुर्वे
दिमात्रपरत्वात्सर्वयजुर्वेदिपरत्वलक्षणार्थमवयुत्यानुवादो वा॥ ननु विधायकं
येन विधिना वा प संहारः स्यात्॥ अनुवादत्वाद्ग्रहणा न दोषः॥ अन्यथा औदयि
कपर्वविशिष्टोपाकर्मोद्देशेन कर्तव्यविधौ कर्तृविशिष्टे वा औदयिकपर्वविधौ वाक्य
भेदापत्तेः॥ तस्मात्तैत्तिरीयकपदाविवक्षया सर्वयजुर्वेदिनामौदयिकमेव प
र्वेत्युक्तं॥ तन्न॥ न तावत्परिशिष्टं बह्वृचानामप्रत्येव विधिः॥ धनिष्ठाप्रतिपद्यु
क्तां पूर्वाह्णे समन्वितमित्यादि तदुदाहृतेः एव परिशिष्टे वेदांतरधर्मविधीनां
दर्शनात्॥ नाप्यनुवादोयं॥ कालिकापुराणबह्वृचादीनामप्रापितदापत्तेः॥ कर्तृ
रित्यस्य विधित्वेन तस्यैवार्थवादत्वेनैतत्प्राशस्त्यानुवादित्वात्॥ न च तैत्तिरीय
काणां ग्रहणं तद्विधिरस्ति॥ येनानुवादः स्यात्॥ न च वाक्यभेदः॥ तैत्तिरीयक
मात्रस्य कर्ममात्रस्य वा उद्देश्यत्वायोगेन ह विराड्विदृष्टवर्षश्रालणमप[...]
तेति वद्भागत्याविशिष्टस्योद्देश्यत्वात्॥ अन्यथा तेराद्बह्वृचपरस्या[...]
पत्त्या श्रवणस्य सर्वसाधारण्यापत्तेः॥ तस्माद्धेमाद्रिमतमेव युक्तमिति नि[...]
र्दं च शिष्यानध्यापयतः आवसथ्ये॥ अनध्यापयतो नाधिकार[...]

क्तेः॥ श्रावणमपि ग्रहणादिदुष्टायां कातीयच्छन्दोगैः प्रौष्ठपद्यां कार्यं॥ तैत्ति
ण पंचम्यां॥ संक्रांतिग्रहणं वापि पौर्णमास्यां यदा भवेत्॥ उपाकृतिस्तु पंचम्
र्या वाजसनेयिभिरिति महार्णवे॥ वाजसनेयिग्रहणादितरेषामपि॥ इदं च
क्तकालपरत्वात् छन्दोगपरमपि शाखायनैस्तु हस्ते कार्यं॥ यत्तु बौधायनः॥ श्रा
वण्यां पौर्णमास्यां माघ्यां वोपाकृत्योत्सृजेत्॥ तत्प्रौष्ठपद्यामपि दोषे माघ्यां का
र्यमित्येवमर्थं॥ तच्चास्वीयविषयं वा॥ सामगास्तु श्रावणे हस्ते कुर्युः॥ बह्वृचाः श्र व
णे चैव हस्ते चैसामवेदिन इति निर्णयामृते गार्ग्योक्तेः॥ स्मृत्यंतरे॥ धनिष्ठाप्र
तिपद्युक्तं वा श्रूयते हस्तसमन्वितं॥ श्रावणं कर्म कुर्वीरन् ऋग्यजुःसामपाठकाः इति
मदनरत्ने परिशिष्टोक्तेः॥ गार्ग्योपि॥ सिंहे रवौ तु पुष्ये तु पूर्वाह्णे विचरेद्बहिः॥ छंदो
गामिति तामुपकुर्युरुत्सर्गं सर्वच्छंदसां॥ शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकमि
ति॥ पुष्ये तु पूर्वाह्णे उत्सर्गः॥ आपराह्णिकमुपाकर्मेत्यन्वयः॥ अन्यस्तु विशेषः
पूर्वमेवोक्तः॥ प्रयोगपारिजाते गोभिलः॥ उपाकर्मोत्सर्जनं च वनस्थानामपीष्य
ते॥ धारणाध्ययनांगत्वाद् गृहिणां ब्रह्मचारिणां॥ उत्सर्जनं च वेदानामुपाकरण
कर्म च॥ अकृत्वा वेदजं येन फलं नाप्नोति मानवः॥ सर्वथा लोपे तु कस्तुप

शिवः ३५

वासश्च वेदादीनां नित्यानामिति मनुनाप्युक्तेः॥ एवमुत्सर्गेपि॥ ॥
अथ प्रसंगादत्रैवोत्सर्जनमुच्यते॥ ॥ तच्च पौषमासे रोहिण्यां तत्र अष्टम्यां वा
कार्यं॥ पौषमासस्य रोहिण्यामष्टकायामथापि वा॥ जलांते छंदसां कुर्यादुत्सर्गं वि
धिवद्बहिरिति याज्ञवल्क्योक्तेः॥ श्रावण्यां प्रौष्ठपद्यां चोपाकृते तु क्रमेण पौषस्य शु
क्लप्रतिपदि माघस्य शुक्लप्रतिपदि च कार्यं॥ अर्धपंचमान्मासानधीयीतेति तेनैवो
क्तेः॥ यत्तु हारीतः॥ अर्धपंचमान्मासानधीत्योत्सृजेत्॥ पंचार्धषष्ठान्वेति॥ त
दाषाढ्युपाकर्मविषयं॥ बौधायनास्तु पौष्यां माघ्यां वा कुर्युः॥ पौष्यां माघ्यां वोत्स
जेदिति तत्सूत्रात्॥ तैत्तिरीयैस्तु तैष्यां कार्यं॥ तैष्यां पौर्णमास्यां रोहिण्यां वा विर
मेदिति तत्सूत्रात्॥ बह्वृचैस्तु माघ्यां कार्यं॥ अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां वि
धीयत इति कारिकोक्तेः॥ कातीयास्तु भाद्रपदे कुर्युः॥ उत्सर्गश्च तदा तिष्यात्तिष्यां
प्रौष्ठपदेपि वेति कात्यायनोक्तेः॥ सामगास्तु सिंहार्क पुष्ये कुर्युः॥ तथा च भा
रवौ त्विति गार्ग्यवचनं एवमुक्तं॥ सर्वैरुपाकर्मदिने वा कार्यं॥ पुष्ये तु
कुर्यादुपाकर्मदिने च वेति हेमाद्रौ खादिरगृह्योक्तेः॥ यदा सिंहस्थे सूर्ये
तन्मध्यस्थहस्ते तत्राप्यार्क पुष्यः कर्कस्थो भवति॥ तदा तस्मिन्नपु

तत्वात उत्तरहस्ते उपाकर्म सामगाः कुर्युः॥ मासे प्रौष्ठपदे हस्तात्सु प[illegible]
वेदसा॥ तदा च श्रावणे मासि कुर्युरुत्सर्गं छंदसां द्विजा इति तत्रैव परि[illegible]
कैः॥ अत्र द्वावपि मासौ गौणमासौ ज्ञेयौ॥ तेषां सारस्यवो कैः॥ अत्रापि विशेषम[illegible]
र्कांडिनिः॥ उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च॥ ऋषीन्संतर्पयेत्[illegible]
येत्संतर्पयेन्नत इति॥ उपाकर्मैकसर्गे च त्रिरात्रं पक्षिणी महोरात्रं वानध्याय इति
मिताक्षरायामुक्तं॥ अत्र नदीनां रजोदोषो नास्ति॥ उपाकर्मणि चोत्सर्गे रजोदोषो
न विद्यत इति गार्ग्योक्तेरिति॥ अत्रैव रक्षाबंधनमुक्तं हेमाद्रौ न विष्णौ तत्रापरा
ह्ले समये रक्षापोटलिकां शुभां॥ कारयेद्दक्षतैः शस्तैः सिद्धार्थैर्हेमभूषितैरिति॥
इदं च भद्रायां न कार्यं॥ भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा॥ श्रावणी नृपतिं
हंति ग्रामं दहति फाल्गुनी इति संग्रहोक्तेः॥ तत्सत्वे तु रात्रावपि तदंते कुर्यादिति
निर्णयामृते॥ मदनरत्ने स्मृतिसंग्रहे॥ नंदायां दर्शने रक्षा बलिदानं दशासु च॥ भद्रायां गोकुलक्रीडा देशनाशाय जायते॥ इदं रक्षाबंधनं नियतकालत्वा
द्भद्रावर्ज्यं ग्रहणदिनेपि कार्यं॥ होलिकावत्॥ ग्रहसंक्रांत्यादौ रक्षानिषेधाभावा त्॥ शिवः
त्॥ सर्वेषामेव वर्णानां सूतकं राहुदर्शने इति तत्कालमात्रनिषेधाच्च॥ योपि॥ दिन ३६

त्रयोदश्यादितो वर्ज्यं दिनानां नवकं क्वचित्॥ मांगल्येषु समस्तेषु ग्रहणे चंद्रसूर्ययोरिति
निषेधः सोप्यनियतकालीनकर्मपर एव॥ न त्वत्र॥ अन्यथा होलिकायां का गतिः॥
अत एव नित्ये नैमित्तिके जप्ये होमे यज्ञक्रियासु च॥ उपाकर्मणि चोत्सर्गे ग्रहवेधो न
विद्यत इति॥ नियतकालीनेतदभावस्तीति दिक्॥ उपाकर्मणि तत्तद्दिनभिन्नपरं॥ तत्र
निषेधादित्यलं प्राक्॥ मंत्रस्तु॥ येन बद्धो बली राजा दानवेंद्रो महाबलः॥ तेन त्वाम
भिबध्नामि रक्षे मा चल मा चल॥ ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च मानवैः॥ कर्त
व्यो रक्षिकाचारो द्विजान्संपूज्य शक्तितः॥ अत्रैव हयग्रीवोत्पत्तिः॥ तदुक्तं कल्पतरौ॥
श्रावण्यां श्रवणे जातः पूर्वं हयशिरा हरिः॥ जगाद सामवेदं तु सर्वकल्मषनाशनं॥
स्नात्वा संपूजयेत्तं तु शंखचक्रगदाधरं॥ अत्राश्वलायनैः श्रवणाकर्मोक्तं॥ श्रा
वण्यां पौर्णमास्यां श्रवणाकर्मेति॥ तत्रास्तमययोगिनी ग्राह्या॥ अस्तमिते स्थालीपाकं
श्रपयित्वेति सूत्रात्॥ अत एव निशीथे दर्शप्रयोगे ततः पातनियमात्तदंगं श्रव
स्थिरहोमकाद्वादशी॥ अन्यथापरेद्युः प्राप्तौ कः प्रसंगः॥ याज्ञिकास्तु पौर्णमा
स्याः पर्वास्तमयवदहोरात्रवाचित्वात्तत्रैव कर्मकालव्याप्तिर्ग्राह्येति
तु वदंति तन्न शेषपर्वत्वेति॥ श्रावणादिमासचतुष्टये ऽर्कपक्षे हि[illegible]

अश्वत्थशयनव्रतं॥ तत्र चंद्रोदयव्यापिनी॥ दिनद्वये सत्वे परेति निर्णया
॥ ॥श्री॥ ॥ इति श्रीमीमांसकनारायणभट्टात्मजरामकृष्णभट्टात्म
करात्मजकमलाकरभट्टकृते निर्णयसिंधौ द्वितीयपरिच्छेदे श्रावणमासः सं
॥ ॥छ॥ ॥ सिंहे परा षोडशघटिका स्तु पुण्यकालः॥ अन्यत्सर्वं ज्ञेयम्॥ अत्र गो
सवे अद्भुतसागरे नारदः॥ नानो सिंहगते चैव यस्य गोः संप्रसूयते॥ मरणं तस्य
निर्दिष्टं षड्भिर्मासैर्न संशयः॥ तत्र शांतिं प्रवक्ष्यामि येन संपद्यते शुभं॥ प्रसूतां त
त्क्षणादेव तां गां विप्राय दापयेत्॥ ततो होमं प्रकुर्वीत घृताक्तैराजसर्षपैः॥ आहु
तीनां घृताक्तानामयुतं जुहुयात्ततः॥ व्याहृतिभिश्चार्यं होमः॥ सोपवासः प्रयत्नेन
दद्याद्विप्राय दक्षिणामिति॥ तथा॥ सिंहराशौ गते सूर्ये गोप्रसूतिर्यदा भवेत्॥ पौ
षे च महिषीसूते दिवा वाश्वतरी तथा॥ तदानिष्टं भवेत्किंचित्तच्छांत्यै शांतिकं च
रेत्॥ अश्वत्थवामेति सूक्तेन तद्विप्रारिति मंत्रतः॥ जुहुयात्तिलाज्येन शतमष्टो
त्तराधिकं॥ मृत्युंजयविधानेन जुहुयाच्च तथायुतं॥ श्रीसूक्तेन ततः स्नायाच्छां शिवः
तिसूक्तेन वा पुनः॥ मध्यरात्रे निशीथे वा यदा गौः क्रंदते सदा॥ ग्रामे वा स्वगृहे
वापि शांतिकं सर्वदा दिशेत्॥ एवं श्रावणे दिने वडवाप्रसवो निषिद्धः॥ तदुक्तं (३९)

वचनं तु हरितालिकानिर्णये वक्ष्यते॥२

मथर्ववेदिनां गार्ग्यपरिशिष्टे माघे बुधे च नवम्यां महिषी श्रावणे वडवा दिवा॥ सिंहे गावः
प्रसूयंते स्वामिनो मृत्युदायकाः इति॥ अत्र तत्तद्दानाख्या शांतिः कार्या॥ भाद्र
पदशुक्लतृतीया कज्जलीसंज्ञा॥ सा परा ग्राह्येति दिवोदासीये उक्तं॥ भाद्रकृष्णच
तुर्थी बहुलाख्या मध्याह्नव्यापिनी ग्राह्या॥ दिनद्वये सत्वे पूर्वा॥
श्र कार्या॥ चतुर्थीवद्धेनुपूजा दुर्गार्चनं उत्तरेखलिके च॥ वत्सस्य पूजा त्रिवरात्रिरता परा
न्विता पूतिनः पंचराज्यं इति दिवोदासीयवचनात्॥ अत्र वत्सपूजायां पृथगुपादाना
द्धेनुपूजा गौणीहेन बहुलाख्या स्यात् इति सएव व्याचख्यौ॥ मदनरत्नेप्येवं॥ अत्र गोपूजा
यवान्नाशनं च तद्व्रतोक्तं॥ भाद्रकृष्णषष्ठी स्कंदषष्ठी सा सप्तमीयुतेति दिवोदासः॥ भाद्र
कृष्णसप्तम्यां शीतलाव्रतं तत्र पूर्वा ग्राह्येति रूपमाधः॥ ॥अथ जन्माष्टमी॥ ॥सा च
कृष्णादिमासेन भाद्रपदकृष्णाष्टमी॥ तथा भाद्रपदमासि कृष्णाष्टम्यां कलौ युगे॥ अ
ष्टाविंशतिमे जातः कृष्णोसौ देवकीसुत इति कल्पतरौ ब्राह्मोक्तेः॥ अत्र द्वे
तोष्टमी द्विधा जन्माष्टमी जयंती चेति॥ तत्राद्या केवलाष्टमी॥ येन कुर्वंति
कृष्णजन्माष्टमीव्रतं॥ ते भवंति नराः प्राज्ञ व्यालाः व्याघ्राश्च कानने इति स्कां

वावायदिवाथरात्रौ नास्ति चेद्रोहिणीकला ॥ रात्रियुक्तां प्रकुर्वीत विशेषेण[...]
मितिपुराणांतरात् ॥ श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतं ॥ न करोति नरो[...]
वति क्रूरराक्षसः ॥ इति भविष्योक्तेश्च ॥ केवलाष्टम्यामेवोपोष्यत्वावगतेः ॥ से कृ[...]
युक्ता जयंती ॥ कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि ॥ जयंती नाम सा प्रोक्ता [...]
व्या सा प्रयत्नतः ॥ इति वह्निपुराणात् ॥ अष्टमी कृष्णपक्षस्य रोहिणीऋक्षसंयुता ॥ भवेत्प्रौ
ष्ठपदे मासि जयंती नाम सा स्मृतेति विष्णुरहस्यादिवचनाच्च ॥ ज्योतिरादिवत्संज्ञया
कर्मभेदः ॥ रोहिणीयोगश्चाहोरात्रं मुख्यः ॥ निशीथमात्रे मध्यमः ॥ दिवसादावधमः ॥
अहोरात्रं तयोर्योगो ह्यसंपूर्णो भवेद्यदि ॥ मुहूर्तमप्यहोरात्रे योगश्चेत्तामुपोषयेदि
ति वसिष्ठसंहितोक्तेः ॥ अर्द्धरात्रे तु योगोयं तारापत्युदये सति ॥ नियतात्मा शुचिः
स्नातः पूजां तत्र प्रवर्तयेदिति विष्णुधर्मोक्तेः ॥ वासरे वा निशायां वा यत्र स्वल्पापि रो
हिणी ॥ विशेषेण नभोमासे सैवोपोष्या मनीषिभिरिति पुराणांतराच्च ॥ विशेषेणे शिवः ३८
त्युक्तेर्मासद्वयेपीदं ॥ श्रावणे वा नभस्ये वेति वक्ष्यमाणत्वात् ॥ गौडास्तु ॥ निशीथ
एव रोहिणीयोगे जयंती नान्यथेत्याहुः ॥ तन्न ॥ वासरे वा निशायां वेति विरोधात् ॥ त
च्च जन्माष्टमीव्रतं नित्यं पूर्वोक्तवचनेष्वकरणे निंदाश्रुतेः ॥ वर्षे वर्षे तु या नारी कृष्णज

न्माष्टमीव्रतं ॥ न करोति महाप्राज्ञ व्याली भवति कानने इति स्कांदे वीक्ष्यते श्रुतेः ॥
न करोति नरो यस्त्विति शूद्रमुक्तेः ॥ स्त्रीलिंगमतंत्रं तेन मनुष्यमात्रस्याधिकारः ॥
मदनरत्ने स्कांदे त्वत्रैव फलमुक्तं ॥ जन्माष्टमीव्रतं ये वै प्रकुर्वंति नरोत्तमाः ॥ कारयं
त्यथवा लोका न लक्ष्मीस्तेषां स्थिरा सदा ॥ सिध्यंति सर्वकार्याणि कृते जन्माष्टमी
व्रते इति ॥ जयंतीव्रतं तु नित्यकाम्यं ॥ महाजयार्थं कुरु तां जयंतीं मुक्तये नघ ॥
धर्ममर्थं च कामं च मोक्षं च मुनिपुंगव ॥ ददाति वांछितानर्थान् ये चान्येप्यतिदुर्ल
भा इति स्कांदे फलश्रुतेः ॥ प्रत्यब्दे न तु यस्यापि शाबरस्तस्य नो जने ॥ तस्याप
न्नते जंती जयंती विमुखो नरः ॥ न करोति यदा विष्णो जयंतीसंभवं व्रतं ॥ यम
स्य वशमापन्नः सहते नारकीं व्यथामित्यकरणे निंदाश्रुतेश्च ॥ यदा च [illegible]
परेद्युर्वा रोहिणीयोगस्तदा जन्माष्टमी जयंत्यामंतर्भूता ज्ञेया ॥ न तु जन्माष्टमी
व्रतं पृथक्कार्यं ॥ तदुक्तं माधवेनैव ॥ यस्मिन्वर्षे जयंत्याख्ययोगो जन्माष्टमी
दा ॥ अंतर्भूता जयंत्यां स्यादिदृग्योग प्रशस्तिन इति ॥ मदनरत्ने निर्णयामृ[...]
ते मैथिलमतमप्येवं ॥ हेमाद्रिस्तु ॥ रोहिणीसंयुतोपोष्या सर्वथैव विनाशि[...]
अर्द्धरात्रादधश्चोर्ध्वं कलया वा यदा भवेत् ॥ जयंती नाम सा प्रोक्ता सर्वपा[...]

िनी॥ इति अग्निपुराणात् अर्धरात्र एव रोहिणीयोगस्य प्राशस्त्यात्॥ मुहूर्तमप्
त्यादीनां चार्धरात्रयोगैकपपत्तेर्न जयंती अतोऽन्यत्॥ तत्त्वं तु हेमाद्रिमते ज
यंती व्रतं जन्मनैव॥ उदये चाष्टमी त्यस्य ते न जयंती परत्वोक्तेः॥ किंच॥
मर्धरात्रे च यदा स्यात् अष्टमी न वेत्॥ तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजं॥
ति विष्णुधर्मोक्तेः॥ समायोगे तु रोहिण्यां निशीथे राजसत्तम॥ समजायत गोविंदो बा
लरूपी चतुर्भुजः॥ तस्मात्तं पूजयेत्तत्र यथा वित्तानुरूपत इति वह्निपुराणात् अर्ध
रात्रस्य कर्मकालत्वमवसीयते॥ अतः कर्मणो यस्य यः कालः इत्यादिवचनात् तद
र्धरात्रे व्याप्तेः परदिने सतोऽपि रोहिणीयोगस्य न प्रयोजकत्वं॥ अन्यथा बुधवार
स्यापि तथात्वापत्तेः॥ किंच॥ जयंतीशब्दो रात्रिविशेषवचनः॥ अभिजिन्नाम न
क्षत्रं जयंती नाम शर्वरी॥ मुहूर्तो विजयो नाम यत्र जातो जनार्दन इति ब्रह्मांडपुरा
णात्॥ तेन तस्यां रोहिण्यां गौणत्वान्न व्रतं नेदः॥ यत्तु वासरे वा निशायां वेति तत्
केमुतिकन्यायेन निशीथयोगस्यैव स्तुत्यर्थं पूर्वदिने ऽर्धरात्रयोगाभावे वा प्राप्य
र्थं॥ यद्यपि दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणी कला॥ रात्रियुक्तां प्रकुर्वीत शिवः
विशेषेणेंदुसंयुतामित्यनेन रोहिणीयोगाभावे रात्रिव्याप्तिरुक्ता॥ तथापि य ३९

ऽर्धं१ शस्त्या २

रात्रिमात्रस्य जयंतीत्वमुक्तं तत्परमेव॥ २

स्मिन्वर्षे जयंतीयोगो नास्ति तत्र जयंतीव्रतलोपप्राप्ते अष्टमीमात्रेऽपि जयंतीव्रतं कार्य
मित्येवंपरमिदमिति तद्राशयः॥ अतएवोक्तं जयंती नाम शर्वरीति॥ यत्तु स्कांदे॥ उद
ये नवमी किंचिन्नवमी सकला यदि॥ भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता॥ अ
पि वर्षशतेनापि लभ्यते वा यदि वा न वेति॥ यच्च पाद्मे॥ प्रेतयोनिगतानां तु प्रेतत्वं
नाशितं नरैः॥ यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता॥ किं पुनर्बुधवारेण सो
मेनापि विशेषतः॥ किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति॥ तद्दानादिवि
षयं॥ उपवासस्य श्रवणादित्यनेन तन्नदः॥ जयंती परमिति हेमाद्रिः॥ उदये चंद्रोद
ये इति तु वयं॥ अतो न व्रतं त्रेता नाप्यं तन्त्रावशतिकं चैवान॥ गौडास्तु॥ नव
मीसंयुतपरमिदं वचनं॥ नवमीसक्त्वा यद्दृ इति विशिष्टोक्तेः॥ एतन्न वीदने ज
यंत्यनावपरमित्याहुः॥ जयंत्यादिसर्वोपवासोऽयमिति चूडामणौ द
वयं तु सत्यं व्रतं नेदृ॥ जो कास्तु जन्माष्टमीमेवानुतिष्ठंतीति॥ न हि
न तस्यां रोहिणी सहिताष्टमी॥ यदा सा ज्ञानरे सा जयंतीति की
बलात्तत्र च योगो न तस्य भव मितिमाधवी॥ एवमिष्ठ संहितो
जयंती केनापि क्रियते॥ यथा गुणास्फलं॥ सहामेव ब्रह्मवर्चसकाम

तिवदित्यन्ये॥ तन्न॥ नित्यत्वानुपपत्तेः॥ अतो जयंतीव्रतस्या। पि नि
वासद्वयं कार्यमिति क्रमः॥ अत एव हेमाद्रिमदनरत्नादौ जन्माष्टमी
ती व्रतं चन्निन्नमुक्तं॥ भिन्नकालत्वात्॥ एवं च यातावदंतनिर्णये तिथि
जाष्टवीपरा वाप्यापि रोहिणीयुतैव कार्येति दिवोदासमुक्तं॥ संकरणे चाष्टरा
रोहिणी यदि लभ्यते॥ कर्तव्या सा प्रयत्नेन पूर्वविद्धां विवर्जयेत्॥ इति वचना
शीयरोहिणयन्नावेपरानेस्यात्॥ तन्नारोहिणीकल्पे निविरोधान्मुख्या नावाधः॥ इदं
काम्यमेवेत्यनंतभट्टः॥ तद्दूषणं हेमाद्रौ ज्ञेयं॥ नित्यकाम्यमिति तु वयं॥ अत्र
निशीथवेध एव ग्राह्यः॥ पूर्वोक्तवचनेषु तस्यैव मुख्यकालत्वोक्तेः॥ अष्टमी शि
वरात्रिश्च अर्धरात्रादधो यदि॥ दृश्यते घटिका या सा पूर्वाविद्धा प्रकीर्तिता इति
माधवीये पुराणांतरात्॥ अर्धरात्रे तु रोहिण्यां यदा कृष्णाष्टमी भवेत्॥ तस्यामभ
भ्यर्चनं शौरेर्हंति पापं त्रिजन्मजमिति भविष्योक्तेः॥ अष्टमी रोहिणीयुक्ता निश्य
र्द्धे दृश्यते यदि॥ मुख्यकाल इति ख्यातस्तत्र जातो हरिः स्वयमिति वसिष्ठसंहि शिवः
तोक्तेश्च॥ तत्राष्टमी द्विधा॥ रोहिणीरहिता तद्युता च॥ आद्यापि चतुर्धा॥ पूर्वे ५०
द्युरेव निशीथयोगिनी परेद्युरेव वा तदुभयेद्युरनुभयेद्युश्चेति॥ तत्राद्ययोरसंदे

एवं कर्मकालव्याप्तेः॥ जन्माष्टमी रोहिणी च शिवरात्रिस्तथैव च॥ पूर्वविद्धैव कर्तव्या ति
थिभांते च पारणमिति नारदोक्तेश्च॥ अस्मात् केवलरोहिण्युपवासोपि सिद्धः॥ अंत्ययोः प
रे वा प्रातः संकल्पकालव्याप्तेराधिक्यात्॥ वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमीति ब्रह्म
वैवर्ताच्च॥ एवमंशतः समव्याप्तावपि॥ विषमव्याप्तौ ताधिक्येन निर्णयः॥ रोहिणीयुतापि
चतुर्धा॥ पूर्वेद्युरेव निशी॥ परे रोहिणीयुता परेद्युरेव वा तदुभयेद्युरनुभयेद्युश्च॥ अत्राप्याद्य
योरसंदेहः॥ कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमी॥ इति पाद्मोक्तेः॥ उदयं सा पूर्वविद्धाया
मुपवासं समाचरेदिति गारुडात्॥ सप्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि॥ भविता
साष्टमी पुण्या यावच्चंद्रदिवाकराविति वह्निपुराणाच्च॥ तृतीयपक्षे परैव॥ वर्जनीया प्रय
त्नेन सप्तमीसंयुताष्टमी॥ सर्क्षापि न कर्तव्या सप्तमीसंयुताष्टमीति ब्रह्मवैवर्तात्॥ चतु
र्थेपि द्वेधा॥ पूर्वेद्युर्निशीथे परे ऋक्षरोहिणी परेद्युरष्टमी पूर्वर्क्षरोहिणी॥ उभय
नयस्य निशीथासंबंधो वेति॥ आद्यपक्षे पूर्वैव योगस्य सत्वात्परैवेति माधव
तेनैव॥ यस्मिन्वर्षे जयंत्याख्ययोगो जन्माष्टमी तदा॥ अंतर्भूता जयंत्यां स्यात्
शालितद्वितीयपूर्वविद्धाष्टमीयानुकृदयेन नवमी॥ दिने मुहूर्तमपि संयुक्ता सं
नवेत्ताकंनाकाद्यामुहूर्तापि यदा सप्ताष्टमी तिथिः॥ नवम्यां सैव ग्राह्या

तानहीति पाद्मे। केचित्तु हेमाद्रौ अष्टम्याः प्राधान्यात्तस्याश्च पूर्वेद्युः कर्म
व्यापित्वात्पूर्वैवोपोष्या मन्तु सर्वे ह्निनिशीथेऽष्टम्यन्तावेतद्ध्येयं। अन्ते न योगः किञ्चिन्मत
मित्याहुः। तत्त्वं तु अष्टम्याः कर्मकाल [illegible] दिवा वा यदि वा रात्रौ नास्ति चेद्रोहिणी
युक्तां सकुर्वीतेति पूर्वोक्तवाक्ये रोहिणीयोगाभावेऽप्युक्तत्वात्केवलं च नात्कनकाः
नीस्यत्का पूर्वापरा वा अस्यापि रोहिणीयुता ग्राह्या। माधवमदनरत्ननिर्णयामृतानन्त
भट्टगौडमैथिलग्रंथादिष्वप्येवमिति युक्तं तत्र उपवासद्वयं। द्वयोर्नित्यत्वादिति वयं। अ
ष्टम्याः परे वा सप्तमीसंयुताष्टम्यां नत्वा रुकं हि ज्ञात्वा प्राजापत्यं हित्वीये ह्निमुहूर्तं
न विघटिता दाष्टम्यामिकं पुण्यं प्रोक्तं व्यासादिभिः पुरे तिस्कां द्वात्रिं मुहूर्तैर्नापि संयुता
संपूर्णा साष्टमी न वेत्। किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति पाद्मा ञ्चेति दिक्॥
पारणं तु। तिथिरष्टगुणं हंति नक्षत्रं च चतुर्गुणं। तस्मात्प्रयत्नतः कुर्यात्तिथिभान्ते च पा
रणमिति ब्रह्मवैवर्तात्। तिथ्यृक्षयोर्यदाच्छेदो नक्षत्रान्तमथापि वा। अर्धरात्रेऽपि वा कु
र्यात्पारणं त्वपरेद्युनीति हेमाद्रौ वचनादर्धरात्रे एकतरयांतेऽन्यतरांते वेति मुख्यः पक्षः॥
सर्वेष्वेवोपवासेषु दिवा पारणमिष्यत इति ब्रह्मवैवर्तं त्वन्यविषयं। दिने मुख्यकाल
[illegible] न रात्रौ पारणं कुर्यादिति रोहिणीव्रतान्ततन्निश्च
त्सान्यतरांते वा कुर्यात्। [illegible]

त्रि॰ वः
६२

पितृ कुर्याद्वर्जयित्वा न [illegible] मासमिति ब्रह्माण्डपुराणात्। रात्रौ सार्धप्रहरमध्ये कार्यं। महा
निशा तु विज्ञेया मध्यमं यामयुग्मयोः। तयोर्मध्यमप्रहरे मात्रे विज्ञेया तु महानिशेति
स्मृत्यंतरात्। कश्यपतरो। मदनरत्ने चैवं। कामधेनौ गर्गस्तु। महानिशा तु विज्ञेया मध्यमं
प्रहरद्वयमित्याह। रुद्रधरशातातपस्तु। महानिशा द्वे घटिके रात्रौ मध्यमयामयोः॥ इत्या
ह। वेदपाठपरमेतदित्यन्ये। महानिशायामन्यतरांते तृतीयदिने पारणं। अपरेद्युनीति
पारणाद्बद्दिनपरत्वात्। उभयांतापेक्षणादित्याहुः। तत्त्वं तु महानिशातो वाऽन्यतरां
तश्चान्ने महानिशानिषेधः। महानिशायामेव स्नानेनेतत्रैव पारणमिति। दिवोदासस्तु। र
जनीप्रहरं यावत्प्रवृत्तिः कर्मणो मता। पारणं तावदेवेष्टं प्रमादान्न भवेद्यदि। इति भाषा
र्द्धं निषेधमाह तन्निर्णये। अत्रैकोनुवह्निपुराणे। भांते कुर्यात्तिथेर्वापि शास्त्रं भारतपारण
मिति। गारुडे विष्णुधर्मे च। उदयस्थां सर्वविद्धामुपवासं समाचरेत्। तिथ्यन्ते वा सदा
तेवा व्रती कुर्वीत पारणं। तिथ्यन्ते वा समवान्ते च व्रती कुर्वीत पारणमिति कालादर्शोऽपि
तिसंक्षेपः॥ ॥ अष्टम्यां विधिर्हेमाद्रौ भविष्ये। ततोऽष्टम्यां तिलैः स्नातो नद्यादौ
मले जले सुदेशे शोभनं कुर्याद्देव [illegible] हे। तन्मध्ये प्रतिमा स्थाप्या। सो
धास्कृता। कांचनी राजती ताम्री पैत्तली मृन्मयी तथा॥ वार्क्षी मणिमयी चैव वर्ण

ताप्यवा। सर्वलक्षणसंपूर्णपर्यंके च पटावृते। प्रसुप्तां च प्रसूतां च स्थापयेन् [illegible]
शिमां। तत्र बालकं सुप्तं पर्यंके स्तनपायिनं। यशोदां तत्र चैकस्मिन्प्रदेशे [illegible]
दृश्यकन्यकयेत्पार्श्वे प्रसूतवरकन्यकां। कश्यपो वसुदेवोयमदितिश्चैव देवकी। [illegible]
नशेषो यं यशोदा दितिरन्वन्नंदः प्रजापतिर्द्दक्षो गर्गश्चापि चतुर्मुखः। गोपी [illegible]
वसानवाः शास्त्रपाणयः। लेखनीयश्च तत्रैव कार्त्तिकेयो यमुनाकृदोस्यैवमादिय [illegible]
ष्यतचरितं मम। लेखयित्वा प्रयत्नेन पूजयेद्भक्तितत्परः। मंत्रेणानेन कौंतेय देवकीं [illegible]
न्नरःगायद्भिः किंनराद्यैः सततपरिवृता वेणुवीणानिनादैः भृंगारादर्शकुंभप्रवरकृत
करैः किंकरैः सेव्यमाना। पर्यंके स्वास्तृते या मुदिततरमुखी पुत्रिणी सम्यगास्ते सा देवी
देवमाता जयति सुतनया देवकी कांतरूपा। पादौ संवाहयंती श्रीर्देवक्याश्चरणांतिके। नि
षण्णा पंकजे पूज्या नमो देव्यै श्रियै इति। ओं स्वेतायं समा स्नायस पुष्पकुश चंदनं। जानु
भ्यां धरणीं गत्वा चंद्रायार्घं निवेदयेत्। ततो मंत्रेण वै दद्यात् चंद्रायार्घं समाहितः। [illegible]
रात्रे वसोर्द्धारां पातयेद्गुडसर्पिषा। नाडीवर्धापनं षष्ठी नामादेः करणं मम। क्षीरो शिवः
दार्णवसंभूत अत्रिनेत्र समुद्भव। गृहाणार्घ्यं शशांकेमं रोहिण्या सहितो मम। ज्यो ४२
त्स्नापते नमस्तुभ्यं नमस्ते [illegible] शिपते। नमस्ते रोहिणीकांत अर्घ्यं नः प्रतिगृह्यतां॥ प्र

त्ति।

भाते ब्राह्मणान् भक्त्या [illegible] येच्छक्तिमान्नरः। ॐ नमो वासुदेवाय गोब्राह्मणहिताय च।
शांतिरस्तु शिवस्तु स्वस्तकामा विसर्जयेत्। इदं प्रतिमासं कृष्णाष्टम्यामप्युक्तं। मदनर
त्ने वह्निपुराणे। प्रतिमासं च ते स्नाता अष्टम्यां यः करिष्यति। मम चैवाखिलान्कामान्स
संप्राप्स्यत्यसंशयं। तथा। अनेन विधिना यस्तु प्रतिमासं नरेश्वर। करोति वत्सरं पूर्णं
यावदागमनं हरेः। द्यात्कृष्यांस संपूर्णां गोगीरन्नैरलंकृतां॥ ॥ इति जन्माष्टमीव्र
तं॥ ॥ भाद्रामावास्यायां कुशग्रहणमुक्तं हेमाद्रौ हारीतेन। मासे नभस्यमावास्या
तस्यां दर्भोच्चयो मतः। अयातयामास्ते दर्भा विनियोज्याः पुनः पुनः। नभाः श्रावणः।
तेन दर्शांतमासे जन्माष्टम्यनंतरदर्शो न भ्यते। मदनरत्ने तु। मासे नभस्यमावास्या त
स्यां दर्भोच्चयो मत इति मरीचिवाक्यमुक्तं। नभस्यो भाद्रपदः। तेन मलमासं तर्यातगतदर्शोपि
तो गौणमुख्यचांद्रान्यामेकएवदर्शो इत्यन्ये॥ भाद्रपदशुक्लतृतीयायां हरितालिका
तां तत्र पराग्राह्या। मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे। शुद्धाधिकायामप्येवं ग
गणप्रशंसनादिति माधवोक्तेः। आद्या मधुश्रावणिका कज्जली हरितालिका। [illegible]
मिश्रितास्त्रीणि दिवा नक्ते विधीयते। तृतीया नभसः शुक्ला मधुश्रावणिका [illegible]
नस्य कज्जली कृष्णा शुक्ला च हरितालिकेति दिवोदासोदाहृतवचना [illegible]

क्लचतुर्थ्यां सिद्धिविनायकव्रतं॥ तत्र मध्याह्नव्यापिनी ग्राह्या॥ प्रातः
ले: स्नात्वा मध्याह्ने पूजयेन्नृपतिः इति हेमाद्रौ नवविधेति तत्रैव पूजोक्तेः॥ मध्य
पूर्वा॥ परदिने एकदेशेन साकल्येन वा मध्याह्नव्याप्त्यभावे सर्वपक्षे
ग्राह्या॥ तथा च बृहस्पतिः॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते॥ म
ह्नव्यापिनी चेत्स्यात्परतश्चेत्परेऽहनि॥ मातृविद्धा प्रशस्ता स्यात् चतुर्थी ग
णनायके॥ मध्याह्ने परतश्चेत्स्यात् नागविद्धा प्रशस्यते इति माधवीये स्मृत्य
न्तराच्च॥ इयं रविभौमयोरतिप्रशस्ता॥ भाद्रशुक्लचतुर्थी या भौमेनार्केण
वा युता॥ महती सात्र विघ्नेशमर्चित्वेष्टं लभेन्नर इति निर्णयामृते वाराहे
के:॥ अत्र चंद्रदर्शनं निषिद्धं॥ तथा चापरार्के मार्कंडेयः॥ सिंहादित्ये शुक्लप
क्षे चतुर्थ्यां चंद्रदर्शनं॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं सदा इति॥ चतु
र्थ्यां न पश्येदित्यन्वयः॥ प्रधानक्रियान्वयलाभात्॥ तेन चतुर्थ्युदितस्य
पंचम्यां न निषेधः॥ गौडास्त्वेवमाहुः॥ पराशरोपि॥ कन्यादित्ये चतुर्थ्यां तु शिवः
शुक्ले पक्षे चंद्रस्य दर्शनं॥ मिथ्याभिदूषणं कुर्यात्तस्मात्पश्येन्न तं तदा॥ तद्दोषशांत ४३
ये सिंहः प्रसेनमिति वै पठेदिति॥ श्लोकस्तु विष्णुपुराणे॥ सिंहः प्रसेनमवधी

त्सिंहो जांबवता हतः॥ सुकुमारक मारोदीस्तव ह्येष स्यमंतक इति॥ ॥भा
द्रशुक्लपंचमी ऋषिपंचमी॥ ॥सा मध्याह्नव्यापिनी ग्राह्या॥ पूजा सर्वेषु व्र
तेषु मध्याह्नव्यापिनी तिथिरिति माधवीयहारीतोक्तेः॥ दिनद्वये तत्त्वे हेमाद्रि
मते परा॥ सिता पक्षयुता स्यात्पंचमी तिद्दीपिकोक्तेः॥ माधवमते तु सर्व
त्र पंचमी पूर्वा इत्युक्तेः॥ ऋषिपंचमी षष्ठीयुते वेति दिवोदासः॥ युग्मवाक्यान्नि
र्णयस्तु युक्तः॥ अत्र ऋषीन्प्रतिमासु पूजयित्वाऽकृष्टमिश्यामाकेन वर्तनं॥
एवं सप्तवर्षाणि कृत्वा सप्तसु कलशेषु प्रतिमासु संपूज्य परेऽह्नि तन्मंत्रेण होमः स
प्ततिलान्हुत्वा सप्तब्राह्मणान्भोजयेदिति निर्णयामृते॥ भाद्रशुक्लषष्ठी सू
र्यषष्ठी॥ सा सप्तमीयुतेति दिवोदासः॥ शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करभोजनं
प्राशनं पंचगव्यस्य अश्वमेधफलाधिकमिति वचनात्॥ कल्पतरौ भविष्ये
ये भाद्रपदे मासि षष्ठी स्याज्जरतर्षभ॥ यो स्यां पश्यति गांगेयं दक्षिणापथवा
॥ ब्रह्महत्यादिपापेभ्यस्तु मुच्यते नात्र संशयः॥ गांगेयः स्वामिकार्त्तिकेयः
भाद्रशुक्लाष्टमी दूर्वाष्टमी॥ ॥सा पूर्वा ग्राह्या॥ श्रावणी दुर्गनवमी दू
कृताशिनी॥ दूर्वा विद्धा न कर्तव्या शिवरात्रिर्बलेर्दिनमिति हेमाद्रौ

के॥ शुक्लाष्टमीतिथिर्या तु मासि भाद्रपदे भवेत्॥ दूर्वाष्टमीति सा ज्ञे
रा सा विधीयत इति पुराणसमुच्चये॥ यत्तु मुहूर्त्तरोहिण्यां पूर्वा
द्विद्वा परा॥ दूर्वाष्टमी तु सा कार्या ज्येष्ठां मूलं च वर्जयेदिति तत्रैव पराके
के॥ तत्पूर्वदिने ज्येष्ठादियोगे द्रष्टव्यं॥ दूर्वाष्टमी सदा त्याज्या ज्येष्ठामूल
संयुता॥ तथा॥ ऐन्द्रे हुतभुजि ताडूर्वा हित्वा पत्यानि नान्यथा॥ नक्षत्ररायुहरा म
पदे भा ता परिवर्जयेदिति तत्रैव तन्निषेधात्॥ इदमगस्त्योदये कन्यार्के च न का
र्यं॥ शुक्ले भाद्रे मासि दूर्वा सिंहस्थ याष्टमी॥ सिंहार्क एव कर्त्तव्या न कन्यार्के करा
चन॥ सिंहस्थे सौरमासस्य चेत्तु दिते मुनिसत्तमे इति मदनरत्ने स्कांदोक्तेः॥ अग
स्त्ये उदिते नात स्त्वर्जयेद्भक्तो दूर्वां॥ वैधव्यं पुत्रशोकं च दश वर्षाणि पंच च ति
तस्त्रैव दोषा उक्ताः॥ नाभक्तिकाष्टम्या मगस्त्योदये ना विनिमत्ति दूर्वदक्षाम एव
ष्टम्यामेवेति कार्यादिति हेमाद्रिः॥ दीपिकायेव॥ इदं च व्रतं स्त्रीणां नित्यं॥ यामसृज
यते दूर्वां मोहादिह यथा विधि॥ त्रीणि जन्मानि वैधव्यं लभते नात्र संशयः॥ त शिवः
स्मात्संपूजनीया सा प्रतिवर्षं वधूजनैरिति पुराणसमुच्चयात्॥ यदा ज्येष्ठादि
कं विनाष्टमी न लभ्यते तदा तत्रैवोक्तं॥ कर्त्तव्या चैकनक्षत्रेण ज्येष्ठामूलयंयदा ५५

भवेत्॥ दूर्वमिन्द्रयेऽष्टम्या सर्वं ध्यं दिवसं नयेदिति॥ अत्र विधिर्मदनरत्ने
भविष्ये॥ शुचौ देशे प्रजातायां दूर्वायां शालिलोत्तम॥ स्थाप्य लिंगं ततो गंधैः पु
ष्पैर्धूपैः समर्चयेत्॥ दध्यक्षतैर्द्विजश्रेष्ठ अर्घं दद्यात्त्रिलोचने॥ दूर्वाशमीभ्यां वि
धिवत्पूजयेच्च दद्यात्प्रचितः॥ मंत्रस्तु॥ त्वं दूर्वेऽमृतजन्मासि वंदिता सिसुरासु
रैः॥ सौभाग्यं संततिं देहि सर्वकार्यकरी भव॥ यथा शाखाप्रशाखाभिर्विस्त
तासि महीतले॥ तथा ममापि संतानं देहि त्वमजरामरे॥ अत्रा
नग्निपक्वं भक्षयेत्॥ अनग्निपक्वमश्नीयाद्दध्ना दधिफलं तथा॥ क्षारस्य वर्णं अ
लन्त्यक्त्वा यान्मधुनाचितमिति तत्रैव भविष्योक्तेः॥ भाद्रपदे धिमाससाति नि
यदीप स्कांदे॥ अधिमासेन तु संप्राप्ते नभस्य उदये मुनेः॥ अर्वाक् दूर्वाव्रतं का
र्यं परतो नैव कुत्रचित्॥ अत्रैव ज्येष्ठापूजो स्कामाधवीये स्कांदे॥ मासि भा
पदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता॥ रात्रिर्यास्मिन्दिने कुर्याज्ज्येष्ठायाः परि
ति॥ इयं ज्येष्ठा योगवशान्न पूर्वा परा वा ग्राह्या॥ दिनद्वययोगे परा॥
रात्रियोगे पूर्वैव॥ नवम्या सह कार्या स्यादष्टमी नात्र संशयः॥ मा
पदे शुक्लपक्षे ज्येष्ठर्क्षसंयुता॥ रात्रिर्यास्मिन्दिने कुर्याज्ज्येष्ठायाः प

नमितितत्रैवोक्तेः॥ अस्यापवादः॥ यस्मिन्दिने न वेत्ज्येष्ठामध्याह्ने[illegible] मपरा[illegible]
न्हविषं पूजाचन्यत्ना चेत्सर्ववासरे इति॥ इदं केवलतिथौ न तु तत्रैवोक्तेः॥ तच्चाध[illegible]
तिथौ [illegible]र्ये॥ अत्यं केवलतिथौ॥ तदुक्तं माधवीये॥ प्रत्याब्दिकतिथ्याद्युक्तम्[illegible]
वतंव्रतं॥ प्रति ज्येष्ठाव्रतंयच्चविहितं केवलोदुनि॥ तिथ्यावेवान्वेषेदा घंदितीयकं[illegible]
तइति॥ अतएवमदनरत्ने नविष्ये॥ नक्षत्रमात्रेउक्तं॥ मासि भाद्रपदे पक्षे शुक्ले ज्ये[illegible]
यदा भवेत्॥ रात्रौ जागरणं कृत्वा एभिर्मंत्रैः प्रपूजयेदिति॥ दाक्षिणात्यास्तु सएव[illegible]
ति॥ हेमाद्रौ स्कांदेपि॥ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुता॥ यस्मिन्कस्मिन्दिने कुर्यात्
ज्येष्ठायाः परिपूजनमिति॥ भतथामेत्रेण[illegible]वाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत्॥ मूले
विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तममिति॥ मंत्रस्तु॥ एह्येहि त्वं महाभागे सुरासुरनमस्कृते॥
ज्येष्ठेत्वं सर्वदेवानां मत्समीपगता भव॥ त्वावाह्यो तामग्निवर्णामिति संपूज्य॥ ज्येष्ठायै
तेनमस्तुभ्यं श्रेष्ठायै ते नमो नमः॥ शर्वायै ते नमस्तुभ्यं शांकर्यै ते नमो नमः॥ ज्येष्ठश्रे
ष्ठेतपोनिष्ठे ब्रह्मिष्ठे सत्यवादिनि॥ एह्येहि त्वं महाभागे अर्घ्यं गृह्ण सरस्वतीति मंत्रः॥
॥ ॥भाद्रशुक्ले द्वादश्यां श्रवणयोगरहितायां पारणं कुर्यात्॥ यत्तु काम्यमित पक्षेपु
इति दिवोदासोदाहृतवचनात्॥ उपोष्य द्वादशीं मोहात्पारणं श्रवणे यदि॥ करोति द्वं

श्रा॰व॰
४५

तिनसुलभं द्वादशद्वादशीभिर्व्रतमिति तत्रैवस्कांदाच्च॥ अस्यतत्रैवप्रतिप्रसवः॥
मार्कंडेयः॥ चि[illegible]शेषेण महीपाल श्रवणं वर्द्धते यदि॥ तिथिक्षयेन तो नेत्वं द्वाद
शी लंघयेन्नरः॥ इति॥ केचित्तु यदा त्वपरिहार्यो योगस्तदा श्रवणनक्षत्रे श्रेषाविनं
मध्यमविंशति घटिका योगं त्यक्त्वा पारणं कार्यं॥ तदुक्तं विष्णुधर्मे॥ ऋतेश्चमध्यप
रिवर्त्तमिति सुप्तप्रबोधयत्परिवर्त्तनमेव वर्ज्यमिति॥ केचित्तु तद्विनक्षत्रमध्य
पादद्वयं वर्ज्यमाहुः॥ अत्रमूलं चिंत्यं॥ अत्रैव विष्णुपरिवर्त्तनोत्सवं कुर्यात्॥ संध्या
यां विष्णुं संपूज्य प्रार्थयेत्॥ मंत्रस्तु तिथितत्त्वे उक्तः॥ वासुदेव जगन्नाथ प्राप्तेयं
द्वादशी तव॥ पार्श्वेन परिवर्त्तस्व [illegible]खं स्वपिहि माधवेति॥ अत्रैव शक्रध्वजोत्थानमु
क्तं मदनरत्ने गर्गेण॥ द्वादश्यां तु[illegible]प द्दे मासि प्रोष्ठपदे तथा॥ शक्रमुत्थापये[illegible]
जो विष्णुश्रवणवासरे वा॥ इयमेव श्रवणद्वादशी॥ तत्रैकादश्यां द्वादशीश्र[illegible]
णायोगे सैवोपोष्या॥ एकादशी द्वादशी च वैष्णव्यमपि तत्र च वा॥ तद्विष्णु[illegible]
नाम विष्णुसायुज्यकृद्भवेदिति विष्णुधर्मोक्तेः॥ नारदीयेपि॥ संस्पृ[illegible]
राजन् द्वादशीं यदि संस्पृशेत्॥ श्रवणं ज्योतिषां श्रेष्ठं ब्रह्महत्यां व्यपोहति॥[illegible]
श्रवणस्पृष्टा स्पृशेदेकादशीं यदि॥ सएव वैष्णवो योगो विष्णुशृं[illegible]

इति हेमाद्रौ मात्स्योक्तेश्च ॥ दिनद्वये द्वादशी श्रवणयोगे पूर्वा ॥ निर्णयामृते [illegible]
वार्द्धमन्यथापरेति ॥ द्वादशी श्रवणर्क्षं च स्पृशेदेकादशी यदि ॥ तेन [illegible]
एकादश्यां श्रवणयोगाभावेपि तद्युत द्वादशीयोगमात्रेण विष्णुशृंखलं [illegible]
निर्णयामृते तन्मते तु श्रवणस्यैकादशी द्वादशीभ्यां योगे एव विष्णुशृंखलं [illegible]
ति ॥ यदा निशीथानंतरं सूर्योदयावधि द्विकलामात्रमपि श्रवणर्क्षं [illegible]
तदापि पूर्वैव ॥ तदुक्तं तत्रैव नारदीये इमां प्रक्रम्य ॥ तिथिनक्षत्रयोर्योगो योगश्चैव
नराधिप ॥ द्विकलो यदि लभ्येत स ज्ञेयो ह्याष्टयामिक इति ॥ द्वादशी श्रवणस्पृष्टा
स्पृष्टाप्युपोष्यतमा तिथिः ॥ न तु सा तेन संयुक्ता तावत्येव प्रशस्यत इति मदनर
त्ने मात्स्याच्च ॥ दिवोदासीये तु ॥ रात्रेः प्रथमपादे चेच्छ्रवणं हरिवासरे ॥ तदा पूर्वा
मुपवसेत्प्राप्तनौ तेन च पारणमित्युक्तं ॥ इदं तु निर्मूलत्वात्पूर्वविरोधाच्चोपेक्ष्यं ॥
इयं बुधवारेतिप्रशस्ता ॥ बुधश्रवणसंयुक्ता सैव चेद्द्वादशी भवेत् ॥ अत्यंतमहती
सा स्याद्दत्तं भवति चाक्षयमिति हेमाद्रौ स्कांदात् ॥ यानि तु पठंति ॥ उत्तराषाढसौमि शि॰ः
श्राश्रोणा मध्याङ्गा पिवा ॥ आसुरी सेवतारास्याद्दितिभुक्ता पुरा दत्ता ॥ उदय ४६
व्यापिनी ग्राह्या श्रोणा द्वादशी संयुता ॥ विद्धेऽपि संयुता सा चेत्तत्रैवोपोष्या बुधैः सदा

रित्यादीनि वचनानि तानि निर्मूलानि ॥ यदपि मत्स्यपुराणे उदयव्यापिनी ग्रा
ह्येत्युक्तं ॥ यच्च बृहन्नारदीये ॥ उदयव्यापिनी ग्राह्या श्रवणद्वादशी व्रते इति ॥ तच्च
द्वादशी वृद्धिका द्वादशी परदिने एवोदये श्रवणयोगः ॥ इदं विद्धे च तद्भिन्ने काले योगा
त्तत्परं ॥ दिनद्वये उदययोगे पूर्वैव ॥ तदुक्तं कर्मकालव्याप्तेरित्युक्तं मदनरत्ने ॥ य
दा त्वेकादश्येव श्रवणयुता न द्वादशी तदापि पूर्वैव ॥ यदा न प्राप्यते ऋक्षं द्वादश्यां वै क
दाचित् ॥ एकादशी तदोपोष्या पापघ्नी श्रवणान्वितेति मदनरत्ने नारदीयोक्तेः ॥ यदा
परविद्धैव सुतरां पुनः परा ॥ तत्र शक्तेनोपवासद्वयं कार्यं ॥ एकादशीमुपोष्यैव द्वादशीं समु
पोषयेत् ॥ न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिरिति विष्णुधर्मोक्तेः ॥ यत्तु विष्णुधर्मो
क्तेः ॥ पारणांतं व्रतं ज्ञेयं व्रतांते द्विजभोजनं ॥ असमाप्ते व्रते पूर्वे नैव कुर्याद्व्रतांत
रमिति ॥ तदेतद्भिन्नपरं ॥ अत्र गौडाः ॥ [illegible] परं काम्यं श्रवणद्वादशी [illegible]
मिति स्मृत्यर्थवचनात्काम्यमेवेदं ॥ तेनाशक्तस्य नित्यैकादशी व्रतमेव [illegible]
ते ॥ द्वादश्यामुपवासेन [illegible] अन्यपसर्वशः ॥ चक्रवर्तित्वमतुलं स
मुल्लां श्रियमिति गौडनिबंधे मार्कंडेयोक्तेश्च ॥ दाक्षिणात्यास्तु ॥ एकादशी [illegible]
द्वादश्यां समुपोषयेत् ॥ व्रतद्वयस्य तंत्रेण [illegible] सर्वं प्राप्तेत्याहुः समयमि [illegible]

वामनपुराणे स्कंदे:॥ श्रवणद्वादशी व्रतमेवेत्याह:॥ मुक्त्वेति फलाद्याहा
राश्रितानि इति निषेधात्॥ उपवासः स्वयंकर्तुं न शक्नोति नरो यदि॥ प्रश
आहारी निराहारो परेहनीति दिवोदासीये नविष्ण्वोक्तेश्च॥ अप्येको
दशी व्रतोथ सत्प्रत्यकं मात्स्ये॥ द्वादश्यांश्रुकपक्षे तु नक्षत्रं श्रवणं यदि॥ उप
कादशी तत्र द्वादश्यां प्रकुर्याद्धरिमिति॥ प्रकुर्यान्नात्र उपवसेदित्यर्थः॥ एका
दशी व्रतश्चेदेकादश्यां तु त्यक्त्वा द्वादश्यामुपवसेत्॥ एवमेकादशी त्यक्त्वा द्वादशी
मुपोषयेत्॥ पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयमिति नारदीयोक्तेः॥ पारणं तु
नयोरन्यतरांते वा कुर्यात्॥ तिथिनक्षत्रनियमे तिथिनक्षत्रांते च पारणमिति स्कां
दात्॥ तिथिनक्षत्रसंयोगे उपवासो यदा भवेत्॥ पारणं तु न कर्तव्यं यावन्नैकस्य
रनि ५ संक्षयं नारदीयादिति हेमाद्रिः॥ यत्तु भनक्षत्रमात्रांतेपि पारणं प्रतिभाति त
थापि तिथिमात्रांते ज्ञेयं॥ न तु रुक्षांते तिथिमध्येपि॥ याः काश्चित्तिथयः प्रोक्ताः पु
ण्या नक्षत्रयोगतः॥ रुक्षांते पारणं कुर्याद्विना श्रवणरोहिणीमिति विष्णुधर्मेश्रव शिवः
णांतमात्रे पारणनिषेधात्॥ रोहिण्यां तु तेंते कुर्यान्निषेधोपीति वह्निपुराण त्र (४९)
ईते पक्षस्तु॥ न त्वत्रैवमस्तीति निरुक्षांते तु कल्प इति मदनरत्ने॥ यत्तु मदनरत्ने॥

द्वादशी क्षयेनक्षत्रे श्रवणक्षयेवा श्रवणांते एव पारणं कुर्यात्॥ पारणं तिथिवृद्धौ तु द्वादश्यामनु
तुसंक्षयात्॥ वृद्धौ कुर्यात्त्रयोदश्यां तत्र दोषो न विद्यते इति वह्निपुराणादित्युक्तं॥ तदेतत् कर
णादेतस्यामेव श्रवणैकादश्यां विहितविजयैकादशीव्रतपरं न तु श्रवणद्वादशीपरमि
ति मदनरत्ने गौडास्तु श्रवणद्वादशी परमाहुः॥ अत्र विधिर्मदनरत्ने विष्णुधर्मे॥ तस्मि
न्दिने तथा स्नानं यच्च कृष्णसंगमे तथा॥ दध्योदनयुतं तस्यां जलपूर्णं घटं द्विजे॥ वस्त्रसंवे
ष्टितं दत्वा छत्रोपानहमेव च॥ न दुर्गतिमवाप्नोति गतिमग्र्यां च विंदति॥ मंत्रस्तु भविष्ये॥ घटे
जनार्दनं पूजां मनिक्षायां न मो नमस्ते गोविंद बुधश्रवणसंज्ञक॥ अघौघसंक्षयं कृत्वा सर्व
सौख्यप्रदो भव॥ प्रीयतां देवदेवेशो मम संशयनाशनः॥ वामनावतारनिमित्तोपवास
स्तु व्रतरत्नाद्यो भविष्ये॥ द्वादश्यां लिविधिः प्रोक्तः श्रवणेन युधिष्ठिर॥ सर्वपापप्रशमनः
सर्वसौख्यप्रदायकः॥ एकादशी यदा सा स्यात् श्रवणेन समन्विता॥ विजया सा तिथिः प्रो
क्ता नं विजयप्रदेति पक्षस्य॥ यथकाले बकुतिथि गतेसा गुर्विणी भवतस्तुप...
मेमासि पुत्रं सा वामनं हरिमिनित्प्राग्रकल्के॥ एतत्सर्वं समभवद्द्वादश्यां युधि...
ष्टादेवदेवस्य सर्वथा विजयातिथिः॥ एषा च कष्टिः समाख्याता एकादश्यामया...
भवस्समाख्याता द्वादशी श्रवणान्विता॥ अ... द्वादश्यां मुहूर्तेनिजितिप्र...
व्रतानाम्याद्य कुल्लजन्मद्दक्षिणां॥ द्वादश्यां समविनातिष्ठन्मध्यंदिनगतान्यपा...

मस्याश्रोत्रायस्यांजन्मविष्णुर्हरेः। श्रोणायांचंद्रेऽभिजितिश्रवणत्रयमेवारा [illegible]
येद्वा। अत्रकल्पनेदाद्यवस्त्रा। तद्विधिश्चेत्ना। तच्चवह्निपुराणे। नदीनांसंगमेस [illegible]
येद्यत्रवामनं। सौवर्णंवस्त्रसंयुक्तंद्वादशांगुलमुच्छ्रितं। ततोविधिवत्संपूज्य [illegible]
नपात्रेणदद्यादर्घ्यंप्रयत्नतः। नमस्तेपद्मनाभायनमस्तेजलशायिने। तुभ्यं [illegible]
त्वामिबालवामनरूपिणे। नमःकमलकिंजल्कपीतनिर्मलवाससे। महाहवरिपु [illegible]
ष्टतस्कंधायचक्रिणे। नमःशार्ङ्गासिबाणपाणयेवामनायच। यज्ञभुक्फलदात्रेचवा
मनायनमोनमः। देवेश्वरायदेवायदेवसंभूतिकारिणे। प्रभवेसर्वदेवानांवामनाय
नमोनमः। एवंसंपूजयित्वातंधारयेज्जागरंनरः। प्रभातेसहितंतंतुब्राह्मणायनिवे
दयेत्॥ वामनःप्रतिगृह्णातिवामनोहंददामिते॥ वामनंसर्वतोभद्रंद्विजायप्रतिपाद
येइति॥ अनंतभट्टोप्याह। श्रवणद्वादश्यांजनार्दननामाविष्णुःपूज्यते। श्रवणेकाद
श्यांवामनावतारइति। श्रवणयुतशुक्लैकादश्यभावेतुरत्नमालायां। विष्णोःश्रवणयुताद्वा
र्यांद्वादश्येकादशी। यत्रसानिष्पोष्या नवमीतिथिः। श्रवणेनतुसंयुक्तासाचेत्स्यात्सर्वकामदे शिवः ४८
तिवह्निपुराणादित्यर्थःमदनरत्ने। पञ्चगव्यंमध्याह्नेकार्यं। अन्नाभावेवामनोरामरामा
वितिपूर्वोक्तिवचनात्। भागवतामृते। अत्रैवदुग्धव्रतंसंकल्पयेत्। तदुक्तं। दधिदुग्धादी
नामपिवर्जनापत्तेः। नचमत्रप्रकृतिरसापत्तेः। नमस्तव्रतदर्जनमितिवाच्यं। मांसविकार

३।४।२ दुग्धमासेप्युजमासीति। अत्रेदंचिंत्यते। दुग्धव्रतेपायसादिवर्ज्यंनवेति।

२ नेतिकेचित्। नहिप्रकृतिवर्जनेविकारवर्जनंयुक्तं।

नह्य

स्योष्टदध्यादेश्चावर्जनापत्तेः। तस्माद्दध्यादिवत्पायसादिवर्ज्यमिति। अत्रब्रूमः॥ यत्रविका
रप्रकृतिरसोपलंभेनसत्वप्रत्यभिज्ञा तत्रविकारस्यापिनिषेधः। अस्तिचमांसविकारेमांस
सत्वप्रत्यभिज्ञा मांसत्वानपायात्। यत्तु अष्टदध्यादेरनिषेधापत्तिरिति। तन्न। अष्टमितिविका
रतद्धितेननिषेधात्। तथाचविज्ञानेश्वरः। अष्टमकक्षापर्णस्वरणमारण्यकमध्याद्विकल्पि
त्यत्रअष्टमितिविकारतद्धितात्। अतएवजन्माष्टम्यादिनामपिनिषेधइत्याहुः॥ नन्वेवंसंधिन्यानिर्दशा
याःगोःपयःपरिवर्जयेदितिसंधिन्यादिक्षीरनिषेधेपिदध्यादियत्नुस्यात्॥ सत्यंप्राप्तं॥
वचनेनपरंनिषेधः। तदाहापरार्केशंखः। क्षीराणियान्यभक्ष्याणितद्विकाराशनेबुधः। स
प्तरात्रंव्रतंकुर्यात्प्रयत्नेनसमाहितइति। व्रतंगोमूत्रयावकं। तस्मात्पायसे [illegible] रसोपलंभा
वर्जनं। अतएवामिक्षायांदधिसत्वेपिमाधुर्योपलंभात्स्वयारूपमुत्वकंभीमांसकैः। तदुक्तं
पयएवयनीं। हतमामिषेत्यनिर्धार्यतेइति। दध्यादिषुतुतदभावान्नवर्जनमिति।
इतिदुग्धव्रतं॥ ॥भाद्रशुक्लचतुर्दश्यामनंतव्रतं॥ ॥तत्रत्रिमुहूर्तापि [illegible]
यतिमाधवः। तदुक्तं। उदयेत्रिमुहूर्तापिग्राह्यानंतव्रतेतिथिरिति। मध्याह्न [illegible]
यामितिकश्यपः। श्रवणर्क्षेपिसर्वेदवाश्चधारयतीतिवह्निकल्पनात् [illegible]
तिषुमध्याह्नव्यापिनीतिथिरितिमाधवीयेवचनात्मध्याह्नव्यापिनीया [illegible]

लु

रासः। प्रतापमार्तंडेप्येवं। निर्णयामृते तु घटिकामात्राप्यौदयिकी त्व[illegible]
दस्यां ते चतुर्दश्यां द्विजोत्तम। पौर्णमास्याः समायोगे व्रतं चानंतकं चरेदिति ना[illegible]
मुहूर्तमपि चेद्भाद्रे पूर्णिमायां चतुर्दशी॥ संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुम[illegible]
स्कांदाच्चेति। अत्र मूलं चिंत्यं। औदयिकत्वे पूर्णत्वात्पूर्वेतियुक्तं॥ ॥ अथागस्त्या[illegible]
तत्कालो व्रतहेमाद्रौ भविष्ये॥ कन्यायामगते सूर्ये अर्वाग्घेव सप्तमे दिने। कन्यायां सम[illegible]
प्राप्ते ह्यर्घ्यकालो निवर्तते इति। तत उदयोत्तरं सप्तदिनमध्येऽर्घ्यः। यत्तु माधवे। आमम रा
उदयादग्रमस्य दातव्यमेतत्सकलं नरेण यावत्समाः सप्तदशाप्यवाप्य फलं स्याद्बृहमप्यत्र व
दंति केचित्तद्यमस्यागस्त्यस्य उदयकालेषु दिवोदासीये उक्तं। उदेति याम्यां हरिसंक्रमा
द्वरे काधिके विंशतिभे ह्यगस्त्यः। सप्तदशसप्तमेस्तं वृषसंक्रमाच्च प्रयाति गर्गादिभिरन्यथा
णि। अत्र विधिर्विष्णुरहस्ये। काशपुष्पमयीं रम्यां कृत्वा मूर्तिं तु वारुणेः। प्रदोषे विन्यसेत्
तु पुष्पधूपविलेपनैः। दध्यक्षतबलिं दद्याद्रात्रौ कुर्यात्प्रजागरं। पूजा च वक्ष्यमाणार्घ्यमं
त्रेण कार्या। प्रभाते तं समादाय यायात्तु र्नपजलाशयं। निशावसाने तां पश्यन् जलांते
प्रतिमां मुनेः। अर्घ्यं दद्यादगस्त्याय तेन्यासम्यगुपोषितः। भविष्ये। विरूढैः सप्तधान्यै
श्च वंशपात्रे निधापितैः। सौवर्णरूप्यपात्रेण ताम्रवंशमयेन वा। म[illegible]स्थितेन न[illegible] शिवः ५९।

तृ४

धरणी
ण्डानुत्त्यामवनीगतः। काशपुष्पप्रतीकाश वह्निमारुतसंभव। मित्रावरुणयोः पुत्र कुं
भयोने नमोस्तु ते। वातापिर्भक्षितो येन समुद्रः शोषितः पुरा। लोपामुद्रापतिः श्रीमान्यो
सौ तस्मै नमो नमः। येनोदितेन पापानि विलयं यांति व्याधयः। तस्मै नमोस्त्वगस्त्याय स
शिष्याय सपुत्रिणे। अगस्त्यः खनमानेति विप्रायार्घ्यं विनिवेदयेत्॥ दत्त्वैवमर्घ्यं कौरव्य प्र
णिपत्य विसर्जयेत्॥ अर्चितस्त्वं यथाशक्त्या नमोगस्त्य महर्षये। ऐहिकामुष्मिकीं दत्त्वा का
र्यसिद्धिं व्रजस्व मे। विसर्जयित्वागस्त्यं तु तं विप्राय प्रतिपादयेत्॥ अगस्त्यो मे मनःस्थो
स्त्वगस्त्यो त्वस्मिन्घटे स्थितः। अगस्त्यो द्विजरूपेण प्रतिगृह्णातु सत्कृतः। दानमंत्रः। अ
गस्त्यः सप्तजन्मार्घं नाशयत्वावयोरयं। अनुलंबि मलं सोयं प्रयच्छ त्वं महामुने प्रतिग्र
हमंत्रः। विष्णुरहस्ये। त्यजेदगस्त्यमुद्दिश्य धान्यमेकं फलं रसं। होमं कृत्वा ततः पश्चा[illegible]
येन्मानवः फलं। होममंत्रस्त्वर्घ्यमंत्रेणाज्येनेति भविष्ये। दत्त्वार्घ्यं सप्त वर्षाणि क्रमेणाने[illegible]
व ब्राह्मणः स्याच्चतुर्वेदः क्षत्रियः पृथिवीपतिः। वैश्यश्च धान्यनिष्पत्तिः शूद्र[illegible]
न्नवेत्। यावदायुस्त्वयः कुर्यात्स परं ब्रह्म गच्छति॥ ॥ इत्यगस्त्यार्घ्यः॥ ॥[illegible]
प्रपितामहात्परास्त्रीणामुद्दिश्य श्राद्धं कार्यं। तदुक्तं हेमाद्रौ ब्राह्ममार्कंडेययोः। नी[illegible]
प्रत्यब्दं कन्याराशिगते रवौ। पौर्णमास्यामनुक्रम्येवं वराहवचनं यत्पेति। नी[illegible]

ॐ ब्राह्मो पितापितामहश्चैव तथैव प्रपितामहः। त्रयो ह्यश्रुमुखा ह्येते पित[...]
[...]र्तिताः। तेभ्यः पूर्वतरा ये च प्रजावंतः सुखैधिताः। ते तु नांदीमुखा नांदी सम[...]
ताः एतत्तत्प्रत्यब्दमित्यर्थः। पक्षश्राद्धप्रदेशे सत्त्वन्महालयप्रसंगेनावश्यकमि[...]
[...]द्धातो। अत्र मातामह्या अपि कार्यः। पितरो यत्र पूज्यंते तत्र मातामह्यपि [...]
पितृश्राद्धस्य च जनकपरत्वे बहुवचनविरोधेन पितृनामावापन्नपरत्वान्नावार्षिकत्वे
वचनान्निवृत्तिः। न च जीवत्पितृकस्यान्वष्टकायां मातृश्राद्धं तत्रापत्तिः। इष्टापत्तेः। अ
त एव समुक्तं श्राद्धेषु स्वमातृमातामह्योर्दद्यादिति मदनरत्ने कात्यायनदर्शो। एतज्जीव
त्पितृकश्राद्धं वक्ष्यामः। केचित्तु अजरुद्धत्वहारण्यापि श्राद्धयोय तत्र मातामहास्ते ना
त्रनेत्याहुः। न चात्र नाम्ना नांदीश्राद्धधर्मातिदेशः। वेक्षवादिशाखं वैदवतापरस्यक
र्मनामत्वान्नावालन्नांदीमुखत्वं पितृविशेषणे पारिभाषिकत्वादिति दिक्। तत्पानि
र्णयदीपे गार्ग्यः। पौर्णमास्यां तु मवास्तु निषिद्धं पिंडपातनं वर्जयित्वा प्रोष्ठपदीं यथा त्रि॰व॰ ५०
दशोस्तत्पैव संसेति॥ ॥इति श्रीमीमांसकरामकृष्णभट्टात्मजकमलाकरभट्टकृते
निर्णयसिंधौ भाद्रपदमासः॥ ॥ ॥ॐ॥ श्री॥ कन्यासंक्रमे पराः षोडशघटि
काः पुण्याः। शेषं प्राग्वत्। अथ महालयः॥ ॥तत्र पृथ्वीचंद्रोदये हेमाद्रौ च [...]नुः आषाढी

मवधिं कृत्वा पंचमं पक्षमाश्रिताः। कांक्षंति पितरः क्लिष्टा अन्नमप्यन्वहं जलं॥
कन्यायोगः पुण्यतमत्वमाह शाट्यायनिः। कन्यास्थार्केन्वितः पक्षः सोत्यंतपुण्य उच्य[...] तं२
ते॥ अत्र विशेषमाह कद्रमनुः। मध्ये वा यदि वापर्यंते यत्र कन्यां व्रजेद्रविः॥
स पक्षः सकलः श्रेष्ठः श्राद्धषोडशकं प्रति॥ तथा ब्रह्मांडमार्कंडेययोः। कन्यागते
सवितरि दिनानि दश पंच च। पार्वणेनेह विधिना श्राद्धं तत्र विधीयते॥ तथा तत्रै
व षोडशदिनान्येकानि। कन्यागते सवितरि यान्यहानि तु षोडश। क्रतुभिस्तानि
तुल्यानि देवो नारायणोब्रवीत्। अत्र हेमाद्रिः षोडशत्वं व्याचख्यौ। तिथिवृ
द्धापक्षस्य षोडशदिनत्वे श्राद्धानि स्यर्थमित्येकः पक्षः। नात्र पूर्णिमया सहो[...]
द्वितीयः। आश्वयुक्प्रतिपदा सहेति तृतीयः। अंत्य एव युक्तः। अत्र [...]
शाके यत्र तु प्रतिपदा सह। चंद्रक्षयविशेषेण सापि दर्शात्मिका स्मृत[...]
लोके। अत्र पंचपक्षाः। तदुक्तं हेमाद्रौ ब्राह्मे। आषाढ्याः पंचमे पक्षे उ[...]
दिने दिने। त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव वा। दिने दिने इति प[...]
श्चकं। त्रिभागहीनमिति पंचम्यादिपक्षः। [...]क्तं। तिथिमारभ्य [...]

र्कसंगममिति वाक्यात्॥ अर्द्धमित्यष्टम्यादिपक्षः॥ त्रिनागमिति द
त्रिनागहीनमिति चतुर्दशीसहितप्रतिपदादिचतुष्टयवर्जनात्रिम
कल्पतरुः॥ अत्र दिनपदं तिथिपरं॥ वीप्सया तत्पक्षीयतिथित्वं श्राद्ध
तावच्छेदकं॥ तेन पंचदशतिथिष्वपि श्राद्धं सिध्यति॥ तेन चतुर्दशी निषेध
त्कृष्णपक्षपरमिति गौडाः॥ तन्न॥ श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महालय
त्यादिविरोधात्॥ यत्तु कश्चित्॥ इरणप्रत्ययलोपेन तृतीयत्रिनागहीनं षष्ठ्यादि॥
पक्षः तृतीयत्रिनागमेकादश्यादि॥ तदर्द्धं त्रयोदश्यादि॥ उत्तरोत्तरं लघुकालोक्तेरि
ति॥ तन्न॥ गौतमादिवशेन मूलकल्पनालाघवात्॥ पक्षमित्यनन्वयापत्तेश्च॥
पंचम्यर्द्धं च तत्रापि दशम्यर्द्धं ततोप्यतीति विधिलुधर्मोक्तेः॥ षष्ठ्याद्येकादश्यादिप
क्षाविधि ज्ञेयाविति तत्त्वं॥ कालादर्शेपि॥ पक्षाद्यादि च दर्शांतं पंचम्यादि दिगा
दिर्वा॥ अष्टम्यादि यथाशक्त्या कुर्यादापरपक्षिकं॥ पक्षादिः प्रतिपत्॥ दिक् दश
मी॥ दर्शांतमिति सर्वत्र॥ गौतमोपि॥ अथापरपक्षे श्राद्धं पितृभ्यो दद्यात्पंचम्या शिवः
दिदर्शांतमष्टम्यादि दशम्यादि सर्वस्मिन्वेति॥ तत्रैकस्मिन्नपि दिने श्राद्ध ५१

मुक्तं हेमाद्रौ नागरखंडे॥ आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे॥ यो वै श्राद्धं नरः
कुर्यादेकस्मिन्नपि वासरे॥ तस्य संवत्सरं यावत्संतृप्ताः पितरो ध्रुवमिति॥ अशक्तौ शाकेन
परा व्यवस्थेति प्राचः॥ तन्न॥ तथा च कपदाभावात्॥ त्रयोदश्यादिपक्षएव नित्यः॥ तच्चेदमि
दाश्कतेन ब्राह्मेण च कारणे तस्यैव पंचमपक्षायोगव्यवच्छेदकैरिति गौडाः॥ तन्न॥ एकस्मि
न्नपीति विरोधात्॥ तेन फलतारतम्यार्थिनान्यान्यपि कार्याणीति तत्त्वं॥ तत्र चतुर्दशी॥ श्राद्धाना
वे पंचम्यादिदशम्यादिपक्षौ॥ तत्सत्वे षष्ठ्याद्येकादश्यादिकौ॥ एवं चतुर्दश्यनावेत्वादश्यादिः॥
तत्सत्वे त्रयोदश्यादिरिति व्यवस्था॥ ॥ विधवायास्तु विशेषः स्मृत्यंतरसंग्रहे॥ चत्वारः पा
र्वणाः प्रोक्ता विधवायाः सदैव हि॥ स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च॥ ततो माताम
हानां च श्राद्धं दानमुपक्रमेत्॥ तथा॥ स्वश्रेणी च विशेषेण मातामहास्तथैव चेति॥ अशक्तौ
स्वपतिं त्रावगाची॥ स्वभर्तृप्रभृतित्रिभ्यः स्वपितृभ्यस्तथैव च॥ विधवा कारयेच्छ्राद्धं
मतं हि तत्॥ विधवा स्वयं संकल्पं कृत्वान्यब्राह्मणद्वारा कारयेदित्युक्तं प्रयोगपारिजाते
हालये तु वर्ज्या तिथ्या॥ एकं रूपी चं शास्य प्रयोगपारिजातादिषु वसिष्ठः॥ नंदायां
ने चतुर्दश्यां॥ द्विजन्मसु पृष्ठसु श्राद्धं कुर्वीत गृही पुत्रधनक्षयात् जन्म नेतत
न्मानि प्राजापत्ये च पौष्णे च पित्र्ये च नागवे तथा॥ यत्तु श्राद्धं प्रकुर्वीत तस्य पु

वृ.दुगार्यः॥०

प्राजापत्यं रोहिणी॥ पौष्णं रेवती॥ पित्र्यं मघा॥ अन्यान्यपि प्रत्यरादीनि तत्रैव [illegible]
ज्ञानंदादिकामरव्यारम्भेष्वग्निपित्रकालभे गंडे वैधृतिपाते च पिंडांस्त्यो [illegible]
रितिसंग्रहात्॥ नंदा प्रतिपत्षष्ठ्येकादश्यः॥ अग्निः सप्तमी॥ कामस्त्रयोदशी॥ [illegible]
न्युः शुक्रः॥ अग्निः कृत्तिका॥ पित्र्यं मघा॥ कालभं भरणी॥ अत्र च पिंडाः स्याज्यास्तत् [illegible]
त्रमलं मृत्यं॥ एतच्च सकलमहालयविषयं॥ सकृन्महालये काम्ये पुनः श्राद्धे खिले तु [illegible]
तविषये चैवं सर्वमेतद्विचिंतयेदिति पृथ्वीचंद्रे नारदोक्तेः॥ अस्यापवादो हेमाद्रौ पृथ्वीचं
द्रोदये च॥ अमापाते भरण्यां च द्वादश्यां पक्षमध्यके॥ तथा तिथिं च नक्षत्रं वारं च न विचारये
त्॥ पराशरमाधवीयमदनपारिजातादिषु चैवं॥ निर्णयदीपिकायां तु पितृमृताहे निषि
द्धदिनेपि सकृन्महालयः कार्य इत्युक्तं॥ आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे॥ मृताहनि
पितुर्यो वै श्राद्धं दास्यति मानवः॥ तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवमिति नागरखं
डोक्तेः॥ या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते॥ सा तिथिः पितृपक्षे तु पूजनीया प्रयत्न शिव:
तः॥ तिथिच्छेदो न कर्तव्यो विनाशौचं यदृच्छया॥ पिंडश्राद्धं च कर्तव्यं विच्छित्तिं नैव कारये ५२
त्॥ अशक्तः पक्षमध्ये तु करोत्येकदिने यदा॥ निषिद्धेपि दिने कुर्यात्पिंडदानं यथाविधीति
कात्यायनोक्तेश्च॥ अत्र मूलं चिंत्यं॥ तथा पक्षश्राद्धकरणेपि नंदादिषु पिंडनिषेध इत्या

हपराशरमाधवीये कार्ष्णाजिनिः॥ नभस्यस्यापरे पक्षे कार्यं श्राद्धं दिने दिने॥ नैव नं
दादि वर्ज्यं स्यान्नैव निंद्या चतुर्दशीति॥ अत्र श्राद्धमित्येकवचनाद्दिने दिने इति वी
प्सावशाच्च सोमयागवदेकस्याभ्यासेनैकप्रयोगपरमिदं॥ अतः प्रतिपत्प्रभृति वि
कां वर्जयित्वा चतुर्दशीमिति याज्ञवल्क्यीयं पंचम्यादिपक्षविषयं॥ पृथ्वीचंद्रोदये म
दनपारिजाते चैवं॥ अस्य च मपरयाज्ञवल्क्यीयं॥ एतत्परत्वेन वा निंद्या चतुर्दशीति
विरोधात्॥ तत्वं तु तिथिनक्षत्रवारादिनिषेधाय उदाहृतः॥ सश्राद्धे तन्निमित्ते स्यान्मा
तुष्पंगस्ते त्वसावितिदिवोदासीये वृद्धगार्ग्योक्तेस्तन्निमित्तपक्षांतरे च ज्ञेयः॥ सकृ
न्महालये तु वचनान्निषेधः॥ अन्यत्र न कोपि निषेधः॥ कार्ष्णाजिनिस्मृतेरिति॥ अत्र
तो नंदादौ सपिंडकश्राद्धे पुत्रवतोप्यधिकारः॥ अत्रिरपि॥ महालये गयायां च [illegible]
पुत्रस्य जन्मनि॥ तीर्थेपि निर्वपेत्पिंडान् रविवारादिकेष्वपि॥ [illegible]
षेधस्तु मृताहातिक्रमे पौर्णमास्यादिमृते तत्श्राद्धे तन्निमित्ते च ज्ञेयः॥ यत्तु [illegible]
र्थसारे॥ विवाहव्रतचूडासु वर्षमर्द्धं तदर्द्धकं॥ पिंडदानं मृदा स्नानं न [illegible]
तर्पणमिति॥ तस्यात्रापवादो दिवोदासीये बृहस्पतिः॥ तीर्थे संवत्सरे [illegible]
याग महालये॥ पिंडदानं प्रकुर्वीत युगादिभरणीमघा॥ महालयगयायां [illegible]

पित्रोः क्षयेहनि॥ ततो द्वादशाहपिंडं कृत्वा तत्पिंडनिर्वपणं सदैति॥ निर्णयदीप...
षेधः प्रत्यहं त्रिन्नश्राद्धविषयः॥ षोडशाहव्यापिश्राद्धप्रयोगे कृतत्वेऽप्र...
नं कार्यमेवेत्युक्तं॥ तदयमर्थः संपन्नः॥ षोडशाहव्यापिश्राद्धेषु न पिंडनि...
ताहसत्त्वे महालये पितृयति केचित्॥ प्रत्यहं श्राद्धभेदेऽपि व्यतीपातादौ तथा॥
न्यत्र तु पिंडनिषेध इति॥ संन्यासिनां तु द्वादश्यां श्राद्धं कार्यं॥ यतीनां च वनस्थानां
लवानां विशेषतः॥ द्वादश्यां विहितं श्राद्धं तत्पक्षे विशेषत इति पृथ्वीचंद्रोदये सं
ग्रहोक्तेः॥ अत्र पक्षे श्राद्धाकरणे गौणकालमाह हेमाद्रौ यमः॥ हंसे कन्यासुवर्णे
ल्छेशाकेनापि गृहे वसन्॥ पंचम्योरंतरे दद्यादुभयोरपि पक्षयोः॥ आश्विनस्य
कृष्णपंचम्योर्मध्य इत्यर्थः॥ तत्राप्यसंभवे त्वविद्ये॥ ये यं दीपान्विता राजन् ख्या
ता पंचदशी तु वि॥ तस्यां दद्यान्न चेद्दत्तं पितृणां वै महालयः॥ तथाप्यसंभवे नार
ते॥ यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः॥ शून्यं प्रेतपुरं तावद्वृश्चिकं यावदा
गतः॥ आले॥ वृश्चिके समतिक्रांते पितरो दैवतैः सह॥ निःश्वस्य प्रतिगच्छं
ति शापं दत्वा सुदारुणं॥ यत्तु जातूकर्ण्यः॥ आकांक्षंति स्म पितरः पंचमं पक्षमा शि०व०
श्रिताः॥ तस्मात्तत्रैव दातव्यं दत्तमन्यत्र निःफलमिति॥ तत्फलातिशयहानिप ५३

रं॥ कन्यां गच्छत्युवा न चेति तुर्यपादे वा पाठः॥ तेन कन्यायोगे प्राशस्त्यमात्रं॥ अ
तः श्राद्धविवेकोक्तं श्राद्धद्वयं॥ इदं च श्राद्धं मन्वादिनैव कार्यं॥ नामान्वादिना॥ मृताहं
च सपिंडं च गयायां श्राद्धं महालयं॥ आपन्नोपि न कुर्वीत श्राद्धमामेन कर्हिचिदि
ति स्मृतिदर्पणे गालवोक्तेः॥ अथात्र देवताः॥ संग्रहे॥ तातांबात्रितयं सपत्नजन
नी मातामहादित्रयं सस्त्रि स्त्रीतनयादि तातजननी स्वभ्रातरः सस्त्रियः॥ ताताबा
त्मजभगिन्यपत्यधवयुग्जायापिता सद्गुरुः शिष्याप्ताः पितरो महालयविधौ तीर्थे
नयातर्पणे॥ अस्यार्थः॥ तातत्रयी पितृत्रयी अंबात्रयी च॥ स्मृत्यर्थसारे पि॥ म
हालये मातृश्राद्धं पृथक्प्रशस्तमिति॥ अत्र विशेषः स्मृतिदर्पणे गालवः॥ अने
का मातरो यस्य श्राद्धे चापरपार्विके॥ अर्घदानं पृथक्कुर्यात्पिंडमेकं तु निर्व
त्॥ जीवन्मातृकेगयायां श्राद्धं महालये॥ पितृपत्नीपृथक्श्राद्धं कार्यं पार्वणवत्कृ
ति वृद्धमनूक्तेः॥ सस्त्रीति मातामहानां सपत्नीकत्वेपि विकल्पवसति मा...
तां पृथक्कार्यं॥ महालयगयाश्राद्धे श्राद्धं त्वान्वष्टकासु च॥ ज्ञेयं द्वाद...
ती दैवं क्रमधास्तु वत्तिनिगमोक्तेः॥ हेमाद्रिमते त्वत्र नवदैवत्यमेवो...
गयाश्राद्धे वृद्धौ त्वन्वष्टकासु च॥ नवदैवत्यमत्रेष्टं शेषं षाट्पौरु...
५०३ कर्त्त॥ सपत्नमातुरेकोद्दिष्टं कुर्यात्॥ न पार्वणं॥ प्राग्दीपकलिका...
न्वष्टकां...

विष्णुधर्मोक्तेः॥ तातभ्रातापितृव्यश्च जननी भ्राता मातुलः॥ तत्स्त्रियः पितृ
तुलानी भ्रातृजाया॥ पितृष्वसृमातृष्वसृभगिन्योपत्यसंततिस्तु स्मृ॥ नन
यमधर्माय इति प्रयोगो ज्ञेयः॥ एतासु मती तु नतरूणां दर्शनं॥ ह्वारलोप
पिता श्वशुरः श्वश्रूरथत्रोपलभ्यः॥ अत्र मूलं स्मृतिचंद्रिकायां ज्ञेयं॥ अत्र
एकोद्दिष्टव्यवस्था काहेमाद्रौ पुराणांतरे॥ उपाध्यायगुरुश्वश्रूपितृव्याचार्यमा
तुलाः॥ श्वशुरस्त्वात्मतत्सुतस्तु त्रात्विकू शिष्यपोषकाः॥ भगिनी स्वामिदुहिता
मातृभगिनी सुताः॥ पितरौ पितृपत्नीनां पितुर्मातुश्च यास्वसा॥ सखि द्रव्यदशिष्या
श्चास्तीर्थे चैवमहालये॥ एकोद्दिष्टविधानेन पूजनीयाः प्रयत्नतः॥ इतरेषां पित्रादीनां
पार्वणमर्थसिद्धं॥ अत्र कमान्यत्वे प्याचाराद्व्यवस्था॥ अशक्तौ तु दृष्टी चंद्रोदये वाऽ
विंशतिमते॥ एकस्मिन् ब्राह्मणे सर्वानाचार्यादीन् अर्चयेत्॥ दश द्वादश वा पिंडान्
दद्यादकरणे नतु॥ एकोद्दिष्टस्वरूपं चाह याज्ञवल्क्यः॥ एकोद्दिष्टं देवहीनमेकार्घैक
पवित्रकं॥ आवाहनाग्नौकरणरहितं ह्यपसव्यवदिति॥ अत्रैकपाको वैश्वदेवं तं
त्रं पिंडवर्हिश्चैक इति स्मृत्यर्थसारे उक्तं॥ अत्र पाणिहोमः॥ पिंडाश्च द्विजांतिके इति
त्याह प्रयोगपारिजाते आचार्यः॥ काम्यमन्यदयेष्टम्यामेकोद्दिष्टमयाष्टमी॥ चतु

शि व॰ ५५

क्षेपुकरे होमः॥ पिंडाश्च द्विजांतिके इति पार्वणैकोद्दिष्टयोः समानतंत्रत्वेतु अग्निस
मीपएव॥ अत्र धुरिलोचनौ विश्वेदेवौ॥ अपि कन्यागते सूर्ये काम्ये च धुरिलोचनावि
ति हेमाद्रावादित्यपुराणात्॥ ७ अत्र प्रतिदिनं त्रिप्रयोगत्वाद्दक्षिणांते होवा प्रयो
गेकांते एव वा दक्षिणेति हेमाद्रावुक्तं॥ एतच्च संन्यस्तपितृकादिनाजीवत्पितृ
केनापि कार्यं॥ द्वेधातीर्थे च संन्यस्ते ताते च पतिते सति॥ येभ्य एव पिता दद्यात्तेभ्यो द
द्यात्स्वयं सुत इति कात्यायनोक्तेः॥ यत्तु कौर्म्यः॥ दर्शश्राद्धं गयाश्राद्धं श्राद्धं चापरप
क्षिकं॥ न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव च॥ इति॥ तत्संन्यस्तपित्राद्यतिरिक्तवि
षयं॥ काम्यश्राद्धपरं वा॥ अत्र बहु वक्तव्यं श्रीपितृचरणैर्जीवत्पितृकनिर्णये दर्शितं॥
एतच्च जीवत्पितृकेन पिंडरहितं कार्यं॥ मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः॥ न
जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव चेति दक्षेण तस्य पिंडनिषेधात्॥ अन्न
त्ववार्षिकादौहित्रवचनाद्भवतीति वक्ष्यामः॥ तथा छागलेयः॥ पिंडो यत्र निव
र्त्तेत कथंचन॥ सांकल्पं तु तदा कार्यं नियमात्कुलवान्दिनि॥ सांकल्प
वक्ष्यते॥ अत्र आज्ञां गतर्पणं पक्षश्राद्धप्रतिपदि श्राद्धहरे सच्चन्महालय
कार्यं॥ तदुक्तं नारदीये॥ पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने॥ सच्च नम

परेहनि तिलोदकं ॥ गर्गोपि ॥ पुत्रश्राद्धे हिरण्ये च अनुव्रज्य तिलोदकं
प्रयोग पारिजाते गार्ग्यः ॥ नभस्ये मासि श्राद्धं प्रतिदिनं भवेत् ॥ पितृ
कार्यं निषिद्धेपि तर्पणं ॥ सकृन्महालये श्राद्धे दर्शकाले तथैव हि ॥ इ
नेपि कार्यं ॥ तिथि तीर्थ विशेषेषु कार्यं प्रेते च सर्वदेति स्मृत्यर्थसारे ॥
विशेषे च गयायां प्रेतपक्षके ॥ निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितं
रत्नावल्यां वचनाच्च ॥ एतच्च श्राद्धं मलमासे न कार्यं ॥ तदाह गुरुः ॥ वृद्धिश्राद्धं तथा
सोमम् अग्न्याधेयं महालयं ॥ राज्याभिषेकं काम्यं च न कुर्याद्भानुलंघित इति ॥ हेमाद्रौ
नागरखंडेपि ॥ नभो वाथ नभस्यो वा मलमासो यदा भवेत् ॥ सप्तमः पितृपक्षः स्या
दन्यत्रैव तु पंचमः ॥ एतच्च पित्रोर्मरणोत्तरं प्रथमाब्दे कृताकृतमिति त्रिस्थलीसेतौ न
दाः ॥ इदं च नित्यं काम्यं ॥ पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा ॥ प्राप्नोति पंचेमं
दत्वा श्राद्धं कामांश्च पुष्कलानिति जाबालवचनात् ॥ वृश्चिके समतिक्रांते पितरो दैव
तैः सह ॥ निःश्वस्य प्रतिगच्छंति शापं दत्वा सुदारुणमिति कार्ष्णाजिनिवचनाच्च ॥ शिवः
तदतिक्रमे प्रायश्चित्तमुक्तं स्मृत्यर्थविधाने ॥ दुरात्मा चैव यस्य मेतं च दश मासं द्विमास ५५
यो ॥ महालयं यदा न्यूनं तदा संवत्सरं मेतितदिति ॥ द्विमासयोः कन्यातुलयोर्महा

लयश्राद्धं यदा हीनमित्यर्थः ॥ अत्र भरण्यां श्राद्धमतिप्रशस्तं ॥ तदुक्तं पृथ्वीचं
द्रोदये मात्स्ये ॥ भरणी पितृपक्षे तु महती परिकीर्तिता ॥ अस्यां श्राद्धं कृतं येन
स गयाश्राद्धकृद्भवेत् ॥ पृथ्वीचंद्रे श्रीधरीये बृहस्पतिः ॥ नभस्यापरपक्षस्य
द्वितीयायां दयाम्यभे ॥ तृतीया चाग्निताराभिः सहिता श्रीतिदायिनी ॥ एतत्प
क्षे षष्ठी योगविशेषेण कपिला संज्ञा ॥ तदुक्तं वाराहे ॥ नभस्यस्यासितपक्षे तु रो
हिणी पातसंयुते ॥ पुष्या षष्ठी पुराणज्ञैः कपिला परिकीर्तिता ॥ अतोपवासमा
यमेन मास्करं तत्र पूजयेत् ॥ कपिलां च द्विजाग्र्याय दत्वा क्रतुफलं लभेत् ॥ पु
राणसमुच्चये ॥ नाद्रमास्य सितपक्षे भानौ चैव करे स्थिते ॥ पाते कुजे च रो
ष्यां सा षष्ठी कपिला भवेत् ॥ अत्र दर्शां तत्वेन महाजयो नाम ल पक्षो
कल्पस्य निर्णयामृते हेमाद्रौ च ॥ हस्तार्कस्कंदफलातिशयार्थं ॥ संयो
गौ वै निर्दिष्टा परमद्धिने तित त्रैवोक्तं ॥ अत्र विशेषो हेमाद्रौ स्कांदे ॥
तयोः शीर्षकं कमेभामनः शिरां ॥ पत्रकं पत्रकं षष्ठीमधुगव्येन
क्षीरेण ॥ अग्रकं केन स्नानं कुर्यात्सिमंत्रकं ॥ आपस्त्वमसि देवे

पतिरेव वा॥ पापं नाशय मे देव वाङ्मनःकायकर्मजं॥ पंचगव्य [illegible]
नः पंचरत्नैरेकमार्जयेत्॥ पंचरत्नैः पंचपत्रैर्वा॥ तथा॥ रत्नैर्न ला [illegible]
नो वर्णं कारयेद्रविं॥ शक्तितस्तु पलादूर्ध्वं तदर्धं कर्षतो पि वा॥ सो वर्ण [illegible]
क्षेपस्त्रीकांचैव तथा रथं॥ तथा॥ अल्पवित्तो पि यः कश्चित्सो पि द्विपलमि [illegible]
र्विं॥ अन्नासनखंडे॥ स्थापयेद्व्रणं कृत्वं चंदनोदकपूरिते॥ रक्तवस्त्रयुगा
न्नं ताम्रपात्रेण संयुतं॥ रथो रुक्मपलस्यैव एकचक्रः सुचित्रितः॥ सौवर्ण
पाव संयुक्तां मूर्तिं सूर्यस्य कारयेत्॥ ततः सूर्यं कपिलां च षोडशोपचारैः संपू
ज्य दद्यात्॥ दिव्यमूर्तिर्जगच्चक्षुर्द्वादशात्मा दिवाकरः॥ कपिलासहितो देवो
मम मुक्तिं प्रयच्छतु॥ यस्मात्त्वं कपिले पुण्या सर्वलोकस्य पावनी॥ प्रदत्ता स
ह सूर्येण मम मुक्तिप्रदा भवेति विशेषांतरं तत्रैव ज्ञेयमिति दिक्॥ ॥इति कपि
लाषष्ठी॥ ॥इयमेव चंद्रषष्ठी॥ सा चंद्रोदयव्यापिनी ग्राह्या॥ उक्तं च यत्र तथा
त्वे दृष्टा॥ तदुक्तं विष्णौ॥ तदूर्ध्वं द्रुपदे मासि षष्ठ्यां पक्षे सिते ऽपरा॥ चंद्रष शिवः
ष्ठीव्रतं कुर्यात्सर्ववेधः प्रशस्यते॥ चंद्रोदये यदा षष्ठी दृश्यते ह्यपरे ह्नि॥ चं ५९

मुक्ति ४

द्रषष्ठीति तत्पक्षे मे वापोथा प्रयत्नतः इति॥ अष्टम्यामाश्वलायनेन माघवि
र्षसंदेशे श्राद्धमुक्तं॥ एतेन मयावर्षेऽष्टौ पद्यः अपरपक्षे इति॥ इदं समस्त्यादि
त्रिषु हस्तु कार्यमिति नारायणवृत्तिः॥ हरदत्तस्तु मघायुक्त वर्षासु त्रयो
दशी श्राद्धमिति व्याचख्यौ॥ एषा चंद्रोदये आले॥ चाषाढ्याः पंचमपक्षेण यामा
अष्टमी स्मृता॥ त्रयोदशी गजच्छाया गयातुल्या तु पैतृके॥ ॥आश्विनशुक्लाष्ट
म्यां महालक्ष्मीव्रतं॥ ॥तत्र निर्णयामृते पुराणसमुच्चये॥ प्रियो चैनं भाद्रपदे
सिताष्टमी प्रारभ्य कन्यागते च सूर्ये॥ समापयेत्तु तिथौ चापावत्सूर्य [illegible]
क्ष अष्टमी गतो युवत्या इति॥ तत्रैव॥ कन्यागते प्रारभ्य कर्तव्यं न ध्रियो चैनं॥
हस्तांत दूनस्थे तद्व्रतं न समापयेत्॥ इदानीया गृहस्थानामष्टमी प्राक् [illegible]
प्रिया॥ दोषैश्चतुर्भिः संत्यक्ता सर्वसंपत्करी तिथिः॥ तथा॥ पुत्रसौ [illegible]
शुभनाशिनी सा प्रकीर्तिता॥ तस्मात्सर्वप्रयत्नेन त्याज्या कन्यागते रवौ॥ [illegible]
परित्याज्या नवमी दूषिता यदि॥ ति॥ दोषचतुष्टयं तत्रैवोक्तं॥ त्रि [illegible]
मे चैव अष्टमी नोपवासयेत्॥ पुत्रहा नवमी विद्धा स्वश्रीहस्ता दै [illegible]
विति त्रिदिनावमदिनलक्षणं चैरत्नमालायां॥ यत्र केः स्पृशति ति [illegible]

सानंवा रक्षेद्ववमदिनं तदुक्तमार्यैः॥ यत्स्यशक्तिर्वनितिथिस्त्र्यस्य...
धकस्तत्कल्पितमिदं द्वयं चनेष्टं॥ एतेच सर्वे निषेधाः प्रथमारंभविषया...
सतिसंतवेज्ञेया॥ व्रतस्यषोडशाब्दसाध्यत्वेनमध्येत्यागायोगात्॥ ...
व्यापिनी ग्राह्या॥ तत्रैव स्कांदे॥ परदिने चंद्रोदयाहूर्ध्वं त्रिमुहूर्त्ते व्या...
रेवकार्या अन्यथा पूर्वैव॥ पूर्वा वा परविद्धा वा ग्राह्या चंद्रोदये सदा॥ त्रिमु...
पिसा पूज्या परतश्चोर्ध्वगामिनीतिमदनरत्ने निर्णयामृते च संग्रहोक्तेः॥ अर्ध-
रात्रमतिक्रम्य वर्त्तते योत्तरा तिथिः॥ तस्यां तदा तिथौ कार्यं महालक्ष्मीव्रतं सदे-
तिवचनाच्चेति संक्षेपः॥ ॥इति महालक्ष्मीव्रतनिर्णयः॥ ॥अथ नवम्या-
मन्वष्टकाश्राद्धं॥ ॥तत्र कात्यायनः॥ अन्वष्टकासु नवभिः पिंडैः श्राद्धमुदा-
हृतं॥ पित्रादिमातृमध्ये च ततो मातामहांतकं॥ षष्ठी चंद्रोदये श्लोकं॥ पितृ-
णां त्रयमेतदृष्या मातृणां तदनंतरं॥ ततो मातामहानां च अन्वष्टक्रमः स्मृ-
तः॥ श्राद्धहेमाद्रौ छागलेयः॥ केवलाष्टकयेकार्यं वृद्धावादौ प्रकीर्त्तिताः॥ अ-
न्वष्टकासु मध्यस्थाः नांत्याः कार्यास्तु मातरः॥ दीपिकायां मातृश्राद्धमादौ कार्य- शिवः
मित्युक्तं॥ मातृयजनं तु अन्वष्टकास्वादितः इति॥ हेमाद्रौ आद्यपि॥ अन्वच (५)

त्व१

स्वा१

ष्टकासु क्रमशो मातृपूर्वं तदिष्यते इति॥ अत्र शास्त्रांतरे न व्यवस्थोक्ता तिष्ठेत्॥ चंद्रोदयः जीव-
त्पितृकविषयमिति निर्णयदीपः॥ इदं च जीवत्पितृकेणापि कार्यं तदुक्तं निर्णयामृते मैत्रायणी-
यपरिशिष्टे॥ अन्वष्टक्यं गयाश्राद्धं मृत्याहश्च मृतेहनि॥ मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च
जीवतीति॥ यद्यपि जीवत्पितृकस्य पंचाप्यन्वष्टका अवश्यं कर्त्तव्यास्तथाप्युत्तराकस्येयमावश्य-
की॥ प्रोष्ठपद्यष्टकाभ्यः पितृलोके न विद्यतीति हेमाद्रौ पाद्मोक्तेः॥ सर्वासामेव मातृणां श्रा-
द्धं कन्यागते रवौ॥ नवम्यां हि प्रदातव्यं ब्रह्मघ्न व्रवरायत इति स्मृतेनावश्यकत्वोक्तेः॥ एवं मा-
तरि जीवंत्यामपि सपत्नमातृभ्यो दद्यादिति तन्मरणे सति तस्येतान्यन्यस्य दद्या दिति केचि[त्]
वत्पितृकनिर्णये गुरुभिः॥ अत्र सर्वासां नामानि देशे नैकोदाहरणोद्यः पिंडश्च नामन-
कुद्विवचनादिप्रयोग इत्युक्तं नारायणवृत्तौ॥ अन्वष्टकाश्राद्धं तु याग...
नां मध्यमायामेव न सर्वासु॥ अन्वष्टक्यं मध्यमायामिति गोभिलगोतमादि...
रिशिष्टात्॥ अत्र भर्तृमरणोत्तरं पूर्वमृतमातृश्राद्धं न कार्यमिति केचिदा...
श्राद्धं नवम्यां कुर्वीत मृतेभर्त्तरि नोपपद्यते इति॥ तदेतन्निर्मूलत्वादन...
श्राद्धदीपकलिकायां ब्राह्मे॥ पितृमातृकुलोत्पन्नायाः काश्चित्सुमृताः...

अत्र सर्वासामित...

मातरो ज्ञेयाः श्राद्धं तत्र प्रदीयते इति। अत्र देशाचाराद्व्यवस्था। इदं चान्वष्ट
कार्यं। तदुक्तं श्राद्धं शूलपाणौ मात्स्ये। अमावास्याष्टकास्त्र कृष्णपक्षे पंचदशीषु
श्राय। एतच्चानुपनीतोपि कुर्यात्सर्वेषु पर्वसु। श्राद्धं साधारणं नाम सर्वकामफ
नार्यो विरहितो यस्तु प्रवासस्थोपि नित्यशः। शूद्रोप्यमंत्रवत्कुर्यादनेन विधिना
इति तेन साग्नेरेवेदमिति परास्तं। अन्वष्टकातः पृथगेवेदं मातुः श्राद्धमित्यपि प
स्तं। नाघवेन मत्स्ये ऐक्याद्‌ष्टकापदा विशेषाच्चेति नान्यत्रान्वष्टका श्राद्धस्यागम्यापत्ते
प्रधानवचनात्। अत्राष्टकान्वष्टकापूर्वानुराधा तासमाग्निपुराणे। अन्वष्टकासु वृ
चगयायां च क्षये हनि। अत्र मातुः पृथक् श्राद्धमन्यत्र पतिना सह इति। आपस्तंबो नान्व
ष्टकासु वृद्धौ चेति नाप्यकारैः पाठादन्वष्टकायां मातृश्राद्धं। छंदोगस्तु त्रमातृमातामह
श्राद्धेन कार्यं। किंतु त्रिपुरुषमेवानयोः पिंडाः पृथग्द्याद्वसानदिनाद्धेतो। कर्षसमन्वि शिवः
तं तु स्नात यायं श्राद्धषोडशं। प्रस्याद्विकं च शेषेषु पिंडाः स्युः षडिति स्थितिरिति [illegible]गपरि ५८
शिष्टात्। अन्वष्टकासु तेषां कर्ष विधानादिति शूलपाणिः। यत्तु तमिस्रपक्षे नवम्यां पुण्या
नाम्नदेहिया। चत्वारः पार्वणाः कार्याः पितृपक्षे मनीषिभिरिति तद्देशाचारतो व्यवस्थितं
ज्ञेयं। इदं जीवत्पितृकेनापि सपिंडकं कार्यं। हेमाद्रौ विष्णुधर्मोत्तरे अन्वष्टकासु चस्त्री यां

श्राद्धं कार्यं तथैव च स्वेत्क्रपक्रमस्य। पिंडनिर्वपणं कार्यं तस्यामपि नरसत्तमेति वचनं श्राद्धविधिना
पिंडदानेप्राप्ते पुनस्तत्कीर्तनं यस्य जीवत्पितृगर्भिणीपतित्वादिना पिंडदानं निषिद्धं तस्य तत्प्राप्त्य
र्थमिति श्रीतातचरणाः। अत्र सुवासिनीभोजनमुक्तं मार्कंडेयपुराणे। मातुः श्राद्धे तु संप्राप्ते
ब्राह्मणैः सह भोजनं सुवासिन्यै प्रदातव्यमिति शातातपो ब्रवीत्। भर्तुरग्रे मृता नारी सह दा
हेन वा मृता। तस्याः स्थाने नियुंजीत विप्रैः सह सुवासिनीं। तत्रैव मदालसावाक्यं। श्राद्धे पुत्र
दियाः स्फुरत्कंकारा श्रयोषितो मंजीरमेखलाद्दाम कर्णिकाकंकणादय इति। अत्रात्राकावनुक
ल्पमाह गालायनः। अन्नं तु हृत्य वसमाहरेद्ग्निनावा कक्षमुपोष्येदेषा मेष्टकेति नत्वेवानष्ट
कः स्यादिति हेमाद्रौ पितामहः। अमावास्या व्यतीपात पौर्णमास्यष्टकासु च। विद्वान् श्राद्ध
मकुर्वाणो नरकं प्रतिपद्यते। अकरणे च शा[illegible]यश्चित्तमुक्तं मन्विधानेन निर्घ[illegible]
रं तु तद्दिने। अन्वष्टक्यं यदा शून्यं सपर्णीयात्सिर्वं यति।। ।।एतत्संदेहादर्पा वि शपः प[illegible]
[illegible]दर्यो वायवीये। सन्यासिनोप्याब्दिकादि पुत्रः कुर्याद्यथा विधि। महालये तु य[illegible]
वं तन्नु तदिति।। ।।अथ त्रयोदशी श्राद्धं।। ।।तत्र चंद्रिका। त्रयोदशी भाद्रपदी[illegible]
कृष्णा। तृप्यंति पितरस्तस्यां स्वयं पंचशतं समाः। मघायुक्ता यां तस्या तु अ[illegible]
यंति पितरस्तत्र वर्षाणामयुतायुतं। प्रयोग पारिजाते शंखः। प्रोष्ठपद्याममली[illegible]

योदश्यां। प्राप्य श्राद्धं तु कर्त्तव्यं मधुना पायसेन च। प्रजामिष्टां यशः स्वर्गमारो[illegible]
ग्यं। श्राद्धे सदा प्रीताः प्रयच्छन्ति पितामहाः। एतन्नित्यमपि। पृथ्वीचंद्रे विष्णु[illegible]
याममतीतायां तथा कृष्णत्रयोदश्यां तत्फलं। एतांस्तु श्राद्धकाले वै नित्यानाह[illegible]
तमेते षट्कर्वाणो नरकं प्रतिपद्यत इत्युक्तेः। एतच्चाविनष्टैरपि पुत्रैः कार्यं। तथ[illegible]
नष्टा वा विनष्टा वा कुर्युः श्राद्धं पुत्रकसुताः। मघासु च ततोन्यत्र नाधिकारः पृथग्वि[illegible]
परार्के वायवीये। हंसे हस्तस्थिते याम्यु मघायुक्ता त्रयोदशी। तिथिर्वैवस्वती नाम सा छाया
कुंजरस्य तु। अत्र च। अपि नः स कुले स्याद्यो नो दद्यात्त्रयोदशीं। पायसं मधुसर्पिर्भ्यां
कच्छाये कुंजरस्य चेति विष्णुमनुवचने केवलत्रयोदश्यां श्राद्धे कृते मघा गुण इति कल्पतरुः। [illegible]
त्रपारिजातः। केवलवाक्यानामर्थवादत्वाद्विधौ च मघायोगकृतेर्विधिलाघवाद्विशिष्टम
वनिमित्तमित्याह। वस्तुतस्तु। मधुमांसैश्च शाकैश्च पयसा पायसेन च। एष नो दास्यति श्रा
द्धं वर्षासु च मघासु चेति वसिष्ठवचने केवलमघाश्राद्धे विनिगमकाभावादन्वयं नित्यं
निमित्तं पूर्वोक्तवचनाद्योगाधिकफलाधिक्यं। अत एव याज्ञवल्क्यः। तथा वर्षात्रयो
दश्यां मघासु च विशेषत इति। त्रयोदशीश्राद्धं नित्यं। अन्यत्काम्यं। अत्र त्रयोदश्यां बहुपु
त्रा युवमारिणस्तु न भवंतीत्यापस्तंबोक्तेर्युवमारित्वमपत्यदोषं सहिष्णोरपत्यमात्रार्थिनः त्रि॰ व॰ ५९

स्कल्पतरौ कृष्णधनार्थिनो वाधिकार इति कल्पतरुः। अपत्यनिंदया तद
र्थिनो नाधिकारात्फलांतरकामस्यैवाधिकार इति हलायुधः। एतन्नित्यं ज
रहितं कार्यं। मघायुक्तत्रयोदश्यां पिंडनिर्वपणं द्विजः। समतानां नैव कुर्या
न्नित्यं नैकवयो विदुरिति वृहत्पराशरोक्तेः। इदं मलमासेपि कार्यं। मघात्रयो
दशीश्राद्धं प्रत्यक्षपर्वस्थितिहेतुकं। अनन्यगतिकत्वेन कर्त्तव्यं मलिम्लुचे इति का स्या॰ ५
ठकगृह्योक्तेः। यानि त्वांगिरसः। त्रयोदश्यां तु कृष्णपक्षे यः श्राद्धं कुरुते नरः।
पंचत्वं तस्य जानीयाज्ज्येष्ठपुत्रस्य निश्चितं। वामनपुराणे। त्रयोदश्यां तु वै
श्राद्धं न कुर्यात्पुत्रवान्गृही त्यादीनि तानि पुत्रवद्विषयाणि वा मघा[illegible]
नि त्रयोदशीविषयाणि काम्यश्राद्धविषयाणि वा सपिंडकश्राद्धविषया[illegible]
चेति केचित्। हेमाद्रिस्तु एकवर्गश्राद्धविषयाणि। श्राद्धं [illegible]
र्गीस्य त्रयोदश्यां कृष्णपक्षे मेला। न तु शास्त्रज्ञस्य प्रजां हिंसंति ते [illegible]
तिकात्यायनिस्मृतेः। यद्यपि। पितरो यत्र पूज्यंते तत्र मातामह[illegible]

त्रि ४

धौम्योक्तेर्न केवलं पितृवर्गस्य प्राप्तिस्तथापि व्यामोहादित्रात्र न
त्याद्युः॥ वयं तु पश्यामः॥ पुत्रवद्धिपियात्येवति॥ असंतानस्त्वय
श्रीकान्त्रयोदशी॥ संतानयुक्तो यः कुर्यात्तस्य वंशक्षयो न वदितिहे
रखंडे ऽके॥ पूर्ववाक्यमप्यसंतानस्यैकवर्गनिषेधकमिति॥ अत्र म
दशी महालयपक्षगादित्रयाणां तंत्रेणप्रयोगः॥ न तु प्रसंगसिद्धिरित्यन्य
न्तरम्॥ ॥अथ चतुर्दशीनिर्णयः॥ ॥पूर्वा चेत्प्रोदयप्रचेताः॥ कैष्टारा हस्त
लोहाद्यैर्विधिवर्जा व्याला विषाग्निभिः॥ नखिदंष्ट्रिविपन्नानां तेषां शस्ता चतुर्द
शी॥ ब्राह्मे॥ युवानः पितरो यस्य मृताः शस्त्रेण वा हताः॥ तेन कार्यं चतुर्दश्यां ते
षां तृप्तिमभीप्सता॥ नागरखंडे॥ अपमृत्युर्भवेद्येषां शस्त्रमृत्युरथापि वा॥
श्राद्धं तेषां प्रकर्तव्यं चतुर्दश्यां नराधिपाः॥ मरीचिः॥ विषशस्त्रश्वापदाहि
तिर्यग्ब्राह्मणघातिनाम्॥ चतुर्दश्यां क्रिया कार्या अन्येषां तु विगर्हिता॥ ब्रा
ह्मणघाती तेन हतो न तु ब्राह्मणः॥ तस्य पतितत्वादिति शूलपाणिः॥ अत्रो
क्तविशेषणस्याविवक्षितत्वात्स्त्रीणामपि शस्त्रादिहतानामेकोद्दिष्टं का

शिवः
६०

र्यमिति श्रीदत्तोपाध्यायाः॥ इदं च विषादिहतानामेव न प्रसवादिमृतानामि
ति वाचस्पतिः॥ यत्तु शाकटायनः॥ जलाग्निभ्यां विपन्नानां संन्यासे वा गृ
हे पथि॥ श्राद्धं कुर्वीत तेषां वै वर्जयित्वा चतुर्दशीमिति॥ तत्प्रायश्चित्तार्थं ज
लादिमृतविषयमित्याकरे उक्तं॥ अत एव वैधत्वात्संग्रामेऽपि न कार्य
मिति हेमाद्रिः॥ एतच्च दैवयुक्तमेकोद्दिष्टं कार्यमित्युक्तं प्रयोगपारिजाते॥
अत्र पक्षे चतुर्दश्यामेकोद्दिष्टं विधानतः॥ दैवयुक्तं ततः श्राद्धं पितॄणामक्ष
यमन्वहम्॥ ततः श्राद्धं दैवहीनं चेत्तु त्रयाणां धनक्षयः॥ एकोद्दिष्टं दैवयुक्तमित्य
वं मन्त्र रथवीत्॥ न विधवाः॥ समत्वमागतस्यापि पितुः शस्त्रहतस्य च॥ च
तुर्दश्यां तु कर्तव्यमेकोद्दिष्टं महालये॥ चतुर्दश्यां तु यच्छ्राद्धं सपिंडीकरण
ते॥ एकोद्दिष्टविधानेन तत्कार्यं शस्त्रघातिनः॥ इति॥ संवत्सरप्रदी
ते॥ विच्छेदं वांछत त्रापि सजा यि त्वादितामलाभ्रो॥ ये वै शस्त्रहतेनी
र्वं कुर्यादत्ते द्वितः॥ अत्रैकोद्दिष्टवचनानां निर्मूलत्वं समूलत्वेपि
कपराणि वित्यादिवचनैः प्रकरणात्तत्पक्षपतीयपार्वणावण

लपाणिः॥ तन्न। वाक्येन प्रकरणस्य बाधात्॥ पित्रादीनां पार्वण[illegible]
नामेकोद्दिष्टमिति गौडा वाचः॥ तन्न॥ पित्रे इत्यनेन विरोधात्॥ [illegible]
क्या वैयर्थ्यापत्तेश्च॥ अत्र शस्त्रहतस्यैव चतुर्दश्यामिति नियमो [illegible]
दश्यामेव शस्त्रहतस्येति॥ श्राद्धं शस्त्रहतस्यैव चतुर्दश्यां महाल[illegible]
स्यदर्शात्॥ वार्षिकादी नामकरणप्रत्तेश्च तेन महालये एवादिनां त[illegible]
णां मातामहादितस्यैकोद्दिष्टं कार्यमेव॥ पितामहो पि शस्त्रहतश्चेदेकोद्दिष्टं द्वयं
कार्यं॥ तदुक्तं हेमाद्रौ स्मृत्यंतरे॥ एकस्मिन् द्वयोर्वैकोद्दिष्टमिति॥ त्रिषु
शस्त्रहतेषु पार्वणमेव कार्यं॥ यत्तु देवस्वामिनोक्तं॥ त्रिष्वपि शस्त्रहतेषु द्व
यमेकोद्दिष्टं त्रयं कार्यं न तु पार्वणमाहत्य वचनाभावात्॥ तदयुक्तं॥ पित्रा
दयस्त्रयो यस्य शस्त्रेण तास्तु नक्रमात्॥ मन्त्रेण पार्वणं कुर्यादेकोद्दिष्टं न
यत्कृत्यमिति कद्रपराशरोक्तेः॥ एकस्मिन् द्वयोर्वापि विधिः षष्ठसत्रेण वा
ते॥ एकोद्दिष्टं सुतः कुर्यात्त्रियाणां दर्शवच्च वदिति स्मृत्यंतराच्चेति पृथ्वीचंद्रो
दयवचक्तं॥ अपरार्के हेमाद्रौ चैवं॥ यस्तु त्रयः शस्त्रादिना हतस्तस्य वार्षिकमे
व पार्वणमेकोद्दिष्टं वा कार्यं न तु श्राद्धद्वयं॥ प्रसंगासिद्धेरिति पृथ्वीचंद्रोद

शिवः

६१

यो॥ मत्स्यश्राद्धाकरणे प्रतिपद्यादिदिनांतरे पार्वणेनैव कार्यमिति तत्रैवोक्तं॥ य
द्यपि शस्त्रविप्रहतानां चतुर्दशी मरीचपेः॥ श्राद्धं स्त्रस्याग्निनां चैवमाश्राद्धमे
षां न कारयेदिति छागलेयाद्यैः शस्त्रादिहतानां श्राद्धं निषिद्धं तथापि प्रमाद
मृतानां श्राद्धाहत्वात्कार्यं॥ बुद्धिपूर्वकमृतानां तु न कार्यं॥ यत्तु च
तुर्दश्यां तपेत्॥ यास्तु सपिंडीकरणक्रिया इति मालतज्ञोक्तमिति शूलपाणिः॥ नद
नायां माना नाभावात्पतितेनापि कर्तव्यं कर्तव्यं पतितस्य चेति गयादिव[illegible]
विधिवशात्पतितानामपि कार्यमिति न व्यर्गोऽगः॥ तत्त्वं तु समत्वमागतस्य
त्यादिवशात्पतितक्रियाणां कार्यं नान्येषामिति वयं प्रतीमः॥ यत्तु मद[illegible] न
ष्टयज्ञियोलोमो क्वचित्क्वापि विधीयते॥ न दर्शेन विना श्राद्धमाहिताग्नेर्द्वि[illegible]
नइति॥ अत्र पूर्वहेतुत्वेनोक्तं॥ तद्यथाकृतमेव मन्यते पृथ्वीचंद्र[illegible]
आहिताग्नेः पिंडपितृयज्ञकत्वेन श्राद्धनिषेधार्थमिदं न त्वसौ [illegible]
स्य समुद्धरणः॥ तल्लपदस्याद्यमन्यदिनेषु आहमाहिताग्नेर्दर्शीने य[illegible]
द्वयं॥ दर्शे न पार्वणं न तु विना श्राद्धं नो॥ तेन क्वापि वार्षिका[illegible]
नेतिहरिहरः॥ ॥इति शस्त्रहतचतुर्दशी॥ ॥अमायां [illegible]

रार्केयमः॥ हंसे करस्थिते यातु अमावास्या करान्विता॥ सा ज्ञेया
या इति बौधायनोऽब्रवीत्॥ वनस्पतिगते सोमे या छाया प्राङ्मुखी
ज छायायां तु मासो ज्ञातस्यां श्राद्धं प्रकल्पयेत्॥ भारते॥ अजेन सर्व
सुनियतव्रतः॥ हस्तिच्छायासु विधिवत्कर्णव्यजनवीजितं॥ श्राद्ध
शेषः॥ आश्विनशुक्लप्रतिपदि दौहित्रस्य मातामहश्राद्धमुक्तं हेमाद्रौ
चा॥ जातमात्रोऽपि दौहित्रो विद्यमानेऽपि मातुले॥ कुर्यान्मातामहश्राद्धं प्रतिप
द्याश्विने सिते इति॥ इदं संगवव्यापिनी ग्राह्येति निर्णयदीपे उक्तं॥ प्रतिप
द्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं॥ श्राद्धं मातामहानां च सपितास संगवे
सदा॥ जातमात्रोऽपि दौहित्रो जीवत्यपि च मातुले॥ प्रातः संगवयोर्मध्य
आर्यस्य प्रतिपद्भवेदिति॥ अत्र समूलत्वं विमृश्यं॥ इदं च मलमासे
न कार्यं॥ स्पष्टमासविशेषाख्याविहितं वर्जयेन्मल इति निषेधात्॥ इ शिवः
दं च जीवत्पितृकेणैव कार्यमिति शिष्टाः॥ इदं च शिष्टाचारात्सपिंडकं का ८२
र्यमिति केचित्॥ पिंडरहितं तु युक्तं॥ जीवत्पितृकस्य मुंडनं पिंडदानं च

प्रेतकर्म च सर्वशः॥ न जीवत्पितृकः कुर्यात्तिलैस्तर्पणं पतिरेव चेति दक्षेण
पिंडनिषेधात्॥ अन्यच्च श्रद्धवद्विशेषवचनानां वाच्येति संक्षेपः॥ ॥
॥ इति श्रीकमलाकरभट्टकृते निर्णयसिंधौ महालयनिर्णयः॥ ॥ अथा
श्विनस्य शुक्लप्रतिपदि नवरात्रारंभनिर्णयः॥ तत्र मार्गवार्चनदीपिकायां देवीपु
राणे सुमेधा उवाच॥ शृणु राजन्प्रवक्ष्यामि चंडिकापूजनक्रमं॥ आश्विनस्य सि
तपक्षे प्रतिपच्छुभे दिने इत्युपक्रम्य॥ तिथौ शुद्धे च कर्तव्यं प्रतिपच्चोर्ध्वगामि
नी॥ आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा॥ अपराह्णे च कर्तव्यं शुभ
ता तिथौ द्विजाः॥ इदं चापराह्णयोगिन्याः प्राशस्त्यं द्वितीयादिने प्रतिपदो भाव
ज्ञेयं॥ तथा च तत्रैव देवीपुराणे॥ डामरतंत्रे च देवीवचः॥ अमायुक्ता न कर्त
व्या प्रतिपत्पूजने मम॥ मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता॥ अम्रा
बृ३ दशनाडीस्त्वर्धस्थायः कुरुते नरः॥ कलशस्थापनं तत्र ह्यरिष्टं जा
मार्कंडेयदेवीपुराणयोः॥ देवीकृतं तु यात्रुक्तोऽत्र वेत्प्रतिपद्दिशि
त्र प्रोक्तं तस्यां न कार्यं स्तुचमिच्छता॥ दशान्तगोन्तवेत्त ऋतु र्द्धिरं

नेशायां दुर्गापूजायां यत्रस्या न मम सज्जनमिति॥ स्कांदे वि॥ प्रतिपद्या
मास्युक्तास्तु नरतन्नवेत॥ नाम्रपंचदशीयुक्ता तया पूजा न शस्यते शि
न्नदा मा लिपुत्रदारस्त्रया वहा॥ तथा॥ वर्जनीया प्रयत्नेन अमायुक्ता
द्वितीया हि युता या तु सा प्रतिपत्सर्वकामदा॥ तथा देवीपुराणे॥ यो मां पूजयते
त्यं द्वितीयागुणान्विता॥ प्रतिपच्छारदी ज्ञात्वा सो श्नुते सुखमव्ययं॥
यां दर्शयुक्तप्रतिपत्स्थापनं मम॥ तस्य शापायु तं दत्वा नस्यमशेषं करोम्यहं॥
ग्रहात्कुरुते यस्तु कलशस्थापनं मम॥ तस्य संपद्विनाशः स्यात् ... विनश्य
ति॥ अमायुक्ता न कर्त्तव्या प्रतिपच्चंडिकार्चने॥ धनापत्त्रविशेषेण वंशहानि
प्रजायते॥ नदर्शकलया युक्ता प्रतिपच्चंडिकार्चने॥ उदये द्विमुहूर्त्तापि ग्राह्या
सोदयगामिनीति॥ देवीपुराणे॥ या चाश्वयुजि मासस्य प्रतिपद्भद्रयान्विता॥
पुष्कामशौचनं तस्यां शतयज्ञफलप्रदं॥ रुद्रयामले॥ अमायुक्ता सदा चैव प्र शिवः
तिपन्निंदिता मता॥ तत्र चेत् स्थापयेत्कुंभं दुर्भिक्षं जायते ध्रुवं॥ प्रतिपत्सद्वितीया ६३
यापि कुंभारोपणकर्मणीति॥ यद्यपि रुद्रयामले अमरंच निर्मलं तयाप्य

विरोधात्प्रचाराच्च तद्वचनानि लिख्यंते॥ तिथि... देवीपुराणेपि॥ प्रातरावा
हयेद्देवीं प्रातरेव प्रवेशयेत्॥ प्रातः प्रातश्च संपूज्य प्रातरेव विसर्जयेत्॥ तत्रैवा
शरत्काले महापूजा क्रियते या च वार्षिकी॥ सा कार्योदयगामिन्यां न तत्र तिथि
युग्मता॥ तथा॥ कुहूकाद्यापसंयुक्तां वर्जयेत्प्रतिपत्तिथिं॥ राज्यनाशाय या प्रो
क्ता निर्दिता चावसर्जने इति॥ एषु वचनेषु कलशस्थापनग्रहणात् देवप्रथ
मदिने निषिध्यते॥ नत्तूपवासादि॥ तस्य प्रतिपद्यमावास्यानिषुग्मवाक्यात॥ प्र
का स्यात् प्रतिपन्निषिद्धा अयमत्र शतिरीपिकोक्तो॥ शुक्लपक्षे दर्शविहीनमाध
केष्वा॥ पूर्वदिने ग्राह्यस्य बाधे मानाभावादिति केचित्॥ वस्तुतस्तु पूर्वो
त्तु चंडिकार्चने स्थानग्रहणात् उपवासादेश्चांगत्वात्प्रधानस्याद्यावपि पर
युक्ते॥ कलशस्थापनग्रहणं तूपलक्षणं॥ अतएव देवल॥ व्रतोपवासनि
मादि के कापि यान्वल॥ सा तिथिस्तद्दिने ह्यां विपरीता तु पैतृक
ह्रिकामुहूर्त्तेर्तिगौडाः॥ यदा तु पूर्वेद्युर्दिने संपूर्णा शुद्धा त्वपरत्र
ते तदा संपूर्णत्वादमायोगाभावाच्च पूर्वैव॥ या निच द्वितीयायोग

वचनानि केचित्पठंति तान्यपि मुहूर्ताधिकनिषेधपराणि॥ परदिने [illegible]
र्तपुनरपि पूर्वेव ग्राह्या॥ तदाह जल्ल॥ तिथिः शरीरं तिथि [illegible]
तिथिरेव साधनमिति॥ यानि त्वमावास्यायां मुहूर्तप्रकर्तव्यत्वा [illegible]
प्रसादे वचनानि तानि समूलत्वे सत्यपि लिंगद्विषयाणि॥ अत्र दत्त [illegible]
वाक्यानां हेमाद्रिणा अलिखितत्वेन निर्मूलत्वात्तेष्वान्यनिर्णय [illegible]
न्यनिर्णयात्पूर्वत्राभावपि गौडनिबंधेषु विशेषनिर्णयाद्रोदयिकी ग्राह्या॥ [illegible]
मापि घटिकैकेत्यस्य द्विमुहूर्तत्वस्क त्रिमुहूर्ता ग्राह्या॥ उदिते दैवतेभा
नाविद्यत्र द्विमुहूर्ता त्रिरकस्त्वेति औदयिका द्विमुहूर्तत्वनियमात॥ ते न
स्या५ उदये द्विमुहूर्ता पीष्टानुसारो पि॥ मुहूर्तमात्रा कर्तव्येति द्विमुहूर्तस्क त्रि
अन्यथा द्विमुहूर्तविधिवैयर्थ्यात॥ केचित्तु मुहूर्तमात्रेति वचनात्ततो
न्यूनत्वे परा नेत्याहुः॥ गौडा अप्येवं॥ अत्र देवीपूजैव प्रधानं उपवासा
दिस्त्वंगं॥ अष्टम्यां च नवम्यां च जगन्मातरमंबिकां॥ पूजयित्वाश्विने मा शिवः
सि विशोको जायते नर इति हेमाद्रौ न विद्यते स्याएवफलसंबंधात॥ न ६६

वमीतिथिपर्यंतं व्याप्ताजपादिकमितिस्तचैव देवीपुराणात्॥ शरत्काले महापूजा क्रिय
ते या च वार्षिकी॥ तिमार्कंडेयपुराणाच्चा पूर्ववचनादष्टमीनवमीपूजैव प्रधानमिति न्य
सर्वमंगमितिगौडाः॥ एकारूपक्षोपि कालिकापुराणे॥ यस्त्वेकस्यामथाष्टम्यां नवम्यामथ
साधकः॥ पूजयेद्वरदां देवीं महाविभवविस्तरैरिति रूपनारायणधृतदेवीपुराणे। महान
नम्यां पूजयं सर्वकामप्रदायिका॥ सर्वेषु वत्सवर्णेषु तव भक्त्या प्रकीर्त्तिता॥ सुतपुत्र तिथौ
गन्धपुष्पायुर्द्धनसंपदः॥ सा च काम्या नित्या चाएवमत्यैरपि तथा देव्याः कार्यप्रपूजनं॥ वि
भूतिमतुलां लब्धुं चतुर्वर्गप्रदायकमिति॥ यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे न स
जयति दंभाद्वा द्वेषाद्वाप्यथ भैरव॥ क्रुद्धा भगवती तस्य कामानिष्टान्निहंति वैद्रुतकालिका
पुराणे फलनिंदा श्रुतेः॥ वर्षे वर्षे विधातव्यं स्थापनं च विसर्जनमिति नित्यत्वे देवी [illegible]
णात्॥ अत्रोपवासादिकमुक्तं हेमाद्रौ॥ एवं च विंध्यवासिन्यां नवरात्रोपवासतः [illegible]
न न क्रैनक्तैपेवायाचितेन च॥ पूजनीया प्रयत्नेन तेन देवी स्त्रा नस्त्रा न पूरपुरे [illegible]
क्रिपरे गृहे ग्रामे ग्रामे वने वने॥ स्नातैः प्रमुदितैर्हृष्टैर्ब्राह्मणैः क्षत्रियैर्नृपैः [illegible]
क्षियुक्तैर्म्लेच्छैरन्यैश्च मानवैरिति॥ यत्तु रूपनारायणीये न विष्णो एवं नाम [illegible]
रूत्यतेसर्वदस्फानि गितित्तामसपूजापरो॥ विनामं त्रैस्तामसी स्यान्नि [illegible]

मतेतितत्रैवोक्तेः।मदनरत्नेदेवीपुराणेपि।कन्यासंस्थेरवौशक्रशुक्ला...
नंदिकां।अयाचीत्वथवैकाशीनक्ताशीवाथवाघदः।भूमौशायीतत्राम...
रीर्नेजयेन्मुदा।वस्त्रालंकारदानैश्चसंतोष्याःप्रतिवासरं।बलिंचप्र...
दोदनंमांसमाषवत्।त्रिकालंपूजयेद्देवींजपस्तोत्रपरायणइति।नंदि...
दितिमैथिलाः।षष्ठीतिगौडाः।नत्त्रपूजनंरात्रौकार्यं।आश्विनेमासिमे...
षासुरमर्दिनी।निशासुपूजयेद्भक्त्यासोपवासामिदिनःक्रमादितिदेवीपुराणात्...
संग्रहेपि।आश्विनेमासिमेघांतेप्रतिपद्यातिथिष्वपिनवतात्तस्यांनक्तंप्रकुर्वीततरात्रौदे
वीचपूजयेत्।रात्रिरूपायतोदेवीदिवारूपोमहेश्वरः।रात्रिव्रतमिदंदेविसर्वपा
पप्रणाशनं।सर्वकामप्रदंनृणांसर्वशत्रुनिबर्हणं।रात्रिव्रतमिदंतस्यरात्रौकर्तव्य
तेष्यते।नक्तव्रतमिदंयस्मादन्यथानरकेगतिरित्यादिवचनाच्च।रात्रिव्रतत्वम शिवः
वाभिप्रेत्यमाधवेनोक्तं।तस्यनक्तव्रतत्वादिति।ननुरात्रिभोजनात्तन्ननु।मासिचा ६५
श्वयुजेशुक्लेनवम्यांचविशेषतः।संपूज्यनवदुर्गांचनक्तंकुर्यात्समाहितः।नवरा
त्राभिधंकर्मनक्तव्रतमिदंस्मृतं।आरंभेनवरात्रस्येत्यादिस्कांदात्।माधवोक्तेश्च।
नक्तमेवप्रधानमितिचेत्तर्हिनवरात्रोपवासतदुत्यादेरनुपपत्तेः।तेनपाक्षिकनक्ता

न१

नुवादोयं।ननुरात्रेःकर्मकालत्वेतद्व्यापिनीपूर्वैवप्रतिपद्ग्राह्यास्यात्।मैवं।न्यायतःप्राप्ताव
पिपूर्वैक्तिवचनैर्बाधात्।यथापूर्वेद्युःकर्मकालव्यापिनीमपित्यक्त्वाखल्पापिपरैव
रामनवमीतिप्रागुक्तं।यथावानिशीथसतीमपिपूर्वांजन्माष्टमीसत्कारोहिणीयुक्ता
परैवेतिमाधवेनोक्तं।तथात्रापि।वस्तुतस्तुरात्रेःकर्मकालत्ववचसोहेमाद्यादिलिख
नासमतत्वंविमृश्यमेव।त्रिकालंपूजयेदित्यादिपूर्वविरोधाच्च।माधवोक्तिस्तुपा
क्षिकनक्तानुवादइत्युक्तं।तस्मात्सर्वपक्षेषुपरैवप्रतिपदितिसिद्धं।अत्रकेचिन्नवरा
त्रशब्दोनवाहोरात्रपरः।वृद्धौसमाप्तिरष्टम्यांह्रासेतुप्रतिपन्निशि।प्रारंभोनवरात्रस्या
कनवरात्रमतोर्थवदितिदेवीपुराणादित्याहुः।तन्न।अतिह्रासवृद्ध्योःन्यूनाधिकस्या
पत्तेः।अत्रनमस्कारोनावाच्यं।तेनतिथिवाच्येवायं।तदुक्तं।तिथिवृद्धौतिथिह्रासेनवरात्र
मपार्थकं।अष्टरात्रेनदोषोयंनवरात्रंतिथिक्षयेइति।सचनवरात्रशब्दः...
त्याकर्मवाची।यथाप्रारंभोनवरात्रस्येतिदिक्॥ ॥प्रतिपद्विशेषस्त्वा...
यथानागैर्वार्च्चनदीपिकायांदेवीपुराणे।त्वाष्ट्रवैधृतियुक्ताचेत्प्रतिप...
तयोरंतेविधातव्यंकलशारोपणंगुरुतो।चित्रावैधृतियुक्तापिप्रहि...
तत्सेवयाहितिरुक्तं।दुर्गोत्सवेनक्षत्रान्वितात्रचेत्प्रतिपत्तुलब्धयतेविरुद्धयो...

सती। सैवापराह्णे विबुधैर्विधेया श्रीपुत्रराज्यादिविवृद्धिरेनुमिति
ध्यत्यादिपरिहारेण प्रतिपन्नवन्यतेत्तदोक्तं तत्रैव कात्यायनेन। प्रतिप
नास्मिन्नवो वैधृतिचित्रयोः॥ आद्यपादौ परित्यज्य प्रारभेन्नवरात्रकं
विष्येपि। चित्रावैधृतिसंपूर्णा प्रतिपच्चेद्भवेन्नृप। त्याज्या अंशास्त्र
स्तुरीयांशे तु पूजनमिति॥ रुद्रयामलेपि। वैधृतौ पुत्रनाशः स्याच्चित्रायां धन
शनं। तस्मान्न स्थापयेत्कुंभं चित्रायां वैधृतौ तथा। संपूर्णप्रतिपद्येव चित्रायुक्ता
यदा भवेत्। वैधृत्या वापि युक्ता स्यात्तदा मध्यंदिने रवौ। अभिजित्तु मुहूर्तं यत्तत्र
स्थापनमिष्यते इति। चित्रादिनिषेधस्तु नं चिंत्यां। इदं कलशस्थापनं रात्रौ न का
र्यं। रात्रौ स्थापनं कार्यं न च कुंभाभिषेचनमिति मात्स्योक्तेः॥ भास्करोदयमार
भ्य यावत्तु दश नाडिकाः॥ प्रातः काल इति प्रोक्तः स्थापनारोपणादिषु इति विष्णुध शिवः
र्मोक्तेः॥ रुद्रयामले॥ स्नानं मांगलिकं कृत्वा ततो देवीं प्रपूजयेत्। तु नाभिमंत्रि
काभित्त्वपूर्वेलित्वा तु वेदिकां। यवान्वै वापयेत्तत्र गोधूमैश्चापि संयुतान्। तत्र सं ॥ ई ई॥
स्थापयेत्कुंभं विधिना मंत्रपूर्वकं। सौवर्णं राजतं वापि ताम्रं मृन्मयजं तु वेति॥
॥ ॥अथ पूजाविधिः॥ ॥सा च जयंती मंत्रेण नवार्णेन वा कार्या। तदुक्तं

वरदे विद्वे दैत्यदर्पनिषूदनि। पूजां गृहाण सुमुखि नमस्ते शंकरप्रिये। सर्वती
र्थमयं वारि सर्वदेवसमन्वितं। इमं घटं समागच्छ तिष्ठ देवगणैः सह। दुर्गे देवि स
मागच्छ सान्निध्यमिह कल्पय॥ बलिं पूजां गृहाण त्वमष्टाभिः शक्तिभिः सह इत्या
वाह्य। पूर्वोक्तमंत्रेण षोडशोपचारैः पूजयित्वा माषभक्तबलिं कूष्मांडादि
बलिं वा निवेदयेत्॥ ततः कुमारीपूजा॥ ॥ ॥तदुक्तं हेमाद्रौ स्कांदे॥ एकै
कां पूजयेत्कन्यामेकवृद्ध्या तथैव च। द्विगुणं त्रिगुणं वापि प्रत्येकं नवकं तु वा॥
तथा। नवभिर्लभते भूमिमैश्वर्यं द्विगुणेन तु। एकवृद्ध्या लभेल्लक्ष्मीमेकैकेन नृपि
यं लभेत्॥ एकवर्षा तु या कन्या पूजार्थे तां विवर्जयेत्॥ गंधपुष्पफलादीनां प्री
तिस्तस्या न विद्यते। तेन द्विवर्षमारभ्य दशवर्षपर्यंता एव पूज्याः। न तदन्या
च ता। सांख्यक्रमेण कुमारिका त्रिमूर्तिः कल्याणी रोहिणी काली चंडिका शांभ
सुभद्रेति नामभिः पूजा कार्या॥ आसां च प्रत्येकं पूजामंत्राः फलविशे
तत्रैव ज्ञेयाः॥ सामान्यतस्तु॥ मंत्राक्षरमयीं लक्ष्मीं मातृणां रूपधारिणीं
दुर्गात्मिकां साक्षात्कन्यामावाहयाम्यहं। एवमभ्यर्चनं कुर्यात्कुमा
तः॥ कंचुकैश्चैव वस्त्रैश्च गंधपुष्पाक्षतादिभिः॥ नानाविधैर्नैवे

दुर्गानक्तितरंगिण्यां देवीपुराणे। कुर्याद्देव्यास्तु मंत्रेण पूजां ह्रीं नवरात्रि
स्वा। जयंती मंगला काली भद्रकाली कपालिनी। दुर्गा क्षमा शिवा धात्री
धानमोस्तु ते॥ अनेनैव तु मंत्रेण जपहोमौ तु कारयेदिति। दुर्गोत्सवे
इति नवाह्नः। तत्र प्रतिपदि प्रातरभ्यंगं कृत्वा देशकालौ संकीर्त्य मम
दुर्गाप्रीतिद्वारा सर्वापच्छांतिपूर्वकदीर्घायुर्विपुलधनपुत्रपौत्राद्यनवच्छिन्न
संततिवृद्धिस्थिरलक्ष्मीकीर्तिलाभशत्रुपराजयसदभीष्टसिद्ध्यर्थं शारदनवरात्रे
प्रतिपदि विहितकलशस्थापनदुर्गापूजाकुमारीपूजादि करिष्य इति संकल्प्य
महीद्यौरिति भूमिं स्पृष्ट्वा ओषधयः सं वदंत इति यवान्निक्षिप्य आकलशेष्विति कलशं
स्थाप्य इमं मे गंगे इति जलेनापूर्य गंधद्वारामिति गंधं या ओषधीरिति सर्वौषधीः
कांडात्कांडादिति दूर्वा अश्वत्थे व इति पंचपल्लवान् स्योना पृथिवीति सप्तमृदः
याः फलिनीरिति फलं सहिरत्नानीति पंचरत्नानि हिरण्यं रूपमिति हिरण्यं युवा सुवासा इ वासु ३
ति वस्त्रेण वेष्ट्य पूर्णादर्वीति पूर्णपात्रं निधाय तत्र वरुणं संपूज्य जीर्णायां म
तनायां वा प्रतिमायां दुर्गामावाह्य पूजयेत् तत्र यथा प्रोक्तं मंत्रमुक्ता। आग

जयेत्सायसारदिन्निग। तथा। ओं विस्फुलितशीलांगीं रक्तहयवर्णा किर्ता॥ आ
त्यंधांके केरां कृतांगीं रुद्ररूपां तनुरोमशां॥ सेव्यजे द्रोणि ले। कन्यां रामीगर्त्तसमु
द्भवां॥ तथा॥ आलती सर्वका येषु जयार्थेन्द्र पूवेशजां॥ आम्नायेवेश्यवंशोद्भवां
सुतार्थे शूद्रवंशजां॥ दारुणां चांत्यजातानां इज्ञयेद्विधिना नर इति॥ अत्र वेदपारा
यणं मपफलं रुद्रयामले॥ एवं च तर्वदविदो विप्रान् सर्वान् प्रसादयेत्॥ तेषां च
वरणं कार्यं वेदपारायणाय वै इति॥ तथा॥ एकोत्तरानि वा ध्यान्तं नवमीयावद
द्ब्रवहि॥ चंडीपाठं जपं कुर्याज्जापयेद्वा विधानतः॥ प्रतिपत्तिथितत्वे वाराहीतंत्रे
पणं वचादितो भ स्वास्तोत्रेवा संहितापठेत्॥ आते वडगपवंदद्यादित्य
दितुरुपः॥ आधारस्थापयित्वा तु पुस्तकं प्रजपेत्सुधीः॥ हस्तसंस्थापना
यस्मात्द्विफलं नवेत्॥ स्वयं च लिखितं यच्च शूद्रेणालिखितं च वा
लेणं न लिखितं तत्वापि विफलं भवेत्॥ रुपिद्वप्तोदकं न्यस्य प
चन्त्तणः॥ स्तोत्रेण दृश्यते यत्र प्रणवं तत्र विन्यसेत्॥ सर्वत्र पा
स्वान्यथा विफलं भवेत्॥ एवं नवमीपर्यंतं प्रत्यहं प्रत्यहं क

विशेषो हेमाद्रौ देवीपुराणे॥ यदाद्ये दिवसे कुर्यादेकाहं न ना
गुणं तद्द्वितीये द्विस्त्रिगुणं तत्स्मरेद्दिनि॥ नवमी तिथिपर्यन्तं वृद्ध्या
दिकमिति॥ एतेन नवरात्रे पूजैव प्रधानं उपवासादि त्वंगमिति निर्
णयसिन्धौ तु तिथिद्वयनिमित्तं पूजादि महालयश्राद्धवदेकदिने
यं॥ व्रतेति तद्देवा इति॥ ततः नवरात्रोपवासादिसंकल्पं कुर्यात्॥ स्वयमश
क्तावन्येन वा पूजादिकारयेत्॥ स्वयं वाप्यन्यतो वापि पूजयेत्पूजयीत वेति
तरंगिण्यां देवीपुराणात्॥ इदं च देवीपूजनं स्त्रीभिः सत्त्वादावपि कार्यं॥ तदुक्तं ध
र्मप्रदीपे॥ नष्टे शुक्रे तथा जीवे सिंहस्थे च बृहस्पतौ॥ कार्या चैव स्वदेव्यर्चा
च प्रत्यब्दं कुलधर्मतः इति॥ मलमासे तु वचनान्नावान्तरं भवति॥ अत्र सा
यस्यां च पूजनमुक्तं मदनरत्ने देवीपुराणे॥ आश्विने शुक्लपक्षे प्रतिपत्स्वा
तियोगे शुभे दिने॥ पूर्वं मया चैतत् व्रतं नाम प्रथमं प्रियमावहत्॥ तस्मात्सायं शिव
नैरत्र पूज्यो सौ श्रद्धया सह॥ पूजनीयाश्च तरगा नवमी यावद्दवहि॥
शान्तिस्वस्त्ययनं कार्यं सदा तेषां दिने दिने॥ धान्यं चतुष्ट्वा तर्कं कुष्ठं वचा ६९

सिद्धार्थकास्तथा॥ पंचवर्णेन सूत्रेण ग्रथितं तेषां तु बंधयेत्॥ वायव्यैर्वारुणैः सौरै
शाकैर्मंत्रैः सुवेष्टयेत्॥ वैश्वदेवस्तथाग्नेये होमः कार्यो दिने दिने॥ कल्पतरौ त्वेत
रत्रेत्यप्युक्तं॥ ज्येष्ठायोगे पुरा तत्र गजाश्वा हेमहाबलाः॥ पृथिवीमवहन्नूर्व
मशैलवनकाननां॥ कुमुदैरावतो पद्मः पुष्पदन्तोथ वामनः॥ सुप्रतीकोञ्ज
नो नीलस्तस्मात्तां पूजयेत्॥ शाकारत्नासमारभ्य नवम्यंतं च पूर्ववत्॥
अश्वदक्षमादीत्यर्थः॥ ॥अथ प्रतिपदादिषु विशेषो दुर्गाभक्तितरंगिण्यां
लिंगे॥ केशसंस्कारद्रव्याणि प्रदद्यात्प्रतिपद्दिने॥ पट्टं तैलं द्वितीयायां के
शसंयमहेतवे॥ पट्टडोरमिति गौडपाठः॥ दर्पणं च तृतीयायां सिन्दूराल
कं तथा॥ मधुपर्कं चतुर्थ्यां तु तिलकं नेत्रमंडनं॥ पंचम्यामंगरागं च श
लंकरणानि च॥ षष्ठ्यां बिल्वतरौ बोधं सायं संध्यासु कारयेत्॥ स
तरानीय गृहमध्ये प्रपूजयेत्॥ उपोषणं महाष्टम्यामात्मश
नं॥ नवम्यां पूर्ववच्चेज्याः पूजां कुर्याद्बलिं तथा॥ संहृत्य प्रेषणं
म्यां सारवोत्सवैः॥ अनेन विधिनायस्तु देवीं प्रीणयते नरः॥ सर्व
ये देवी ते पुत्रधनकीर्तिभिः॥ तस्य तत्याणि वैजंगो॥ कन्यायां

जपित्वार्द्धरात्रेपि च॥ नवम्यां बोधयेद्देवीं महाविभवविस्तरैः॥ आ[illegible]
तु देवीं केशविमोक्षणं॥ प्रातरेव तु पंचम्यां स्नापयेच्छुद्धतेजने॥ पूज[illegible]
वेतबिल्ववृक्षेधिवासनं॥ सप्तम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणं[illegible]
जागरश्चैव नवम्यां विधिवद्बलिः॥ विसर्जनं दशम्यां तु श्रीडाकौतु[illegible]
अत्र नवम्यां बोधना सा मध्ये षष्ठ्यां बोधनमिति सम्मतं॥ फलं तु मा[illegible]
चेय इत्यन्ये॥ नवम्यां मंत्रः कालिकापुराणे॥ इषमास्य सितपक्षे नवम्यामार्द्र[illegible]
दिवा॥ श्रीवृक्षे बोधयामि त्वां यावत्पूजां करोम्यहं॥ अत्र स्त्री शूद्रविशेषः प[illegible]
षायां ज्ञेयः॥ अथाशौचे विशेषो निर्णयामृते विष्णुरूपनिबंधे॥ आश्विने शुक्लप
क्षे तु प्रारब्धे नवरात्रके॥ शावाशौचे समुत्पन्ने क्रिया कार्या कथं बुधैः॥ सूतके व
र्तमाने च तत्रोत्पन्ने सदा बुधैः॥ देवीपूजा प्रकर्तव्या पशुयज्ञविधानतः॥ सूत
के पूजनं प्रोक्तं दानं चैव विशेषतः॥ देवीमुद्दिश्य कर्तव्यं तत्र दोषा न विद्यते इ
ति॥ कालादर्शे विष्णुरहस्येपि॥ पूर्वसंकल्पितं यच्च व्रतं सुनियतव्रतैः॥ तत्क शिवः
र्तव्यं नरैः शुद्धं दानार्चनविवर्जितमिति॥ गौडनिबंधे तु पितृदयितेत्युक्तं॥ आश्वि ६९
ने शुक्लनवम्यादिशुक्लप्रतिपदादिषष्ठ्यादिसप्तम्यादि वैककर्म अतश्च म

ध्येआशौचपातेपि न दोषः॥ संकल्पो व्रतसत्रयोरिति विज्ञानेश्वरोक्तेरिति॥ आरब्धं स्वय
मेव कार्यं॥ अनारब्धं त्वन्येन कारयेदिति दिवोदासः॥ रजस्वला त्वन्येन कारयेत्॥
सूतकादिवद्विशेषवचनाभावात्॥ स्त्रीणां च नवरात्रे ताम्बूलादि च वर्ज्यं न वा इति॥
तदुक्तं व्रतहेमाद्रौ पाराशरे॥ गंधालंकारताम्बूलपुष्पमालानुलेपनं॥ उपवासेन
दुष्येत दंतधावनमंजनमिति॥ एतन्नक्तैकोपवासविषयं॥ अन्यस्मात्र विशेषः
परिभाषायामुक्तः॥ ॥ आश्विनशुक्लपंचम्यां उपांगललिताव्रतं हेमाद्रौ प्रसि
द्धं॥ तत्र यद्यपि कार्यायां कालविशेषो नोक्तस्तथापि रात्रौ जागरणोक्त्या जितवादि
त्रनिषेधनिषिति रात्रौ जागरोक्तेः॥ शक्तिपूजाया रात्रौ प्राशस्त्याच्च रात्रिव्यापिनी ग्रा
ह्येति केचित्॥ वस्तुतस्तु वचनं विना रात्रिपूजायां मानाभावात्॥ जागर[illegible]
णं तु पुण्यवाक्यात्॥ उक्तो जागरणे न केवलं प्रधानव्रते तथा॥ तारा[illegible]
सु रात्रियोगो विशिष्यते इति कालहेमाद्रौ वचनाच्च॥ पूर्वविद्धा[illegible]
शूः पूर्वविद्धावचन इति हेमाद्रिः॥ अस्य च तु उक्तो जागरणरूप[illegible]
नीमः॥ उक्तो जागरणं यत्रैत्येकं पदं॥ तस्मिन्व्रते इत्यर्थः॥ अन्य[illegible]
तः॥ दिवोदासीये एवं॥ आश्विनशुक्लपक्षे सज्जनहन्त्रे सरस्वती[illegible]

घो कं निर्णयामृते देवीपुराणे ॥ मूलेषु स्थापनं देव्याः पूर्वाषाढासु पूजनं [illegible]
बलिं दद्यात् श्रवणेन विसर्जयेत् ॥ रुद्रयामलेपि ॥ मूलऋक्षे सुराधीश [illegible]
स्वती ॥ पूजयेत्प्रत्यहं देव्या यावद्वैष्णवमृक्षकं ॥ नाध्यापयेन्न च लिखे[illegible]
हाचन ॥ पुस्तके स्थापिते देवि विद्याकामो द्विजोत्तमः ॥ संग्रहे ॥ आश्विन[illegible]
लेन ध्याकामः सरस्वती ॥ मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् ॥ म[illegible]
आवाहनमितिशिष्टाः ॥ श्रवणाद्यपादे च विसर्जयेत् ॥ आदिनांगा निशायां तु श्र
वणस्य यदा न वेत् ॥ संप्रेषणं तदा देव्या दशम्यां च सदा भवेदिति ॥ चिंतामणौ
ब्रह्मांडपुराणात् ॥ ॥ अथ षष्ठी ॥ ॥ गौडनिबंधे देवीपुराणे ॥ ज्येष्ठानक्षत्रयुक्ता
यां षष्ठ्यां बिल्वाभिमंत्रणं ॥ सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनं ॥ पूर्वाषाढ
युताष्टम्यां पूजा होमाद्युपोषणं ॥ उत्तरेण नवम्यां तु बलिभिः पूजयेच्छिवां ॥ श्रव
णेन दशम्यां तु प्रणिपत्य विसर्जयेत् ॥ कालिकापुराणे ॥ बोधयेद्बिल्वशाखायां
षष्ठ्यां देवीं फलेषु च ॥ सप्तम्यां बिल्वशाखां तामाहृत्य प्रतिपूजयेत् ॥ पुनः पूजां
तथाष्टम्यां विशेषेण समाचरेत् ॥ जागरं च स्वयं कुर्याद्बलिदानं महानिशि ॥ प्र
भूतबलिदानं तु नवम्यां विधिवच्चरेत् ॥ विसर्जनं दशम्यां तु कुर्याद्वै सारवो

शिव: ७०

त्सवैः ॥ धूलिकर्दमविक्षेपैः क्रीडाकौतुकमंगलैः ॥ अत्र सर्वत्र तिथिनक्षत्रयोगाद्दौर्मुख्यः
कल्पः ॥ तदभावे तु तिथिरेव ग्राह्या ॥ तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितं तस्मात्तिथिं
प्रशंसंति न नक्षत्रं न तिथिं विना ॥ इति विद्यापतिलिखितवचनात् ॥ तिथिनक्षत्रयोर्योगे द्वयो
रेवानुपालनं ॥ योगाभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि ॥ इति चैव दक्षोक्तेश्च ॥ अत्र च प
त्रीप्रवेशात्पूर्वेद्युः सायंकाले षष्ठ्यभावे तत्पूर्वेद्युर्दिनेऽधिवासनं कार्यं ॥ सायंकाले [illegible] तासत्त्वे
ऽधिवासनं नापः ॥ षष्ठ्यां सायं प्रकुर्वीत बिल्ववृक्षेऽधिवासनमिति पूर्ववचनादिति कल्पत
रुः ॥ सायं कृत्वेति फलात्तिथ्यमाचार्या ननु कर्मणा पद्धत्याचार्यं चूडामणिः ॥ अत्र क्रमः ॥ [illegible]
स्वसमीपं गत्वा देवीं बिल्वं च संपूज्य प्रार्थयेत् ॥ तत्र मंत्रः ॥ रावणस्य वधार्थाय रामस्या
नुग्रहाय च ॥ अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥ अहमप्याश्रितः षष्ठ्यां सायं
बोधयाम्यतः ॥ श्रीशैलशिखरे जातः श्रीफल श्रीनिकेतनः ॥ नेतव्योसि मया गच्छ [illegible]
दुर्गास्वरूपतः इति ॥ एवं देवीमधिवास्य परदिने निमंत्रितबिल्वशाखां पत्रीं प्र[illegible]
यित्वा ॥ तदुक्तं हेमाद्रौ लैंगे ॥ सप्तम्यां तु सप्तम्यां कन्यायां प्रवेशयेत् ॥ पूजा[illegible]
स्य फलानां शाखिकोत्तथा ॥ न चैव प्रतिमां देव्याः स्नात्वा फलस्य प्रवेशये[illegible]
पवासपूजादौ वा रात्रिकी ग्राह्या ॥ न तु युग्मवाक्यात्पूर्वा ॥ युग्मापात पूर्वा[illegible]

र्वत्। प्रियार्थे वेरुदयम्॥ तेन तत्र तिथियुग्मतेति तिथितत्त्वार्णवो
क्तौ॥ भगवत्याः प्रवेशादि विसर्गान्ताश्च याः क्रियाः॥ तिथ्यावुदयगामि
रयेत्तु यदीति निर्णयतत्त्वे नंदिकेश्वरपुराणात्॥ दुर्गोत्सवे क्षितरंगिण्यामप्य
घटिकातो न्यूनत्वे परा न कार्या॥ व्रतोपवासनियमे घटिकैकापि या भवे
न्नोक्ते रितिगौडाः॥ दाक्षिणात्यास्तु पूर्वेद्युर्न महाष्टमीयुग्मवाक्यात् पूर्वोक्तवे
कापूजा च पूर्वाह्ण एव कार्या न तु मूलानुरोधान् मध्याह्नादाविति तिथ्यत्त्वार्णवे
पत्रिकास्तु॥ रंभा कच्वी हरिद्रा च जयंती बिल्वदाडिमौ॥ अशोको मानकश्चैव
धान्यादि नवपत्रिका इति तत्रैवोक्ताः॥ अस्यामेव सप्तम्यां देवीत्रिरात्रमुक्तं माधवे॥
करणार्द्ध प्रतिपदादि नवतिथिषूपवासादिसामर्थ्ये सप्तम्यादि दिनत्रयं वा कुर्यात्॥ तदा
हश्चैम्यः॥ आश्विने मासि शुक्ले तु कर्त्तव्यं नवरात्रकं॥ प्रतिपदादिक्रमेणैव यावच्च श्रीवः
नवमी भवेत्॥ त्रिरात्रं वापि कर्त्तव्यं सप्तम्यादि यथाक्रमं॥ अत एव हेमाद्रौ देवीपुरा ७२
णे मंगलाव्रतं॥ आश्विने वाथ माघे वा चैत्रे वा श्रावणेपि वा॥ सप्तम्यादिक कर्त्तव्यं
व्रतं शुक्लाविवर्द्धिष्टे॥ यावच्छुक्लाष्टमी शक्र उपोष्यं तु विधानतः॥ दानं होमोज्जपः पू
जा कन्या भोज्यास्तथा॥ नवरं महानवरूपेण अग्निमानाधराश्रयेः॥ पूजनीयावि

शेषेण वस्त्रैर्धूपपुरादिषु॥ इति मासचतुष्टये विधाय। अथवा नवरात्रं च सप्तमे
नवैकं दिवा॥ एकनक्तेन नक्तेनायाचितोपोषितैः क्रमादिति। पूजयेताश्विने शुक्ल
यावच्छुक्लाष्टमी भवेत्॥ सर्वकार्याणि सिद्ध्यंति शक्र नास्त्यत्र संशय इत्युक्तं। देवत्ये
कारात्रमुक्तं देवीपुराणे। नवरात्रव्रतं शक्र त्रिरात्रं चैकरात्रकं॥ व्रतं चरति यो भक्त्या स
म्पदा स्यादभिवांछितमिति। तत्रापि सप्तम्याः पूर्वोक्तो निर्णयः॥ अत्र तिथियोगपक्षे
तंत्रेणोपवासः॥ तिथिद्वयनिमित्तं पूजादिकं तु भेदेन। अत्र विशेषो निर्णयामृते
भविष्ये। सप्तम्यां नवगेहानि दारुजानि नवानि च॥ एकं चित्रं नवं देवि भावेन कारये
त्सुसमाहितः॥ दुर्गागृहं प्रकर्त्तव्यं चतुरस्रं सुशोभनं॥ तन्मध्ये वेदिकां कुर्यात्...ना
स्त्रां समां॥ अनंतरं तस्यां सिंहासनं हैमं कुंबलाजिनसंयुतं॥ तत्र दुर्गां प्रतिष्ठा...
नवरत्नसंयुतां॥ चूडेश्वतु नीरुचिरैर्दिग्भिर्वाविभूषितां॥ सप्तहाटककाय...
निर्घांशशिशेखरां॥ अनेककुसुमाकीर्णां कपर्देन सुशोभितां॥ नितंब...
किंकिणीक्वाणनादिनीं॥ शूलचक्रदंडशक्तिवज्रचापासिधारिणीं॥ खट्वां...
रकपालपात्रनसत्करां॥ तद्ग्रेछिन्नशिरसं महिषं रुधिराकृतं॥ नि...
कंठनालेन चर्मासिधारिणं॥ देवीहस्तकराग्रीवं शूलेनोरसिताडितं॥ ना

क्षिसंदृश्यर्द्धेण।पिबिकृते।वमकुधिरनक्रेण धुन्वतोर्द्धं सरानरूपा।
क्रेणसेव्यमानं सुरैस्तथेति॥तत्रदेवीप्रकर्त्तव्याहेमी वा राजतीतथा।
रूणोपेताखड्गशूलेनचपूजयेत्॥वार्क्षीदारुमयी॥देवीमूर्त्तिस्थापने।
नक्षितरंगिण्यां देवीपुराणे।याम्यास्या कुर्वदादुर्गापूर्वोस्या जयवर्द्धि
मानिमुखी।नित्यं नस्थाप्यासौम्यदिङ्मुखी।प्रतिमाभावे विशेषस्तु देवे
तन्त्रे तु तुरीयं चित्रार्पितापि वा।खड्गशूले र्चितादेवी सर्वकामफलप्रदा॥
स्यायुधं प्रोक्तं तस्मिंस्तां प्रतिपूजयेत्॥देवी नक्रार्चिता पुंसां राज्यायुःसुतम्
लत्यतत्त्वार्णवे कालिकापुराणे।लिंगस्थां पूजयेद्देवीं मंडलस्थां तथैव च। पुस्तक
स्थां महादेवीं पावके प्रतिमासु च।चित्रे च त्रिशिखे खड्गे जलस्थां वापि पूजयेत्॥
बिल्वपत्रे यजेद्देवीं तथा जातीप्रसूनकैः।नानापिष्टकनैवेद्यैर्धूपदीपैर्मनोहरैः॥ शि॰कृ॰।
नगलिंगाभिधाने च नगलिंगप्रगीतके।नगलिंगक्रियाभिश्च प्रीणयद्वरचंडिकां। ७२
परैर्नाक्षिप्यते यस्तु यः परान्नाक्षिपत्यपि तस्य क्रुद्धा भगवती शापं दद्यात्सुदारुणं॥
चित्रमन्मयाद्दोस्नानाघसेनवेत्तत्रैवोक्तं॥मूर्त्तिकस्थापितेखड्गे स्नापयेद्दर्पणेष्वेति।
॥ ॥अथसप्तमीपूजाविधिः॥ ॥प्रतिपदधकल्कविधिनाफलमसंकीर्त्तनांतेनचपत्रिका

मन्मयदुर्गायै आबलिदानानि करिष्य इति संकल्प्य पूर्वदिनामंत्रितबिल्वस
मीपं गत्वा संपूज्या गच्छ सर्वकल्याणीति श्लोकं मंत्रं पठित्वा॥बिल्वदक्षम हाभा
गस्सदात्वं शंकरप्रियः।गृहीत्वा तव शाखां च देवीं पूजां करोम्यहं॥शाखाच्छेदो
द्भवं दुःखं नच कार्यं त्वया प्रभो॥गृहीत्वा तव शाखां च पूज्या दुर्गेति च स्मृतिः॥
अतिष्ठ पत्रिके देवि सर्वकल्याणहेतवे॥पूजां गृहाण सकलामस्माकं वरदा
भव॥मेरुमंदरकैलाशहिमवच्छिखरे गिरौ॥जातः श्रीफल वृक्षत्वमंबिका
याः सदा प्रियः इति संप्रार्थ्य छिंधि फट् फट् ओं हुं फट् स्वाहेति॥छित्वा संप्र
यच्छ चामुंडे चल चल इति वाद्य[illegible] देवीं तां च गृहं प्रवेशय॥आरोपिता
सि दुर्गे त्वं मन्मयार्थं श्रीफले पि चामि हि रानितां तं तु त्वा च गृहे त्वं कामरा[illegible]
नि स्थिरी सत्यरं भादिपत्रिकापंचगव्येन पंचामृतेन च[illegible]
भेणावेष्ट्य स्थापयेत्॥ततः पूर्ववत्संकल्पं कृत्वा तां नानादायके[illegible]
येत्॥तत्र मंत्रः॥श्री वाससा मधुरे देवि मन्मयार्थं श्रीफले तथा॥[illegible]
वराह विविधा मे हिमपर्वताला॥आगत्य बिल्वशाखायां च[illegible]
स्थिभो॥लक्ष्मीपतासि मया दुर्गे पूजयेत्वां प्रसीद मे॥सदानंद[illegible]
×आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तुते॥दुर्गे दुर्गस्वरूपासि सर्वेते जो मया[illegible]

द्ममसिद्धये॥ पत्रे हिन्नगवत्थं बुशकदुयजयप्रदे। नक्तितः सु...
दे विष्णुराचिंते॥ पद्मवैश्वफलो येते ... कस्तुमनो हरे॥ पद्म...
विसृजये त्वां प्रसीदमे॥ दुर्गे देवि इहागच्छ सान्निध्यमिह कल्पय॥...
णान्नरहाण त्वं योगिनी कोटिभिः सह॥ ततो मूलमंत्रेण पाद्यादि...
रे संसृज्य॥ मतो वृक्षवन्वश्री रद्धं शंकरस्य सदा प्रियं॥ बिल्वपत्रं प्रय...
विश्रे तेषु रेश्वरी॥ ति बिल्वपत्रं॥ ब्रह्मविष्णु शिवादीनां प्रीणाप्युष्यं सदा प्रियं...
ते दुर्गे प्रयच्छामि सर्वकामार्थसिद्धये॥ इति प्राणाच्छु व्यं निवेद्य धूपादि दक्षिणा...
तां मूलमंत्रेण दत्वा प्रार्थयेत्॥ उं महिषघ्नि महामाये चामुंडे मुंडमालिनि॥
आयुरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते॥ कुंकुमेन सदालब्धे चंदनेनाविले...
पिते॥ बिल्वपत्रलताप्रीते दुर्गे हं शरणं गतः॥ रूपं देहि यशो देहि भगं भगवति
देहि मे॥ पुत्रान् देहि धनं देहि सर्वान्कामांश्च देहि मे॥ सर्वमंगलमांगल्ये इति
संप्रार्थ्य पत्रिकाः पूजयेत्॥ कदल्या ब्रह्माणी दाडिमे रक्तदंतिका॥ धान्ये लक्ष्मी
हरिद्रायां दुर्गा माने चामुंडा कचौ कालिका॥ बिल्वे शिवा अशोके शोकरहिता ज...
यंत्यां कार्त्तिकी चावाह्य संपूज्य दुर्गायै बलिं दद्यात्॥ ॥अत्र शस्त्रागजादि

लां।२

७३

शिवां२

पूजा यस्यते॥ ततः स्तुतिं पठेत्॥ तदुक्तं शिवरहस्ये॥ दुर्गां शिवां शांतिकरीं
ब्रह्माणीं ब्रह्मणः प्रियां॥ सर्वलोकप्रणेत्रीं च प्रणमामि सदा प्रियां॥ मंगलां
शोभनां शुद्धां निःकलां परमां कलां॥ विश्वेश्वरीं विश्वमातां चंडिकां प्रणमाम्य
हं॥ सर्वदेवमयीं देवीं सर्वरोगभयापहां॥ ब्रह्मेशविष्णु नमितां प्रणमामि स...
उमां॥ विंध्यस्थां विंध्यनिलयां दिव्यस्थाननिवासिनीं॥ योगिनीं योगमातां च
चंडिकां प्रणमाम्यहं॥ ईशानमातरं देवीमीश्वरीमीश्वरप्रियां॥ प्रणतोस्मि सदा
दुर्गां संसारार्णवतारिणीं॥ य इदं पठति स्तोत्रं शृणुयाद्वापि यो नरः॥ स मुक्तः
सर्वपापेभ्यो मोदते दुर्गया सह॥ ॥अथ महाष्टमी॥ ॥सा च परयुता
॥शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी॥ पूर्वविद्धा न कर्त्तव्या कर्तव्या...
संयुतेति ब्रह्मवैवर्त्ते॥ मदनरत्ने स्मृतिसंग्रहे॥ शारन्महाष्टमी...
वमीसंयुता सदा॥ सप्तमीसंयुता नित्यं शोकसंतापकारिणी॥ ज...
मी दुर्गा पूजिता तु महाष्टमी॥ इंद्रेण निहतो जंभस्तस्माद्दानव...
तस्मात्सर्वप्रयत्नेन सप्तमीमिश्रिताष्टमी॥ वर्जनीया प्रयत्नेन म...

कोटिभिः॥ सप्तमीशल्यसंयुक्तां मोहादज्ञानतोपि वा॥ महाष्टमी […]
रकं प्रतिपद्यते॥ सप्तमी कलया यत्र परतश्चाष्टमी भवेत्॥ तेन […]
[illegible] त्रपौत्रधननाशयं॥ तथा॥ पुत्रान्हन्ति पशून्हन्ति हन्ति राष्ट्र […]
हन्ति जाताजातांश्च सप्तमीसहिताष्टमी॥ तेन नात्र त्रिमुहूर्तवेध […]
के ५ टिकापि यान्नवेदिति देवलोक्तेः॥ गौडास्तु घटमात्राकुः॥ अत एव […]
न च सप्तमी शल्यं समोपहतेति॥ इयं श्रमेति मशस्ता॥ अष्टम्यामुदिते […]
द्दिनो तेन नवमी नवेद्वा॥ कुण्डवारो नवेन त्र पूजनीया प्रयत्नत इति मदन
त्ने वचनात्॥ सप्तमीशल्यसंविद्धा वर्जनीया सदाष्टमी॥ स्तोकापि सा महा
पुण्या यस्यां सूर्योदयो भवेदिति मदनरत्ने स्मृतिसमुच्चयवचनात्॥ अ
ष्टमी नवमीयुक्ता नवमी चाष्टमीयुतेति पद्मवचनाच्च॥ इयमेव मूलयु
क्ता चेन्महानवमी संज्ञा॥ माघशुक्लपक्षे याष्टमी मूलेन संयुता॥ सा शिवः
महानवमी प्रोक्ता त्रैलोक्येप्यतिदुर्लभेति हेमाद्रौ स्कांदात्॥ मूलयुक्तापि ७४
सप्तमीयुता चेत्त्याज्यैवेत्युक्तं निर्णयामृते दुर्गोत्सवे॥ मूलेनापि हि संयु

क्ता सदा त्याज्याष्टमी बुधैः॥ [illegible]॥ लेशमात्रेण सप्तम्या अपि स्याद्य
दि दूषितेति॥ महाष्टमी पर्वेद्युः पूर्वाह्णव्यापित्वे परान्यथा परैवेति निर्णयप्रदीपम
तं॥ एतच्च [illegible] रूपनारायणधृते देवीपुराणे सप्तमीवेधसंयुक्ता यैः कृता तु
महाष्टमी॥ पुत्रदारधनैर्हीना भ्रमंतीह पिशाचवत्॥ यत्तु सप्तम्यामुदिते सूर्ये परतो
याष्टमी न वेद्वा॥ तत्र दुर्गोत्सवं कुर्यान्न कुर्यादपरेहनीति विष्णुपनिबंधवचनं त
दाश्विनशुक्लाष्टमीविषयं॥ कन्यायां कृष्णपक्षे तु पूजयित्वाष्टमीदिने॥ नवम्यां बोध […]
ह देवीं गीतवादित्रनिःस्वनैरिति देवीपुराणे तत्रापि पूजोक्तेरिति हेमाद्रौ निर्णया […]
[illegible]॥ [illegible] अष्टम्यामुदिते सूर्ये [illegible] नवमी नवे […]
[illegible]॥ यानि तु न […]
स्याच्च मध्ये स्यादर्चनक्रिया॥ तस्मात्सप्तमीविद्धा कार्या दुर्गाष्टमी बुधैः […]
मी॥ [illegible]॥ आश्विनस्य सिताष्टम्यां महेश्वरादेवपार्वती […]
मुत्पन्ना पूर्वाषाढासमायुतेति॥ तथा॥ तत्राष्टम्यां भद्रकाली दक्षय […]
नी॥ प्रादुर्भूता महाघोरा योगिनीकोटिभिः सहेति॥ यत्तु मदनर […]
श्विने मासि शुक्ला कल्याणकारिणी॥ सप्तम्यापि युता कार्या मूलेन […]

तिथा निपरदिने ऽष्टम्यभावे विषयाणीति मदनरत्ने उक्तं॥ यत्तु
ष्टमी सत्वेपि पूर्वविद्धाविधायकं वचनं। यदाष्टमी तु संप्राप्य अस्तं या
तत्र दुर्गोत्सवं कुर्यान्न कुर्यात्परेऽहनीति। दुर्निर्हतं तत्रआनीया नवम्या
इति तत्परदिने दशम्यां नवम्यभावविषयं। यदा सूर्योदयेन स्या
हनि। तदाष्टमी प्रकुर्वीत सप्तम्या सहितां नृप। तिनत्रैव स्मृतिसंग्रहे
यया यत्र द्वयं याति नराधिप॥ पूर्वाष्टमी तदा कुर्यादन्यथा त्वष्टमेन
सर्वो के स्वेति मदनरत्ने। वस्तुतस्तु। इदं वचनद्वयं अष्टमीनवम्याः स
संबंधपरं॥ अन्यथा पूर्वोक्तविरोधादिति दिक्॥ यत्तु। अहं नवाचनद्वाहनो
तरं कचित्। सर्वसिद्धिप्रदा स्यामिन नवायामर्चिता ह्यहमिति देवीपुराणे तद्विष्टिव
मध्ये पूजाविधानार्थं॥ विष्टिं त्यक्त्वा महाष्टम्यां मम पूजां करोति यः॥ तस्य पूजा फ
नस्याद्येनापमपमानितो। इति तत्रैवोक्तेरिति निर्णयामृते॥ तथा कालिकापुराणे। स शिवः ७५
सम्यां पत्रिकापूजा अष्टम्यां चाप्युपोषणं। पूजा च जागरश्चैव नवम्यां विधिवद्ब
लिरिति। अष्टम्युपवासश्च पुत्रवता न कार्यः॥ उपवासं महाष्टम्यां पुत्रवान्न समा
चरेदिति। यथा तथा वा पूतात्मा व्रती देवीं प्रपूजयेदिति तत्रैवोक्तेः। रूपनारायणे

व्राषे॥ अतोर्थं पूजनीया सा तस्मिन्नहनि मानवैः॥ उपोषितैर्वस्त्रधूपमाल्यग
नानुलेपनैः॥ पशुभिर्मानकैर्दधै रात्रौ जागरणेन च॥ दुर्गाग्रे हन्त शत्रूणां ह
जितव्यानि पंडितैः॥ वाद्यगीतानि चिह्नानि कवचान्यायुधानि च॥ अत्र विशेषो
हेमाद्रौ निर्णयामृते च तद्विषये। कन्यागते सवितरि शुक्लपक्षेष्टमी तु या॥ मूलनक्ष
त्रसंयुक्ता सा महानवमी स्मृता॥ नवम्यां पूजिता देवी ददात्यभिमतं फलं॥ मातृ
या सा पवित्रा च सा धन्या सुखदायिनी॥ तस्यां सदा पूजनीया चामुंडा मुंडमालि
नी॥ सर्वेष्वेके निश्चयतापि॥ तस्यां ये वै पशुं घ्नंति प्राणिनो महिषादयः॥
ते स्वर्गतिं यांति घ्नतां पापं न विद्यते॥ यावन्तश्चासये जन्त्रं पशवस्ता
नतयावत्तिदाने धूपध्वजविलेपनैः॥ यथा संतुष्यते मेषमे
वासिनी॥ एवं च विंध्यवासिन्यां नवरात्रोपवासतः॥ एकनक्ते
रात्र्या याचितेन च॥ पूजनीया जने देवी स्थाने स्थाने पुरे पुरे॥ स्नातैः
प्रहृष्टैर्लोकैः क्षात्त्रियैर्नृपैः॥ वैश्यैः शूद्रैर्म्लेच्छैः केर्न्ये मानवैः
कुरुस्ताइलतद्विधानमिदं शृणु॥ जयाभिलाषी नृपतिः प्रतिपत्

त॥ ओं हान्तु मारिके कर्मकारयेद्यावदृष्टमीमिति॥ ओं हान्ति मारि[illegible]
श्रागुरुकृत्रवणे देशे पताकाभिरलंकृते॥ मंडपं कारयेद्दिव्यं नव[illegible]
षोडशहस्तप्रमाणमित्यर्थ॥ आग्नेय्यां कारयेत्कुंडं हस्तमात्रं सुशोभनं[illegible]
त्रयसंयुक्तं योन्याश्वत्थदलान्वया॥ राजचिह्नानि सर्वाणि शस्त्राण्य[illegible]
चाप्यानीय मंडपे तानि सर्वाणि अधिवासयेत्॥ ततस्तु ब्राह्मणः[illegible]
रधरस्तु चिः॥ उंकार शर्वके मैत्रिस्तद्विगेहं कुर्याल्लक्षणं॥ शस्त्रास्त्रमं[illegible]
यसंछुतसंयुतं॥ कृतशेषेषु रंगाणां राजानमुपरोपयेत॥ ओं हामि मारि[illegible]
तेनैतद्दर्षिभिः स्मृतं॥ धृतपत्रयनानन्धान्नगजाश्वसमलंकृतान॥ आमयेन्न[illegible]
रेनित्यं नदीघोषपुरःसरं॥ प्रत्यहं नृपतिः स्नात्वा संपूज्य पितृदेवताः॥ छत्रध्व
जराजचिह्नानि फलमाल्यविलेपनैः॥ तस्यान्निसरणाद्राज्ञो विजयः समुदाहृतः॥
पूजामंत्रान्प्रवक्ष्यामि पुराणोक्तान हंतव॥ ये महिताः प्रयच्छंति कीर्तिमायुर्य शिवः
शोबलं॥ ॥ अथ मंत्राः॥ विष्णुधर्मोत्तरोक्ताः॥ छत्रस्य॥ यथांबुदः छादयति शिवा ७६
येमां वसुंधरां॥ तथाच्छादय राजानं विजयारोग्यवृद्धये॥ ॥ चामरस्य॥ ॥ शशा

ंककरसंकाशक्षीरडिंडीरपांडुर॥ प्रोत्सारयाशु दुरितं चामरामरदुर्लभ॥ ॥ अथा
श्वस्य॥ ॥ गंधर्वकुलजातस्त्वं मा भूयाः कुलदूषकः॥ ब्राह्मणः सत्यवाक्येन सोम
स्य वरुणस्य च॥ प्रभावाच्च हुताशस्य वर्द्धय त्वं तुरंगमान्॥ तेजसा चैव सूर्यस्य
मुनीनां तपसा तथा॥ रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च॥ स्मर त्वं राजपुत्रस्य
कौस्तुभं च मणिं स्मर॥ यां गतिं ब्रह्महा गच्छेन्मातृहा पितृहा तथा॥ भूमिहानृतवा
दी च क्षत्रियश्च पराङ्मुखः॥ सूर्याचंद्रमसौ वायुर्यावत्पश्यंति दुष्कृतं॥ व्रजाश्च तां ग
तिं क्षिप्रं तच्च पापं भवेत्तव॥ निःक्षतो यदि वा छिन्नो युद्धाध्वनि तुरंगम॥ रिपून्विनि
त्य समरे सह भर्त्रा सुखी भव॥ ॥ अथ ध्वजस्य॥ शक्रकेतो महावीर्य श्याम वर्ण[illegible]
याम्यहं॥ पतत्रिराज नमस्तेस्तु तथा नारायणध्वज॥ काश्यपेयारुणभ्रातर्न[illegible]
विष्णुवाहन॥ अप्रमेय दुराधर्ष रणे देवारिसूदन॥ गरुत्मान्मारुतगतिः[illegible]
संनिहितो यतः॥ साश्वं स्यान्यायुधान्यत्र रक्ष त्वं च रिपून्दह॥ ॥ अथ[illegible]
कृतस्तु वसवो रुद्रा वायुः सोमो महर्षयः॥ नागकिंनरगंधर्वयक्ष[illegible]
ताः॥ अथ मस्तक सहादित्यैर्न्द तेशो मातृभिः सह॥ शक्रः सेनापतिः[illegible]
श्रितस्त्वयि॥ प्रदहंतु रिपून्सर्वान् राजा विजयमृच्छति॥ या[illegible]

रिभिरायुधानिसमंततः॥ पतंतपरिघ्ना त्रूणांहता नितवतेऽसा॥ हिरण्य...
देवासुरेतथा॥ कात्र्नेनभिवधेयद्वयरुद्रिपुरघातने॥ शोभिनामितपवा...
श्वसंस्मर॥ नीलान्श्वेतानिमानद्दष्टा नश्यंत्वाशुन्यपारयः॥ व्याधिनिर्जि...
स्त्रैश्र युधिनिर्जिताः॥ रत्नारेवतीनाम्नाकाधराविश्रयास्मता॥ दरु...
नपताकलंमयार्चिता॥ ॥अथगजस्य॥ ॥कुमुदैरावणौ पद्मःपुष्पदंतोथवा...
सुप्रतीकांजनोनीलएतेष्टौदेवयोनयः॥ तेषांपुत्राश्चपौत्राश्चवनान्यष्टौसमा...
मंद्रोभद्रोमृगश्चैवगजःसंकीर्णएवच॥ वनेवनेप्रसूतास्तेयूथानिसुमहांतिच॥ ...
तुत्वांवसवोरुद्राश्चादित्याःसमरुद्गणाः॥ भर्त्तारंरक्षुनागेंद्रस्वामिवत्प्रतिपाल्यतां॥ ...
वाक्रुहिजयंयुद्धेगमनेस्वस्तिनोव्रजेति॥ श्रीस्तेसोमाद्बलंविष्णोस्तेजःसूर्याज्जवोनि...
लात्॥ स्थैर्यंमेरोर्जयंरुद्राद्युशोदेवात्पुरंदरात्॥ युद्धेरक्षंतुनागास्त्वांदिशश्चसहदेवतैः॥ शि॰
अश्विनौसहगंधर्वैःपांतुत्वांसर्वतःसदेति॥ ॥अथखड्गमंत्रः॥ असिर्विशसनःख ७१
ड्गस्तीक्ष्णधारोदुरासदः॥ श्रीगर्भोविजयश्चैवधर्मधारस्तथैवच॥ एतानितवनामा...
निस्वयमुक्तानिवेधसा॥ नक्षत्रंकृत्तिकातेतुगुरुर्देवोमहेश्वरः॥ रोहिण्यश्चशरीरंते
दैवतंचजनार्दनः॥ पितापितामहोदेवस्त्वंमांपालयसर्वदा॥ नीलजीमूतसंकाशस्ती...

क्ष्णदंष्ट्रःकृशोदरः॥ भावशुद्धोमर्षणश्चअतितेजास्तथैवच॥ इयंयेनधृताक्षोणीहत
श्चमहिषासुरः॥ तीक्ष्णधारायशुद्धायतस्मैखड्गायतेनमः॥ ॥अथछुरिकायाः॥ ॥
सर्वायुधानांप्रथमंनिर्मितासिपिनाकिना॥ शूलायुधाद्विनिष्कृष्यकृत्वामुष्टिग्रहं
शुभं॥ चंडिकायाःप्रदत्तासिसर्वदुष्टनिबर्हिणी॥ तयाविस्तारिताचासिदेवानांप्रति
पादिता॥ सर्वसत्वांगभूतासिसर्वाशुभनिबर्हिणी॥ छुरिकेरक्षमांनित्यंशांतियच्छन
मोस्तुते॥ ॥अथकट्टारकपूजा॥ ॥रक्षांगानिगजान्रक्षरक्षवाजिधनानिच॥ मम
देहंसदारक्षकट्टारकनमोस्तुते॥ कट्टारकोमध्यदेशेकटारीइतिप्रसिद्धा॥ ॥धनुः
पूजा॥ ॥सर्वायुधमहामात्रसर्वदेवारिसूदन॥ चापमांसमरेरक्षसाकंशरवरै...
ह॥ शतंत्वक्ष्णेनरक्षार्थंसंहारायहरेणच॥ त्रयोमूर्त्तिगतंदेवधनुरस्त्रनमाम्यहं॥
कुंतपूजा॥ ॥प्रासपातयशत्रूकस्त्वमनयानाकमायया॥ ... वितेतेसी...
न्यंचरक्षतौ॥ ॥वर्मपूजा॥ ॥शर्मप्रदस्त्वंसमरेवर्मसैन्येयशोधन॥ रक्ष...
रंतापनेयनमोस्तुते॥ ॥कनकदंडमंत्रः॥ ॥प्रोत्सारणायदुष्टानांसा...
यच॥ ब्रह्मणानिर्मितश्चासिव्यवहारप्रसिद्धये॥ यशोदेहिसुखंदेहि...
पते॥ ताडयस्वरिपून्सर्वान्हेमदंडनमोस्तुते॥ ॥अथदुंदुभिमं...

संपन्ना नां घोर रोद्रस्य वर्द्धनः॥ नव नृमिपसैन्यानां तथा विजय च[illegible]
स्त घोषेण प्रनष्यंति च बर्हिणः॥ तथा रक्तवचा शब्देन रूपेस्माकं नु राय[illegible]
त शाद्देन स्त्रीणां त्रासो निजायते॥ तथा व्रतवचा शद्देन व्रस्यंत स्म द्विषा रणे[illegible]
रव मंत्रः॥ ॥ पुण्यस्त्वं शंख पुण्यानां मंगलानां च मंगलं॥ विष्णुना विधृ[illegible]
तः शांतिप्रदो भव॥ ॥ अथ सिंहासन मंत्रः॥ ।विजयो जयदो जेता रिपुघा[illegible]
रः॥ दुःखहा धर्मदः शांतः सर्वारिष्ट विनाशनः॥ एतेवे सन्निधो यस्मात्त्वमिं[illegible]
ना॥ तेन सिंहासने ति त्वं वदे मंत्रे स्वगीयसा त्वयि स्थितः शिवः शांतस्त्वयि[illegible]
रस्सुरः॥ नमस्ते सर्वतो भद्र भद्रदो भव नृपते॥ त्रैलोक्य जयसर्वस्व सिंहासन नमो[illegible]
स्तु ते॥ तस्यैव कर्म चिह्नानि खानि रज्या नि छिप्रिनिः॥ ओंहानि सारकं कर्म तेस्तु[illegible]
मंत्रपूर्वकं॥ अष्टम्यां नियमं कृत्वा पूर्वाह्ने स्नानमाचरेत्॥ कुंकुमचंदनचंपकच त्रि.व.
तुःसमैः शोभन पिष्टैश्च चर्चित गात्री देवीं कुसुमैरर्चयेद्द्रुकुंभिः॥ कुमुदैः सपद्म ७९
पुष्पैः सदीप धूपैः समैनैवेद्यैः॥ मांसैर्बल्य फपहारैर्मंगलशब्दैः समुद्रलिते॥ विहित[illegible]
चैर्योनैःस्यंदन शितशस्त्र धारि जनलोकैः॥ तुष्टैः पवस्त्रादिदु निवेधतेसर्वमेव[illegible]
गवत्यै॥ दुर्गा सा पूजनीया च तद्दिने द्रोणपुष्पकैः॥ ततः खङ्गं नमस्कृत्य शास्त्रेण वध्य

×सा वमान्या सुरेशान्या तस्यारूढव्रतोग्रतः॥ ॥

सिद्धये॥ स्कंदेत विजयं राज्यं सुनिह्रं चात्मने नृपः॥ पुनः पुनः प्रणम्यार्यां संस्मरन् हृद
ये शिवां॥ सर्वं कृत्वेति कोरव्य अष्टम्यां जागरं निशि॥ नटनर्त्तकगीतैश्च कारयेच्च महो[illegible]
वं॥ एवं हृष्टैर्निशां नीत्वा प्रभाते प्ररुणोदये॥ घातयेन् महिषान् मेषान् स्वहस्तेन तकंधरा
न्॥ शतमर्द्धशतं वापि तदर्द्धं वा यथेच्छया॥ सुरासवघटैः कुंभैस्तर्पयेत्परमेश्वरीं॥ कापा
लिकेभ्यस्तद्दद्यं दासीदासजनेन च॥ ततो पराह्नसमये नवम्यां वैरपोषिते॥ भवानी
श्रामयेद्रष्टुं स्वयंराजा सशावान्॥ कश्चिन्नापाषितो ॥ वीरो विख्यातो न्येन रवड्वाना
स्ते न्यस्य बलिं दद्यान् मंत्रेणानेन सामिषं॥ सरक्तं सजलं चान्नं गंधपुष्पाद्[illegible]॥ तत्र
तो श्रीस्त्री वारान् समस्तेन दिग्विदिक्षु किरेद्बलिं॥ मंत्रश्च॥ बलिं गृह्णंत्विमे देवा[illegible]
दित्या वसवस्तथा॥ मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः॥ असुरा या[illegible]
श्च पिशाचोरगा राक्षसाः॥ डाकिन्यो यक्षवेतालायोगिन्यः पूतनाः शि[illegible]
सिद्धगंधर्वा मालाविद्याधरा नगाः॥ दिक्पाला लोकपालाश्च ये च वि[illegible]
जगतां शांतिकर्त्तारो ब्रह्माद्याश्च महर्षयः॥ मा विघ्नं मा च मे पापं मा[illegible]
न॥ सौम्या भवंतु तृप्ताश्च भूतप्रेताः सुखावहा इति॥ ॥ इतिम[illegible]
आश्विनशुक्लनवमी महानवमी॥ महाशब्देन नवम्यां तु लोके[illegible]

तीति॥ हेमाद्रौ देवीपुराणात्॥ महानवमी तु सर्वैर्युता ग्राह्या॥ पू[illegible]
वमी दुर्गाव्रते श्रावणी॥ तिद्दीपिकोक्तेः॥ श्रावणी दुर्गनवमी दूर्वाख्ये व[illegible]
वीविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमिति हेमाद्रौ पाद्मोक्तेश्च॥ ना[illegible]
मयुक्ते शुक्लपक्षे तु अष्टमी मूलसंयुता॥ सा महानवमी नाम त्रैलोक्ये[illegible]
त्येति॥ मूलमुपलक्षणं॥ दुर्गापूजासु नवमी मूलाद्यृक्षत्रयान्विता॥ म[illegible]
तानस्यां दुर्गां म[illegible]हिषमर्दिनीमिति मदनरत्ने लैंगात्॥ अत्र पूजायां दिनत्रय[illegible]
यानि तु॥ साकार्योदयगामिन्यां तिथावुदयगामिन्यामित्यादिप्रागुक्तानि नानि न
वमी त्रिव्रतिथिपराणि॥ नवम्यां विशेषोक्तेः॥ वेधश्च मुहूर्तत्रयेणैव ज्ञेयः॥ यद्य
पि हेमाद्रिमते मुहूर्तद्वयात्मापि वेधोस्ति तथापि सूर्योदय एव सः सायं त्रिमु
हूर्त एव॥ तदुक्तं दीपिकायां॥ त्रिमुहूर्तगा तु सकला सा व्याप्ताये रति॥ माधवोपि॥
सायंतन्तरयात हन्यूनयाग्न न विध्यते॥ तेन त्रिमुहूर्तवेधे पूर्वा न नवमी॥ पूर्वोक्त
वचनात्॥ न कुर्यान्नवमीं तात दशम्यां तु कदाचनेति परानिषेधाच्च॥ त्रिमुहूर्त
योगाभावे तु निषिद्धापि परैव कार्येति निष्कर्षः॥ यत्तु॥ नवम्यां च बलिं होमं समाप्य
श्रवणे पिबेदिति संग्रहोक्तेः॥ अतं तच्च जागरस्थेव नवम्यां विधिवद्बलिरिति देवीपुराण शिवः ७९

स्कांदे ३

च्च॥ नवम्यां होमवस्या[illegible]दिविहितं॥ तत्राश्वयुक्शुक्लनवमी मुहूर्तं वा क
लायदि॥ सा तिथिः सकला ज्ञेया लक्ष्मीर्विद्या जयार्थिभिरिति सौरपुराणात्॥ सू
र्योदये परे स्तोकाः पूर्णा स्याद्दपरा यदि॥ बलिदानं प्रकर्तव्यं तत्र देशे शुभावहं॥
बलिदानेन चैतेषु अष्टम्यां कुत्र नेशो न वेत्येव पेति मदनरत्ने देवीपुराणाच्च॥ बल्यादौ
रुर्वेति ५ परा कार्या॥ उपवासादौ तु सा दनरत्ने उक्तेः॥ व्रतापमात्रे तु पूर्वैव॥ यत्तु अष्टम्यां
बलिदाने नेश्वरनाशो नवध्क्रवमिति कालिकापुराणं॥ तत्संधिपूजापरं॥
अष्टमी नवमी संधौ तृतीया खलु कथ्यत इति तत्रैव तदुक्तेः॥ कामरूपनि
धौ॥ अष्टम्याः शेषदंडश्च नवम्याः पूर्व एव च॥ तत्र या क्रियते पूजा नि[illegible]
या सा महाफला॥ अष्टमी मारे न वत्येवं॥ आश्विने शुक्लपक्षे तु[illegible]
त्र्यष्टमी शुचा॥ घातयंति पशूनस्मिन् तेन नव्यति महाबला॥ तथा क[illegible]
रवावीशस्त्रकोष्टम्यां प्रपूजयेत्॥ सोपवासो निशार्द्धे तु महाविभ[illegible]
तया॥ पशुघातश्च कर्तव्यो गवलाजवधस्तथेति रूपनारायणी[illegible]
त॥ तत्र वत्न विधा॥ तस्मादियं महापुण्या नवमी पापनाशिनी[illegible]

सुभयत्नेन सततं सर्वपार्थिवैः॥ दनिर्णयदीपे तु महानवमी [illegible]
राह्णव्यापित्वे पराश्चान्यथा पूर्वा॥ आवर्त्तनात् पूर्वकालेन नवमी [illegible]
नि॥ दुर्गार्चातंत्रे पूर्वेद्युः पूर्वाह्णे तु अष्टमी यदि तिथौ मध्ये यच नास्ति [illegible]
स्यात्तु शारदनवमी॥ विषयत्वं समूलत्वं च विमृश्यं॥ यानि च॥ नेदा [illegible]
सते वह्निः पूर्णायां पशुघातनं॥ नन्दायां ॥ कल्पे क्रीडा तन्त्रराज्ये व [illegible]
ति॥ नवम्याम् अपराह्णे तु बलिदानं प्रशस्यते॥ दशमी वर्जयेत् तेन नात्र का [illegible]
चारणेति॥ नंदायां दर्शने रक्षा बलिदानं दशासु च॥ नन्दायां ॥ कल्पे क्री [illegible]
देशनाशाय जायत इति प्रलवे वर्त्तनादि वचनानि शुद्धाधिकनिषेधप
राणीति मदनरत्ने॥ तथा कालिकापुराणे॥ नवम्यां बलिदानं तु कर्त्तव्यं वै य
था विधि॥ जपहोमं च विधिवत्कुर्यात्तत्र विभूतये॥ केचित्तु॥ पूर्वाषाढायु
ताष्टम्यां पूजाहोमाद्युपोषणमिति देवीपुराणात् दष्टम्यां होममाहुः॥ शिव:
अन्ये तु द्विविधवाक्यवशात् दष्टम्यामारभ्य नवम्यां समापयेति॥ मत्स्य ८०
सूक्ते॥ रुद्रयामले तु विकल्प उक्तः॥ तत्तु निर्मूलं॥ दुर्गाभक्तितरंगिण्यां

हिंगो उग्रेऽप्युपि नवम्यां होम उक्तः॥ होमे च विशेषो डामरतंत्रे उक्तः॥ पाय
सेन सर्पिषा युक्तैः तिलैः शुक्लैर्विमिश्रितं॥ होमयेद्विधिवद्भक्त्या दशांशेन जपोत्त
म॥ रुद्राध्याये तथा होमं मंत्रेण केन साधयेत्॥ तस्य यास्तोत्र जपहोमं मंत्रो के
न साधयेत्॥ यद्वा सप्तशती जप्य होमं मंत्रो नवाक्षरः॥ ऐं ह्रीं क्लीं चामुण्डायै वि
च्चे इति नवाक्षर इति केचित्॥ पूजा कार्या य इति तु य के॥ रुद्रयामलेऽपि॥ प्र
धानद्रव्यमुद्दिष्टं पायसान्नं तिलास्तथा॥ किंशुकैः सर्षपैः पुष्पैर्गोघृतान्वितैः दूर्वां
कुरैरपि॥ यवैर्वा श्रीफलैर्दिव्यैर्नानाविधफलैस्तथा॥ रक्तचंदनखंडैश्च
कुसुमैश्च मनोहरैः॥ प्रतिश्लोकं च कुर्यात्सर्वद्रव्याणि चक्रमात्॥ नवार्
णवा कुर्यात् नमो देव्या इति तिथेति॥ रहस्ये तु प्रतिश्लोकं च कुर्यात् [illegible]
जसर्पिषा तु क्रमो॥ दुर्गाभक्तितरंगिण्यां तु तिलैर्जयंतीमंत्रेण च हे [illegible]
पुरश्चरणकार्येषु बिल्वपत्रयुतैस्तिलैरिति कालिकापुराणाद् [illegible]
स्मार्त्तैः॥ तत्त्वान्यत्रमानाभावात्॥ ॥ अथ बलिदानं॥ ॥ त [illegible]
छागमहिषस्य मांसानामुत्तरोत्तरं प्राशस्त्यं फलविशेषश्च [illegible]
य इति दिक्॥ बलिप्रकारस्तु देवीपुराणे॥ कन्यासंस्थे रवौ श [illegible]

प्रसूयतु॥ द्रोणपुष्पैश्च बिल्वाद्यजातीपुन्नागचंपकैः॥ पंचा
गंधपुष्पसमन्विते॥ विधिवत्कालिकां कालीतिजप्त्वा खड्गेन घा
जियक्षेत्सुरिलोहदंष्ट्राय नम इति मंत्रः॥ तच्च रुधिरं मांसं
दिक्षु॥ आदिशक्तिं च खड्गी विदारी पापराक्षस्य॥ नैर्ऋत्यां प्र
शि कर्मेत्रिते॥ मंत्रस्तु वक्ष्यते॥ तथा॥ तस्याग्रतो न्ले पंचाया
पष्टकं॥ खड्गेन घातयित्वा तु स्याच्चकंधविशारदयोः॥ अश्वकोप्य
कूष्मांडशस्त्रिबलिदानं कार्यं॥ तदुक्तं कालिकापुराणे॥ कूष्मांडमिक्षुदंड
मेसामवमेवच॥ एते बलिसमाः प्रोक्तास्तृप्तौ छागसमाः स्मृताः॥ कृत्स्याम
छागानावेष्टे कूष्मांडं श्रीफलं वा मनोहरं॥ वस्त्रं संवेष्टितं कृत्वा छेदयेच्छुरिका
दिना॥ तथा॥ आमलेन समद्यादेयं कूष्मांडं बलिकर्मणि॥ श्रीफलं वा सुराधीश
छेदनैव तु कारयेत्॥ छेदविकल्पः॥ माषान्नेन बलिर्देयो ब्राह्मणेन विजानता॥
कालिकापुराणे॥ उत्तराभिमुखो भूत्वा बलिं पूर्वमुखं तथा॥ निरीक्ष्य साध
कः पश्चादिमं मंत्रमुदीरयेत्॥ पशुस्त्वं बलिरूपेण मम भाग्यादुपस्थितः॥ प्र शिव: ८१
णमामि ततः सर्वरूपिणं बलिरूपिणं॥ चंडिकाप्रीतिदानेन दातुरापद्विना

शनं॥ चामुंडाबलिरूपाय बले तुभ्यं नमोस्तु ते॥ यज्ञार्थे बलयः सृष्टाः स्वयमे
व स्वयंभुवा॥ अतस्त्वां घातयाम्यद्य तस्माद्यज्ञे वधोऽवधः॥ ऐं ह्रीं श्रीमिति मंत्रे
णातं बलिमस्वरूपिणं॥ चिंतयित्वान्यसेत्पुष्पं मूर्ध्नि तस्य तु भैरव॥ रसना तं
चंडिकायाः सुरलोकप्रसाधक॥ ह्रीं ह्रीं खड्ग इति मंत्रेण ध्यात्वा खड्गं च पूजयेत्॥
पूजयित्वा ततः खड्गं आं ह्रूं फडिति मंत्रकैः॥ गृहीत्वा विमलं खड्गं तु द्यद्बलिमुत्त
मं॥ ऐं ह्रीं श्रीं कौशिकीति रुधिरेणाप्यायतामिति॥ बलिदाने तु दुर्गायाः सर्वत्राय वि
धिः स्मृतः॥ मत्स्यसूक्तेन॥ नवम्यां पूर्ववत्स्नात्वा कर्तव्यान्यतिमिच्छता॥ वैदक्षिणां च
एवं च आचार्याय निवेदयेत्॥ ॥ अथ प्रसंगाच्छतचंडीविधानमुच्यते॥ ॥
मले॥ शतचंडीविधानं च प्रोच्यमानं शृणुष्व तत्॥ सर्वोपद्रवनाशार्थे शतचं
र नेत्रैस्तु॥ षोडशस्तंभसंयुक्तं मंडपं पल्लवोज्ज्वलं॥ वसुकोणयुतां वेदीं म
नागतः॥ पक्वेष्टकाचितां रम्यां सुघृष्टां हस्तसंमितां॥ पंचवर्णरजो
मंडलं कुर्यात्॥ पंचवर्णवितानं च किंकिणीजालमंडितं॥ आचा
चरकेह्यशस्त्रनान॥ ईशान्यां स्थापयेत्कुंभं पूर्वोक्तविधिना
कर्तव्यं कुंडलक्षणलक्षितं॥ मार्गे देव्याः प्रकुर्वीत सुवर्णस्य प्र

तद्दैन तद्दृष्टं नूमहामते॥ अष्टादशभुजां देवीं कुर्याद्दाष्टकपा[illegible]
भयुगमन्तां देवीं मध्ये निधापयेत्॥ देवी मंडल्य विधिवज्जपं [illegible]
शतमादौ शतं चांते ऊपेन्मंत्रं नवार्णकं॥ चंडी शप्तशती मध्ये सपु[illegible]
एकं द्वित्री णि च त्वारि ऊपे [redacted] द्विन चतुष्टयं॥ रूपालि क्रमशस्त द्[illegible]
माचरेत्॥ पंचमे दिवसे शतहोमं कुर्याद्विधानतः॥ गुडूची पायसं [illegible]
कान्न यवान्पि॥ चंडीपाठस्य होमं तु प्रतिश्लोके दशांशतः॥ होमं कुर्या[illegible]
समिदाज्य चरून क्रमात्॥ कृत्वा हरणा[illegible]ति दद्या द्विप्रेभ्यो दक्षिणां क्रमात्॥ कपि[illegible]
गां नीलमणिं श्वेताश्वं छत्र चामरे॥ अभिषेकं ततः कुर्यात् यजमानस्य कल्वि[illegible]॥ ए
वं कृते महेशान सर्वा सिद्धिः प्रजायते इति॥ ॥ अथ सहस्र चंडी॥ ॥ माच तंत्रे
वोक्ता॥ सहस्रचंडी विधिं वक्ष्ये शृणुष्व विश्राम महामते॥ राज्यभ्रंशे महोत्पाते ऽन मारेस्म
हात्भये॥ गजमारे ऽश्वमारे च परचक्र भये तथा॥ इत्यादि विविधोपद्रव भयरोगादि
केभये॥ सहस्रचंडिका पाठं कुर्याद्वा कारयेत्तथा॥ आपको क शतं प्रोक्ता विंशद्व
रस्तम्बमंडपः॥ तोऽन्यान्महर्षीं विप्रेंद्रान्गो शतं दक्षिणां दिशेत्॥ गुरवे द्विगुणं द
यं शय्या दानं तथैव च॥ समधान्यं च न्वर्हदानं चैतान्यं चमनोहरो॥ पंचानि क मि

प० चं० ९२

पद्य:२

तान्मर्त्तिः कर्त्तव्या वाद्यमानतः॥ अष्टादशभुजा देवी सर्वायुधविलक्षिता॥ अवारिता
न्नं दातव्यं सहस्रं प्रत्यहं विभो॥ शतंवा नियताहारः पाने न वर्त्तयेत्॥ एवं यश्चंडिका
पाठं सहस्रं तु समाचरेत्॥ तस्य स्यात्कार्यसिद्धिस्तु नात्र कार्या विचारणेति॥ एत
द्यं यद्यपि महानिबंधेषु नास्ति तथापि प्रचररूपत्वादुक्तमिति दिक्॥ वाराही तंत्रे॥
संकटे सम नुप्राप्ते दुर्भिक्षे सामये तथा॥ वैरिकृते व्याधिकृते धननाशे तथा क्ष
ये॥ कुर्याद्यत्नाच्छता वृत्तिं ततः संपद्यते सुखं॥ श्रेयोवृद्धिः शतावृत्ता द्राज्यावृद्धिस
याप्रा॥ मनसा चिंतितं देवि सिध्येदष्टोत्तराच्छतात्॥ सहस्रावर्त्तना छ्रीर्मी रा[illegible]
लोति स्वयं स्थिरा॥ भुक्त्वा मनोरथान्कामान्नरो मोक्षमवाप्नुयात्॥ चंद्राः श[illegible]
कि पाव स्सर्वाः सिंधवाति सिद्धयः॥ ॥ इति शत चंडी सहस्रचंडी विधिः॥
॥ अथ नवरात्र पारणानिर्णयः॥ ॥ सा च दशम्यां कार्या॥ आ[illegible]
क्षे तु कर्त्तव्यं नवरात्रकं॥ प्रतिपदादि क्रमेण वया वत्स नवमी [illegible]
वापि कर्त्तव्यं सप्तम्यादि यथा क्रममिति हेमाद्रौ धौम्यवचनात्॥ न[illegible]
यें तं कृत्वा स्तुजा जपादिकमिति प्रागुक्त वचनेन नवमी॥ पर्यंते [illegible]
फकेरूप वामा देव्यां गत्वे न तंतत्तत्र [illegible]त्वात्॥ आदिशब्देनो [illegible]

र्वैकत्रिरात्रव्रतेन नवम्या अप्युपोष्यत्वापत्तेः॥ न च पारणां तत्वेन नि[illegible]
त्रिरात्रादौ तथा प्रसक्तेः॥ न चात्रोपवासमानात्वावइति वाच्यं॥ एवं [illegible]
म्यां नवरात्रोपवासत्वः॥ एकनक्तेन नक्तेन तथैवायाचितेन च॥ ए[illegible]
नैर्देवीस्नानेन स्नानेषुरेषु र इति हेमाद्रौ तद्विधानात्॥ नवरात्रस मा[illegible]
म्या अप्युपोष्यत्वापत्तेः॥ न तु तिथिह्रासे षष्ठावश्यकपवासा नवंतीति कथं म[illegible]
नकर्मविशेषे नवरात्रशब्दो रूढः॥ अत एवोक्तं देवीपुराणे तिथिह्रासे तिथिवृ[illegible]
नवरात्रमपार्थकमितीति चेत्॥ न॥ तिथिह्रासेपि नवतिथीनामुपोष्यत्वान्नव
रात्रत्वाद्द्द्धतेः॥ एतेन रात्रीणां प्राधान्यात् ह्रासे अष्टमामादायन वत्वमिति मस्करी
क्तिः परास्ता॥ यत्तु देवीपुराणे॥ कन्यासंस्थे रवौ शक्र शुक्लामारभ्य नंदिकां॥ अ
याची त्वथ वैकाशी नक्ताशी अथवा यद् इति व्रतं चतुष्टयमुक्तं तद्धो हानि सा
रिक विषयं॥ तस्य जयाभिलाषी नृपतिः प्रतिपत्प्रभृति क्रमात्॥ जो हानिसा रि
कं कर्म कारयेद्यावदष्टमीमिति तु नविष्य अष्टमीपर्यंतमेवोक्तेः॥ रूपनारायणोन
तु नंदादिप्रयोगे श्रयोगे वोक्तो नस्य नवम्यां पारणमुक्तं॥ यत्तु पिनिर्णयामृते दी
पो॥ मामिनेष्टके पक्षे तु नवरात्रमुपोषितः॥ नवम्यां पारणं कुर्याद् दशमीमि

शिव:
८३

श्रिता न चेत्॥ दशमीमिश्रिता यत्र पारणे नवमी न वेत्॥ दुःखदारिद्र्यदा ज्ञेया तथा ग्रहवि
नाशिनीति वामननाम्ना लिखितं वचनं॥ यच्च रुद्रयामले इति वदंति॥ अष्टम्यां सह का
र्यां स्यान्नवमी पारणादिने॥ योमोहाद्दशमीवेधेन नवम्यां चंडिकां यजेत्॥ पारणं च प्र
कुर्यात्तस्य पुण्यं निरर्थकं॥ नवम्यां पारिता देवी कुलवृद्धिप्रदा इति॥ दशम्यां पारिता
देवी कुलनाशं करोति वै॥ तस्मात्तु पारणं कुर्यान्नवम्यां विबुधाधिप॥ इत्यादीनि तानि यदि
समूलानि तदा जो हानिसारिक नंदादिव्रतचतुष्टयविषयाणि॥ तस्याष्टमीपर्यंतमेवो
क्तेरित्यलं प्राक्॥ अन्यथा महाष्टम्यां परविद्धायां पारणविधाने एवं निबंधविरोधा
त्स्यात्॥ यानि तु केचित्लिखितानि नवम्यां पारणाविधायकानि वचनानि तानि निर्मू
लादिविरुद्धत्वान्निर्मूलानि॥ समूलत्वेपि यदा दिनद्वयेन नवमी तदा द्वितीयदिने [illegible]
ष्यंते पारणा न किंतु नवमीमध्ये कार्येत्येवं नेयानि॥ शिवरात्रिपारणा [illegible]
चित्पारणेहस्तक्रादि माधवे॥ नद्यतिक्रम्य पारणं कुर्यादित्याहुः॥ तन्मते [illegible]
क्रांते त्वंतरा नक्तस्तके॥ तत्र काम्यव्रतं कुर्याद् [illegible] नार्चनं विवर्जितमिति मा[illegible]
केः॥ व्रतयज्ञविवाहेषु श्राद्धे होमेर्चने जपे॥ आरब्धे सूतकं न स्याद् नारब्धे [illegible]
लुवचनादाशौचमध्येपि तत्कर्तव्यतावगतेः॥ पारणं तत्त्वा इतस्य॥ मा[illegible]

प्रारंभो वरणं यद्वा संकल्पो व्रतसत्रयोः॥ नांदीमुखं विवाहादौ श्राद्धे पाकप
यामन्येपि सूतके पारणं कुर्यान्नवम्यां होमपूर्वकं। तदंते भोजयेद्विप्रान्
क्तिरिति। तदंते सूतकांतो। एवं स्त्रीभिरपि रजोदर्शनमध्ये कर्तव्यमेव पारणा
ज्ञस्यि नत्याज्यं द्वादशीव्रतमिति माधवीये ऋष्यशृंगवचनात्। द्वादशी व्रत
णां प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत्॥ न तत्रापि व्रतस्यस्या उपरोधः क
त्रैव सत्यव्रतवचनात्॥ किंच एकादश्यादौ पंचषाशौचपाते मासांते पारणापि
पवासांते पंचषाशौचपाते जीवनासंभव इत्याद्युक्तम्॥ यत्तु। नियमस्था यदा नारी प्रपश्येद्रजस
उपोष्यैव तु तारात्रीः स्नात्वा शेषं चरेद्व्रतमिति ऋष्यशृंगवचनं। यच्च हारीतवचनं। नियमस्था
व्रतस्था स्त्री रजः पश्येत्कथंचन। निवृत्तं तु हि पेटस्थं व्रतशेषं समापयेदिति। तादृधवोपवा
सविषयं। तासां तत्र भोजननिषेधादिति केचित्। वयं तु प्रागुक्तसत्यव्रतवचने दीर्घत
पसामिति विशेषणोपादानाद्द्वादशीव्यतिरिक्तसकलैकादश्युपवासविषयोयं निषेधः॥ त्रिवः ८४
त्रिरात्रनवरात्रादिदीर्घव्रतेषु तु रजोदर्शनमध्ये एव पारणेति क्रमः॥ आशौचमध्ये तु
सर्वापि पारणा भवति प्रागुक्तकौर्मवचनादिति सिद्धांतः॥ अयं चोपवासपार
णानिर्णयः सर्वव्रतेषु बोद्धव्य इत्यलं भूयसा॥ ॥दशम्यां देवीं विसर्जयेत्॥ तदु

क्तं दुर्गाभक्तितरंगिण्यां देवीपुराणे॥ ततः प्रातः समुत्थाय दशम्यां विधिपूर्वकं॥ संप्रे
षणं तु कर्तव्यं गीतवादित्रनिःस्वनैः॥ रूपं देहि यशो देहि भगं भगवति देहि मे॥ पुत्रान्
देहि धनं देहि सर्वान्कामांश्च देहि मे॥ महिषघ्नि महामाये चामुंडे मुंडमालिनि॥ आ
सं युरारोग्यमैश्वर्यं देहि देवि नमोस्तु ते॥ इति प्रार्थ्य देवीं तु ततः उत्थापयेद्बुधः॥ उत्ति
ष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य च॥ कुरुष्व मम कल्याणमष्टाभिः शक्तिभिः सह॥
गच्छ गच्छ परं स्थानं स्वस्थानं देवि चंडिके॥ व्रज स्रोतो जलं वृद्ध्यै स्थीयतां च जले
त्विहेति उत्थाप्य जलं नीत्वा॥ दुर्गे देवि जगन्मातः स्वस्थानं गच्छ पूजिते॥ संवत्सर
व्यतीते तु पुनरागमनाय वै॥ इमां पूजां मया देवि यथाशक्त्योपपादितां॥ र
त्वं समादाय व्रज स्वस्थानमुत्तममिति जले प्रवाहयेत्॥ ॥इयमेव वि
दशमी॥ ॥सा च द्वितीयदिने श्रवणयोगाभावे पूर्वविद्धा॥ तदुक्तं
दे। दशम्यां तु नरैः सम्यक्पूजनीयापराजिता॥ ऐशानीं दिशमाश्रि
प्रयत्नतः॥ या पूर्णा नवमीयुक्ता तस्यां पूज्यापराजिता॥ क्षेमार्थं
एवं किं विधिना नरैः॥ नवमीशेषयुक्तायां दशम्यामपराजिता॥
यं देवी पूजिता जयवर्द्धिनी॥ तथा॥ आश्विने शुक्लपक्षे तु दशम्यां

एकादश्यां न कुर्वीत पूजनं चापराजितमिति॥ यदा तु पूर्वदिने [illegible]
व्यः परदिने चाव्याप्तिस्तदा गिनी तदा परैव॥ तथा च हेमाद्रौ व्रतख[illegible]
ण्डे दशमी किंचित्संपूर्णैकादशी यदि॥ श्रवणर्क्षं यदा काले सा तिथि[illegible]
या॥ श्रवणर्क्षं तु पूर्णायां काकुत्स्थः प्रस्थितो यतः॥ उल्लंघयेयुः सी[illegible]
र्क्षं ततो नराः॥ काले पराह्णे॥ परदिने पराह्णे श्रवणाभावेऽपि सर्वपक्षे [illegible]
मदनरत्नेऽप्येवं॥ ज्योतिर्निबंधे रत्नकोशे च नारदः॥ ईषत्संध्यामतिक्रांतः [illegible]
दुदितारकः॥ विजयो नाम योगोऽयं सर्वकार्यार्थसिद्धिदः॥ इषस्य दशमी शु[illegible]
र्वविघ्नं कारयेत्॥ श्रवणेनापि संयुक्ता राज्ञां पट्टाभिषेचने॥ सूर्योदयग
राजन्यद्यस्तद्दशमी तिथिः॥ आश्विने शुक्लपक्षे तु विजयाख्या विदुर्बुधाः॥ अत्रा
यं निर्गलितार्थः॥ अपराह्णस्तु मुख्यः कर्मकालः॥ तत्रैव [illegible]॥ प्रदोषो गौ
णः॥ तत्र दिनद्वये अपराह्णव्याप्तित्वे पूर्वा॥ प्रदोषव्याप्तेराधिक्यात्॥ दिनद्व
ये प्रदोषव्याप्तित्वे परा॥ अपराह्णव्याप्तेराधिक्यात्॥ श्रवणस्तु रोहिणीवत्प्र शिवः
योजकः॥ दिनद्वये पराह्णास्पर्शे तु पूर्वा॥ तत्रापि परदिने पराह्णे श्रवणस ८५
त्त्वे परैवेति दिक्॥ अत्र विशेषो नागवार्चनदीपिकायां—त्रिविधः॥ शमीपूजन

गत्वार्थं नक्षत्राणामन्यं करे॥ अर्चयित्वा शमीवृक्षं समर्चयेत्ततः पुनः॥ शमी
मंत्रस्त्वेहे मात्रेगोपथ्य आलेलो॥ अमंगलानां शमनीं शमनीं दुष्कृतस्य च॥ दु
दुःस्वप्ननाशनीं धन्यां प्रपद्येऽहं शमीं शुभाम्॥ तथा चान्यविधौ॥ शमी शमयते
पापं शमी लोहितकंटका॥ धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी॥ करि
ष्यमाणयात्रायां यथाकालं सुखं मया॥ तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजि
तेति॥ तथा॥ गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदं॥ गीतवादित्रनिर्घो
षेणानयेत्स्वगृहं प्रति॥ ततो भूषणवस्त्रादि धारयेत्स्वजनैः सहेति॥ अत्र [illegible]
लिनी राजनेन शुक्लं स्वस्त्ययनं॥ तत्र मंत्रः॥ स्वचरंगं बलं मम निरारिष्टं [illegible]
हा॥ सर्वत्र विजयो मेऽस्तु त्वत्प्रसादात्सुरेश्वरी॥ ति[illegible]नि बंधे ज्योति[illegible]
नीराजनं राज्ञां बलस्य च यथाक्रमं॥ शोभनं शेषस्वजनं पश्येत्खंजनं [illegible]
धो॥ अस्य फलानि तु नात्र तु न देशान्तरे वक्ष्याः॥ ॥ अथ [illegible]
मासी॥ ॥ सा पराग्राह्या॥ सावित्रीव्रतमंतरेण नवतो माघ[illegible]
तिदीपिकेन्द्रिः॥ अत्र विशेषः शिखिपितत्वे लैंगे॥ आश्विने पौर्णमास्यां [illegible]
रणं निशा॥ कोजागरी सा समाख्याता कार्या लोकैर्विभूतये॥ को[illegible]

स्मीमिंद्रमैरावतस्थितां॥सुगंधिनिंशिसघर्णश्रदेर्णागरणंचरेत[illegible]
घेवरदालक्ष्मीः कोजागर्तीतिनाविणी॥तस्मैवित्तंप्रयच्छामि[illegible]
रोतिपूः॥अत्रैवोद्ययुजीकर्मोक्तमाश्वलायनेन॥आश्वयुज्यामा[illegible]
ति॥तच्चेषपर्वणिकार्यविनातित्वात्॥आग्रयणंतुपर्वलिकार्य॥[illegible]
णंनामपर्वीतिस्यात्तदुच्यतइतिशौनकोक्तेः॥तत्रापिशेषपर्वणिकार्य[illegible]
युक्तं॥तच्चदर्शपौर्णमासयोरेककर्मत्वेनैकदव्यनियमात्॥दर्शेष्ट्याः[illegible]
सेष्ट्याश्चशाग्नवती।तिहेमाद्र्यादयः॥दर्शेष्ट्याःपरमुक्तमाग्रयणकं[illegible]
मासाच्चतदितिदीपिकोक्तेश्च॥तत्राग्रयणंत्रेधाश्रीह्याग्रयणंयवाग्रयणंश्या
माकाग्रयणंचेति॥एषांकालःश्रुतौ॥स्रहमेधीव्रीहियवाभ्यांशरद्वसंतयोर्य
जेतश्यामाकैर्नीवारैर्वर्षासुआपत्कालेनान्यैरन्नसुराणेवेति॥आपस्तंबोपि॥व
र्षासुश्यामाकैर्यजेतशरदिव्रीहिभिर्वसंतेयवैर्यथर्तुवेणुयवैरिति॥तत्रा
पिश्यामाकाग्रयणमनित्यमितरेतुत्रनाहिताग्नेर्नित्यैःकौमुदीवाग्रयणंच शिवः
कार्यमितिश्रुतेस्मृतेशुक्तत्वात्॥सूत्रेव्रीहियवदेवतासंबंधानामेवमंत्राणामाम्ना ९६
नात्॥अनाहिताग्नेस्तुयवाग्रयणस्यापिनियत्वं॥अपिवाक्रियायवेष्टिम

स्यात्।यद्वा।व्रीह्याग्रयणेनसमानतंत्रता।श्यामाकेस्तप्रसरंकुर्यान्नाग्रयणं।य
दिवातदपितमतंत्रमित्यादिनारायणवृत्तौपरिशिष्टमवतांसुधन्तमित्यलं।इदंच
पर्वणिनावदेवनहचेन्नतिकादिविशाखां।तेकार्यमितिस्मृत्यर्थसारेउक्तं।बौधायनी
यकेशवस्वामिनैवमुक्तं।परिशिष्टे।श्यामाकेव्रीहिभिश्चवयवैश्चान्योन्यकालतः।
प्राप्तंष्टुयुज्यतेवश्यंनत्वाग्रयणात्ययः।त्रिकांडमंडनोप्येवं॥यदात्वेतदाश्विनपौ
र्णमास्यांक्रियतेतदैककालत्वादाश्वयुजीकर्मणास्यचसमानतंत्रताभवति।तदेतत
स्थिसतापककबर्हिरिध्माज्यैतिस्रत्रैसृष्टमुक्तं॥असाकरणेशायश्च्रिन्नमुक्तं[illegible]
चंद्रिकायोकात्यायनेन॥नित्ययज्ञात्यये चैववैश्वदेवद्वयस्यच।अनिष्ट्वानवय[illegible]
नवान्नमाशनेतथा।नोअन्नेपतितान्नस्यचरुर्वैश्वानरोभवेत्।कौ[illegible]
लताग्रयणाभावे।नवान्नंयदिवैनरः।वैश्वानरायकल्प्यश्चरुः[illegible]
वेति॥अग्निविधानेतुस्मिंदरायामेवंचवर्षेवर्षेअपक्कत्तौआग्रयण[illegible]
संपूर्णमेतितदिति॥बौधायनसूत्रे।नवान्नेब्राह्मणेदत्वाप्राशनम[illegible]
फलानानामन्येषांचनवानांब्राह्मणेभ्योदत्वाप्रयोगइति॥एतच्चयदि[illegible]
मन्यथानेतिप्रागुक्तं॥अन्याप्याहिताभ्यादर्विशेषःशौनकादेरय[illegible]

इतिश्रीकमलाकरभट्टकृतेनिर्णयसिंधौआश्विनमासः॥ ॥अथ
तुलासंक्रमे प्रागपरादशघटिकाः पुण्याः॥रात्रौप्रागुक्तं॥अथका
इष्वीचंद्रोदयेविष्णुस्मृतिपाद्मयोः॥तुलामकरमेषेषुप्रातःस्ना
विष्यं ब्रह्मचर्यंचमहापातकनाशनमितिसोरमासउक्तः॥प्रा
यंते। दाक्षिणात्यास्तु॥आश्विनस्यतुमासस्ययाशुक्लैकादशीनव
व्रतानीदंतस्यांवप्रारभेत्सुधीरितिपाद्मोक्तेःमोगवाच्चेनेन॥प्रार
९८ कोमाश्विनस्यतुमानवः॥प्रातःस्नानप्रकुर्वतयावत्कार्तिकमास्करइति
रहस्योक्तेर्दमाद्ये चादिपुराणे।प्रश्नेश्वयुजेमासिपौर्णमास्यांसमाहितः
कौ।मासंसमग्रंपरयाचनत्यासमाप्यतेकार्तिकपौर्णमास्यामित्यंतानि
धाना।आश्विनशुक्लैकादश्यांपौर्णमास्यांवारभ्यकार्तिकशुक्लद्वादश्यांपौर्णमास्या
वासमापयेदितिक्रमः॥मदनपारिजातेविष्णुः।कार्तिकंसकलंमासंनित्यस्नायीजितेंद्रि
यः॥जपन्हविष्यभुक्शांतःसर्वपापैःप्रमुच्यते।अत्रदेशविशेषःपाद्मेकार्तिके शाव॰
पत्रमध्याऽरुहे त्रेदोदशगुणोगंगायामपितत्समः॥ततोधिकःपुष्करस्याद्वारव ८७
त्यांचभार्गवपुण्याःपुर्यश्चसप्तैवमुनयामथुराधिका।दुर्लभःकार्तिकोविप्रा

मथुरायांनराणामिहा।यत्रार्चितःस्वकंरूपंनरेभ्यःसंप्रयच्छतीति।इदंचस्नानं
कार्तीस्थपंचनदेप्यतिप्रशस्तं॥शतंसमास्तपस्तप्यादतेयत्प्राप्यतेफलं॥त
त्कार्तिकेपंचनदेसकृत्स्नानेनलभ्यते॥कार्तिकेविंडतीर्थेयोब्रह्मचर्यपराय
णः॥स्नास्यत्यनुदितेतानो नाकुआत्रस्यनीःकृतइत्यादिकाशीखंडोक्तेः॥ना
कुओयमः॥इदंचप्रातःस्नानंसंध्यांचकृत्वाकार्यं।तेनविनेतरकर्मानधिका
रादितिवर्धमानः॥यद्यपिप्रातःसंध्यायाःसूर्योदयेसमाप्तिस्तथापिवच
वनाद्दृष्टदितहोमवद्भविष्यति॥स्नानमंत्रस्तत्रैव॥कार्तिकेहंकरि
प्रातःस्नानंजनार्दन॥प्रीत्यर्थंतवदेवेशदामोदरमयासह॥इमंमंत्रं
यमोनीस्नायाद्तीनरइति॥अर्घ्यमंत्रोपितत्रैव॥व्रतिनःकार्तिके
तस्यविधिवन्ममा॥गृहाणार्घ्यंमयादत्तंदनुजेंद्रनिषूदन॥नित्य
सलकार्तिकेपापनाशने॥गृहाणार्घ्यंमयादत्तंराधयासहित
त्रोसमुच्चार्ययोर्घ्यंमहंप्रयच्छति॥सुवर्णरजतंपुष्पांतुशर
न॥सुवर्णशराप्रचिवीतेनदत्तानसंशयइति॥एवंसम

अहं स्नायात्॥ वाराणस्यां पंचनदे त्र्यहं स्नातास्तु कार्त्तिके॥ अमीत
पुण्यमाजोति निर्मला इति काशीखंडोक्तेः॥ अथ मालाधारणं॥ त
कामाहात्म्ये॥ निवेद्य केशवे मालां तुलसीकाष्ठसंभवां॥ वहते या नर
नैवास्ति पातकं॥ न जात्या तुलसीमालां धात्रीमालां विशेषतः॥ म
हर्त्री धर्मकामार्थदायिनी॥ विष्णुधर्मे॥ स्पृशेत् तु या निलोमानि धात्री मा
न्दणां॥ तावद्वर्षसहस्राणि वैकुंठे वसतिर्भवेत्॥ मालायुग्मं तु यो नित्यं
लसीसंभवं॥ वहते कंठदेशे तु कल्पकोटिदिवं वसेत्॥ तुलसीकाष्ठसं
लेच्छजनप्रिये॥ बिभर्मि त्वामहं कंठे कुरु मां कृष्णवल्लभं॥ एवं संप्रा
घिवन्मालां कृष्णगलेर्पितां॥ धारयेद्यः कार्त्तिके यो वै स गच्छेद्वैष्णवं पदमिति॥
अत्र मूलं चिंत्यं॥ तथा काशीखंडे॥ कार्त्तिके मासि मथात्रायें जलतान्नक्रितम
रे॥ बिंदुतीर्थे तत स्नाने स्तेषां मुक्तिर्न दूरतः॥ नागेवा चैन दीपिकायां च सिं
पुराणे॥ आगस्ति कुसुमैर्देवं योर्चयेज्जनार्दनं॥ दर्शनात्तस्य देवर्षेर्नरकं | शिवः
नाश्नुते नरः॥ विहाय सर्वपुष्पाणि मुनिपुष्पेण केशवं॥ कार्त्तिके योर्चयेद्भक्त्या | ८९

वाजपेयफलं लभेत्॥ स्कांदे कार्त्तिकमहात्म्ये॥ मालतीमालया विष्णुः केतक्या चै
व रक्षितः॥ समाः सहस्रं सुप्रीतो भवते मधुसूदनः॥ पद्मे चैत्रे द्वये पाद्मे॥ का
र्त्तिके नार्चितो यैस्तु कमलैः कमलेक्षणः॥ जन्मकोटिषु विप्रेंद्र न तेषां कमला
गृहे॥ तथा कार्त्तिके केशवे यज्ञा येषां नाम्राच्युते अर्चिता॥ ते निर्जराः सुरवेश्म तत्र वसंति
त्रिदिवमहा॥ तुलसीदललक्षेण कार्त्तिके योर्चयेद्धरिं॥ पत्रे पत्रे मुनिश्रेष्ठ मौ
क्तिकं लभते फलं॥ तथा स्कांदे कार्त्तिकमाहात्म्ये॥ धात्रीछायां तु यः कुर्यात् पिं
डदानं महामुने॥ मुक्तिं प्रयांति पितरः प्रसादान्माधवस्य तु॥ धात्रीफल
लिप्तांगो धात्रीफलविभूषितः॥ धात्रीफलकृताहारो नरो नारायणो भवेत्॥
छायां समाश्रित्य यो वै चैव धारिणं॥ पुष्पे पुष्पे अश्वमेधस्य फलं प्राप्नो
वः॥ तथा स्कांदे॥ कार्त्तिके मासि विप्रेंद्र धात्री वृक्षोपशोभिते॥ वने
भु चित्रान्ते स्नात्वा यश्चयेद्धि तु॥ अन्नेन पायसेनाथ होमं कुर्याद्धि चक्रपाणि
रजो ज्येष्ठो स्वयं तु जीत वंधु निरिति॥ तथा॥ कार्त्तिके द्विदल
कार्त्तिके द्विदलं त्यजोदिति॥ पाद्मेपि कार्त्तिक माहात्म्ये॥ राजिका मा
वाद्या कार्त्तिकव्रती॥ द्विदले तिलतैलं च तथान्यन्मतिदूषितं॥

के वर्जयेत्तद्वद्द्विदलं बहुबीजकं॥ माषमुद्गमसूरांश्च चणकां[illegible]
निष्पावान् राजमाषांश्च आढक्यां द्विदलं स्मृतं॥ नूतनान्यपि [illegible]
निवर्जयेत्॥ अत्र केचित्॥ उर्वरास्तु समये दलद्वयं यस्य न भवति [illegible]
द्विदलमुच्यते इत्याहुः॥ उदाहरंति च॥ बीजमेव समुत्पन्नं द्विदलं [illegible]
दृश्यते यत्र सस्येषु द्विदलं तन्निगद्यत इति॥ अन्ये त्वा[illegible]
वचनस्य च निर्मूलत्वाद्द्विदलात्मकं यस्य स्वरूपं तदेव वर्ज्यमिति [illegible]
था नारदीये॥ कार्तिके वर्जयेत्तैलं कार्तिके वर्जयेन्मधु॥ कार्तिके वर्जयेत्[illegible]
कार्तिके शुक्लसंधितं॥ कांस्यं तत्पात्रभोजनं॥ शुक्तं पर्युषितं संधितं अवण[illegible]
कः॥ तथा॥ कार्तिके तु सेवीयः प्राजापत्यपरोथवा॥ एकांतरोपवासी वा त्रि[illegible]
त्रोपोषितोपि वा॥ षड्वा द्वादशपक्षं वा मासेवाव्रतवर्णिनि॥ एकभक्तेन नक्ते-
न तथैवायाचितेन वा॥ उपवासेन भैक्षेण व्रजते परमं पदं॥ अन्येपि नियमाः
माणुक्ताः॥ आयुक्तं स्कांदे॥ व्रीहयो यवगोधूमाः प्रियंगुतिलशालयः॥ एवं ते [illegible]
कृष्ण्यांचंद्रोदये हविष्यास्त्विकाः प्रोक्ताः स्वर्गमोक्षफलप्रदाः॥ काशीखंडे॥ ऊर्जे यत्वात्समश्नीया ९८
द्वान्नमयवाष्टुना॥ ष्ठेतां कदलीरणं चैव स्तूकशिंबीश्च वर्जयेत्॥ कृष्ण्यां च
९ कार्तिके विष्णुमुक्तस्याग्रे दीपदानाद्दिवं व्रजेत्॥ तथा॥ कार्तिके तु सतादीपो दानं नृणां जन्मविमोचनी॥ ९

स्त्रीद्रये पापे॥ नोद्धे विध्यो विधातव्यो कृति[illegible]केनचित्कदाचित्॥ तथा नारदीये॥
अव्रतेन नरः पद्यस्कमासे हामोदरप्रियं॥ तिर्यग्योनिमवाप्नोति नात्र कार्या
विचारणा॥ अन्यान्यपि ताम्बूलतैलकेशकर्तनादिवर्जनसंकल्परूपाणि प्रा-
गुक्तानि॥ तथा कार्तिके आकाशदीप उक्तो निर्णयामृते पुष्करपुराणे॥ तुला-
यां तिलतैलेन सायंकाले समागते॥ आकाशदीपं यो दद्यान्मासमेकं हरिं प्र-
ति॥ महतीं श्रियमाप्नोति रूपसौभाग्यसंपदमिति॥ तद्विधिस्तु हेमाद्रौ भ-
विष्यपुराणे॥ दिवाकरेस्तावचमोस्त्व नेगृहाद्दूरे पुरुषप्रमाणं॥ य[illegible]
सति यज्ञियवृक्षदारुमारोप्य तस्माद्बध्यतस्य मूर्द्धि॥ लक्ष्या चतस्रो[illegible]
दलाष्टतिस्त्रयानिरन्ध्र दृष्टादशांगुसारी॥ तत्कर्णिकायां तु महा[illegible]
दीपः प्रदेयो दलगास्तयाष्टौ॥ निवेद्य धर्माय हराय भूम्यै दामो[illegible]
य धर्मराज्ञे॥ प्रजापतिस्त्वथ सत्पितृभ्यः प्रेतेभ्य एवाय[illegible]
न्य इति॥ अपराह्णे तन्मंत्र उक्तः॥ यथा॥ दामोदराय नभसि[illegible]
लोलया सह॥ प्रदीपं ते प्रयच्छामि नमोनंताय वेधसे इति॥

न्यः ३

लच्चतुर्थी करकचतुर्थी॥ सा चंद्रोदयव्यापिनी ग्राह्या॥ तत्रैव [illegible]
त॥ कार्त्तिककृष्णद्वादशी गोवत्ससंज्ञा॥ सा प्रदोषव्यापिनी ग्राह्या॥ [illegible]
रवी॥ युग्मवाक्यात्॥ वत्सहृज्जावटश्वेतकर्त्तव्या प्रथमे दिने॥ तिथि[illegible]
भावात्॥ अत्र विशेषो मदनरत्ने भविष्ये॥ सवत्सां तुल्यवर्णां च या [illegible]
पयस्विनीं॥ चंदनादिभिरालिप्य पुष्पमालाभिरर्चयेत्॥ अर्घ्यं ताम्र[illegible]
लत्वाक्षतैः सतिलैः॥ पादमूले तु दद्यात्तु मंत्रेणानेन पांडव॥ क्षीरो[illegible]
मंथने सुरासुरनमस्कृते॥ सर्वदेवमये मातर्गृहाणार्घ्यं नमोनमः॥ ततो मा[illegible]
षादिसंसिद्धान्वटकान्विनिवेदयेत्॥ सुरभि त्वं जगन्मातर्देवी विष्णुपदे
स्थिता॥ सर्वदेवमये ग्रासं मया दत्तमिमं ग्रस॥ ततः सर्वदेवमये देवि सर्व
देवैरलंकृते॥ मातर्ममाभिलषितं सफलं कुरु नंदिनी इति प्रार्थयेत्॥ तथा
तद्दिने तैलपक्वं च स्थालीपक्वं युधिष्ठिर॥ गोक्षीरं गोघृतं चैव दधि तक्रं च वर्ज
येत्॥ ज्योतिर्निबंधे नारदः॥ आश्विने कृष्णपक्षे तु द्वादश्यादिषु पंचसु॥ ति
थिषूक्तः पूर्वरात्रे नृणां नीराजनाविधिः॥ नीराजयेयुर्देवांस्तु विप्रान्गाश्च तुर

शिवः
९०

गमान्॥ ज्येष्ठांश्च श्रेष्ठाननुजघन्यांश्च मातृमुख्याश्च योषित इति॥ निर्णयामृते
स्कांदे॥ कार्त्तिकस्यासिते पक्षे त्रयोदश्यां निशामुखे॥ यमदीपं बहिर्दद्यादपमृ
त्युर्विनश्यति॥ मंत्रस्तु॥ मृत्युना पाशदंडाभ्यां कालेन श्यामया सह॥ त्रयोदश्यां दी
पदानात्सूर्यजः प्रीयतां मम इति॥ कार्त्तिककृष्णचतुर्दश्यां स्नाते चंद्रोदये स्नानं कुर्यात्॥
तदुक्तं हेमाद्रौ निर्णयामृते च भविष्योत्तरे॥ कार्त्तिके कृष्णपक्षे तु चतुर्दश्यामिनोदये॥ अव
श्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः॥ इनश्चंद्रः॥ मदनरत्ने विधूदय इति पाठः॥ दिनो
दयपाठस्तु सूर्योदयोत्तरं त्रिमुहूर्तैः स्नानं वदतां गौडानां तदनुसारिणां चाहते वा॥ [illegible]
र्ष विधिः चतुर्दश्यां कार्त्तिकस्यासिते तरे॥ पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः [illegible]
स्पृतिदर्पणेपि॥ चतुर्दशी चाश्वयुजस्य कृष्णा स्वात्यर्कयुक्ता च भवेत्स्नाते॥ स्ना[illegible]
तुल्यनरैस्तु कार्यं सुगंधतैलेन विभूतिकामैरिति॥ पृथ्वीचंद्रोदये ब्राह्मे [illegible]
कृष्णपक्षस्य चतुर्दश्यां विधूदये॥ तिलतैलेन कर्त्तव्यं स्नानं नरकभी[illegible]
र्त्तव्यं मंगलस्नानं नरैर्निरयभीरुभिरिति कालादर्शे पाठः॥ अत्र यत्रा[illegible]
स्यां तमासमन्वितं स्यात्॥ तथा॥ तैले लक्ष्मीर्जले गंगा दीपावल्या[illegible]
तिशेषु॥ प्रातःस्नानं तु यः कुर्याद्यमलोकं न पश्यति॥ दिनद्वये [illegible]
दशी॥ सत्वे तदभावेप्यरुणोदयस्पर्शे खंडवादिनद्वये चतुर्दशी स[illegible]

गं कुर्यात्॥ पूर्वविद्धचतुर्दश्यामिति वचनात्॥ पूर्वदिने परदिने एव वा …
॥ दिनद्वयेप्यसत्त्वे ऽरुणोदयव्यापिनी ग्राह्या॥ अंपक्षे प्रत्यूषसमये इ…
वचनाच्च॥ तदुक्तावेव॥ चतुर्दशीक्रासं पूर्वविद्धः प्रविश्य पूर्वाह्णे त्रयोद…
गं कुर्यादिति दिवोदासः॥ केचिदत्र वचनमपि साधकत्वेन वदंति॥ ति…
६६ थ्यावान्ह्रासो वृद्धिः परे हनि॥ तावान्ग्राह्यः स पूर्वेद्युः दृष्टोपि स्वकर्म…
नरो॥ वचनं पूर्वदिनस्यापूर्वं ग्राह्यत्वं विधत्ते॥ न कैकनक्तजन्माष्टम्यादौ…
कर्मकालव्याप्त्यभावे सर्वत्र पूर्वदिनस्य ग्राह्यत्वप्रसंगात्॥ किंतु यत्रैकनक्त…
न द्वये कर्मकालव्याप्त्यभावे वाक्यांतरेण न्यायेन वा पूर्वदिनस्य ग्राह्यत्वमुक्तं तत्र…
स्य काले तत्तिथेरभावेपि तत्रैवानुष्ठानबोधकमिदं॥ न चात्र तदस्तीति यावल्लिंगवि…
तदा॥ तेन चतुर्थयामगामिनी ग्राह्या॥ अत एव सर्वज्ञनारायणः॥ तथा … चतु
र्दश्यामाश्विने कोदयात्पुरा॥ यामिन्याः पश्चिमे यामे तैलाभ्यंगो विशिष्यत इति॥ म(द)नरत्ने … चन्द्रो
दयवेलायां त्रयोदश्यां यदा भवेत्॥ दर्शे वा मंगलस्नानं दुःखशोकत्रयप्रदमिति का
लादर्शे त्रयोदशीनिषेधाच्च॥ तेनायमर्थः॥ यथाग्निहोत्रे यावज्जीवं सायंप्रातःकाले शिव
त्र्व्याप्यकालस्य गुरुत्वं तथात्र चतुर्दशीचतुर्थयामारुणोदयानामुत्तरोत्तरस्य व्या ६६
प्यत्वाद्गुरुत्वमिति॥ यदपि त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी॥ रात्रिशेषत्वमा

वास्यां तदाभ्यंगे त्रयोदशीति वचनं तद्धेमाद्रिनिर्णयामृतादावलिखितत्वेन निर्मूलं॥ समूलत्वे
पि न चतुर्दश्याः सूर्योदयद्वयासंबंधिरूपः क्षयो ऽत्र विवक्षितः॥ सूर्योदयात्प्राक्समाप्तेश्चंद्रो
दयकालसत्त्वे च तत्र वैधानंगीकारात्॥ किंतु अभ्यंगकालात्प्राक्समाप्तिरूपोऽत्र क्षासः क्षय
शब्देन विवक्षितः॥ स चारुणोदयात् चतुर्थयामाद्वा यदा क्षासस्तत्परमिदं॥ अत एव सर्वज्ञ
नारायणेन चतुर्थयाममात्रे स्नानमुक्तं॥ तथा चोदाहृतं॥ तथा कृष्णचतुर्दश्यामिति॥ ज्योतिर्निबंधे
नारदोपि॥ इषासितचतुर्दश्यामिंदुक्षयतिथावपि॥ ऊर्जादौ स्वातिसंयुक्ते तदा दीपावली भवेत्॥
कुर्यात्संलग्नमेतच्च दीपोत्सवदिनत्रयं॥ यत्तु त्रयोदशीमध्ये स्नानं मा कुरु तेषामाधायं…
इत्यर्थं त्वयसा॥ यदपि अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः॥ तस्याब्दिकभवो धर्मो…
नश्यत्येव न संशय इति दिवोदासीये भविष्यवचनं तन्मुख्यकालेऽरुणोदये चतुर्दश्या…
चस्नानत्यागनित्यर्थं परं॥ चतुर्घटिकात्मकोऽरुणोदय इति तत्रैवोक्तं॥ तथा…
पाम॥ अपामार्गमथो तुंबीं प्रपुन्नाटमथापरं॥ भ्रामयेत्स्नानमध्ये तु न…
वै॥ प्रपुन्नाटश्चक्रमर्दः॥ मंत्रस्तु॥ सीतालोष्ठसमायुक्त सकंटकदलान्वित॥ …
मार्ग भ्राम्यमाणः पुनः पुनरिति॥ अस्यामेव प्रदोषे दीपान्दद्यादित्यु…
ततः प्रदोषसमये दीपान्दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनां भव…

दिवादासीयेपिब्राह्मे। अमावास्याचतुर्दश्योःप्रदोषदीपदानतः। यममार्गां...
कार्त्तिकेनरःखंडतिथौतुपूर्वेद्युःप्रदोषदीपानंदर्शात्परेद्युःस्नायादि...
तत्रैवलिंगे। माषपत्रस्यशाकेनभुक्त्वातत्रदिनेनरः॥ प्रेताख्यायांचतुर्द...
श्यते। अथयमतर्पणमुक्तंमदनपारिजातेवृद्धमनुना। दीपोत्सवचतुर्द...
णे। मदनरत्नेब्राह्मे॥ अपामार्गस्यपत्राणिभ्रामयेच्छिरसोपरि॥ ततश्चतर्प...
डस्यनामभिः॥ यमायधर्मराजायमृत्यवेचांतकायच। वैवस्वतायकालायसर्व...
यच॥ औडुंबरायदध्नायनीलायपरमेष्ठिने॥ वृकोदरायचित्रायचित्रगुप्तायवैनमः...
तथा। यज्ञोपवीतिनाकार्यंप्राचीनावीतिनाप्यथवेति॥ द्वंद्वंजीवत्पितृकेणापिकार्यंजीवत्पि...
ऽकुर्वीततर्पणंयमभीष्मयोरितिपाद्मोक्तेः॥ अत्रचभीष्मतर्पणमप्युक्तंदिवोदासीये। तत्र...
स्तमाघेवक्ष्यते॥ ॥इतिनरकचतुर्दशी॥ ॥ ॥कार्त्तिकामावास्यायांप्रातरभ्यंगउक्तो...
तदुक्तंकालादर्शे। प्रत्यूषेऽश्वयुग्दर्शेकृताभ्यंगादिमंगलः॥ भक्त्याप्रपूजयेद्देवीमल श्रीव
क्ष्मीविनिवृत्तये। अस्यव्याख्याने। आदित्याद्यंपंचत्वग्गुरुकस्नानादेरुपसंग्रहः॥ तदुक्तंपुष्क
रपुराणे। स्वातिस्थितेरवाविंदुर्यदिस्वातिगतोभवेत्॥ पंचत्वग्गुरुकस्नायीकृताभ्यंगविधि ८८
र्नरः। नीराजितोमहालक्ष्मीमर्चयन्श्रियमश्नुते। अश्वयुग्दर्शइतिदर्शशब्दःप्रत्यूषस्वाति
युक्ततिथिपरः। तदुक्तंब्राह्मे। ऊर्जेऽग्रेऽहद्वितीयांततिथिषुस्वातिसंगे। मानवोमंगलस्ना

×एवंप्रभातसमयेत्वमावास्यायांनराधिपाःस्नात्वातुपार्वणश्राद्धंदधिक्षीरघृतादिभिः॥ [illegible]

दीनेवसत्त्याचिंयुज्यते॥ तत्रैव। इषभूतेचदर्शेचकार्त्तिकप्रथमेदिने॥ यदास्वा
तीतुदाभ्यंगस्नानंकुर्याद्दिनोदये। कश्यपसंहितायांतुदीपावलीदर्शंप्रक्रम्य॥ इं
दुक्षयेपिसंक्रांतौरवौपातेदिनक्षये। तत्राभ्यंगोनदोषायप्रातःपापापनुत्तयेइति
स्वातियोगंविनाप्यभ्यंगउक्तः॥ मात्स्ये। दीपनीराजनादत्रसैषादीपावलीस्मृता॥
अत्रविशेषोहेमाद्रौभविष्ये। दिवातत्रनभोक्तव्यमृतेबालातुराज्जनात्॥ प्रदोषस
मयेलक्ष्मींपूजयित्वाततःक्रमात्॥ दीपवृक्षाश्चदातव्याःशक्त्यादेवगृहेषुच॥ त
त्रवाभ्यंगमात्रिधाय॥ दीपान्दत्वाप्रदोषेतुलक्ष्मींपूज्ययथाविधि॥ स्वलंकृते...
भोक्तव्यंसिनवस्त्रोपशोभिना॥ अयंप्रदोषव्यापीग्राह्यः॥ [illegible]
दोषेव्रततदर्शयोः॥ उल्काहस्तानराःकुर्युःपितृणांमार्गदर्शनमिति...
दिनद्वयेसत्वेपरः॥ दंडैकरजनीयोगेदर्शःस्यात्तुपरेऽहनि॥ तदाविहाय...
देक्ष्विसुखरात्रिकेति॥ तिथितत्वेज्योतिर्वचनात्॥ दिवोदासीये...
मेकालत्वात्॥ अर्द्धरात्रेतुमत्येवसल्लक्ष्मीराश्रयितुंगृहान्॥ अतःस्व...
ऽलीग्रहाणिवा॥ सुधाधवलिताःकार्यास्तुष्पमालोपशोभिताः...
प्रदोषार्द्धरात्रव्यापिनीमुख्या। एकैकव्याप्तौपरैव। प्रदोषस्यमु...

धा४

धेया न वा श्च॥ यस्तु॥ अपराह्णे प्रकर्त्तव्यं श्राद्धं पितृपरायणैः॥ प्रदो...
कर्त्तव्या दीपमालिकेति॥ कुर्मः संहृत्य तिथ्यादेव॥ तत्तत्कर्मकाल व्या...
दित्यर्थः॥ अत्रैव पूर्वेद्युः परयात्रे अर्धरात्रे अलक्ष्मीनिःसारणमुक्तं मदनरत्ने...
गते निशीथे जने निशार्द्धलोचने॥ तावन्नगरनारीभिः शूर्पडिंडिमवा...
र्यते प्रहृष्टाभिरलक्ष्मीः स्वगृहांगणात्॥ ॥कार्त्तिकशुक्लप्रतिपदि गो...
निर्णयामृते॥ ॥अस्यामेव रात्रौ बलेः पूजोक्ता हेमाद्रौ भविष्ये॥ ...त्वेव तस्य...
वेहरात्रौ दैत्यपतेर्बलेः॥ पूजां कुर्यात्ततः साक्षाद्भूमौ मंडलके शुभे॥ बलिमालिख्य...
दैत्येंद्रं वर्णकैः पंचरंगकैः॥ गृहस्य मध्ये शालायां विशालायां ततोर्चयेत्॥ लोकश्चापि
गृहस्यांतः शय्यायां शुक्लतंडुलैः॥ संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेत्॥ मं
त्रस्तु पाद्मे॥ बलिराज नमस्तुभ्यं दैत्यदानववंदित॥ इंद्रशत्रोऽमराराते विष्णुसान्नि
ध्यदो भवेति॥ तथा॥ बलिमुद्दिश्य दीयंते दानानि कुरुनंदन॥ यानि तान्यक्षया
न्याहुर्मयैवं संप्रदर्शितमिति॥ तदेतत्सर्वं वृद्धप्रतिपदि कर्त्तव्यं॥ पूर्वविद्धायां शिवा
कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति हेमाद्रौ पाद्मोक्तेः॥ माधवोपि॥ वत्सरस्य च पूर्व
करुपवासवशाच्चरेदिति॥ निर्णयामृतेपि॥ या कुहूः प्रतिपन्मिश्रा तत्र गाः पूज ९३

येन्नृप॥ पूजनाच्छ्रीणि वर्द्धंते प्रजा गावो महीपतेरिति॥ तथा॥ नंदायां गोकुलं क्रीडा
महेशो वै विनश्यति॥ नंदायां द्वितीयायां॥ प्रतिपद्यभ्यंकरणं द्वितीयायां तु गोचनं॥
छत्रच्छेत्रं इकरिष्यते विघ्ननाशं कुलक्षयमिति॥ तथा॥ प्रतिपद्दर्शसंयोगे क्री
डनं तु गवां मतं॥ परविद्धासु यः कुर्यात्पुत्रदारधनक्षयः॥ इति देवलवचनाच्च
एतेन विधिप्रतिषेधाः पूर्वदिने प्रतिपद्दर्शसाम्ये याव्यापित्वे द्वितीयदिने चंद्रदर्
मेचैसंत्र वेच ज्ञेयाः॥ गवां क्रीडादिने यत्र रात्रौ दृश्येत चंद्रमाः॥ सोमो राजा प
शून्हंति सुरभीः पूजकांस्तथेति पुराणसमुच्चयात्॥ दिनद्वये सायाह्नव्यापि
त्वे तु परे वक्ष्यामि॥ वर्द्धमानतिथौ नंदा यदा सार्द्धत्रियामिका॥ द्वितीया
